प्रयोगपद्धतिः सुबोधिनी श्राद्धचिन्तामणौ

१ सजिमिश्राद्दं हस्त्रार्घदान श्रिजनप्रयोगः
८ मन्त्रदानादिकं
९ मृत्युस्नानादो पंचपिंडदाने को दिवानि
१० स्मार्त्ताग्निदाहः श्रौताग्निदा विधिः उदकदानं
१२ निरग्निदाहविधिः अञ्जलिदानं
१६ [illegible] स्थिसंचयनं · प्रथमदिनादूर्ध्वदिनकृत्यानि
२१ एकादशाहकृत्यं प्रायश्चित्तं पंचदेवतश्राद्धं
२५ वृषोत्सर्गः महैकोद्दिष्टश्राद्धं
२८ ३२ कुंभदानं · षोडशीश्राद्धं द्वादशाहकृत्यं
२८ सपिंडनप्रयोगः त्रयोदशाहकृत्य
३३ पाथेयश्राद्धं मासिकविधेय · सपिंडनं
३४ [illegible]नविधिः मते
३५ जलमरणे दाहविधि · अन्यमार्गमरणे
३६ [illegible]तिकादाहविधिः
३७ चक्रमरणे दाहः शान्ति · श्रा
३९ [illegible] मृते · [illegible] विनमरणे
४० पर्णनरदाहः नारायणबलि · त्रिप्रयोगः
४३ [illegible] क्षोदि [illegible] · धेनुदानप्रयोगः
४४ [illegible] श्राद्धं [illegible] · मासैकोद्दिष्टं
४५ [illegible] मरणे [illegible] एकापो · तानि त्रिपिंडं
४८ [illegible] श्राद्धं [illegible] प्रयोगः
५१ मासिकविशेषः सहगमने विशेषः
५६ एकोद्दिष्टश्राद्धं त्रिपिंडकश्राद्धं
६१ [illegible] समस्याद्यानि
[illegible] निरग्निविधुरलां सन्न्यासग्रहणं
[illegible] सन्न्यासग्रहणं [illegible]
[illegible] सन्न्यासिनामन्त्यादिकं
७२ सन्न्यासिनां मरणान्तरकृत्यं
[illegible] समाप्तिः

आद्धबलिनामादि अनुक्रमणी [illegible] सं. प. ७२

४५६३

१ ॥श्रीगणेशाय नमः॥ प्रणम्य तातं विश्वामं विष्णुं सर्वेश्वरं तथा। प्रायश्चित्तामणौ स्वीये निर्णीतानां तु कर्मणां॥१॥
देशाचारानुसारेण च लोकानां हिताय वै। प्रयोगपद्धतिं सम्यक् कुर्वे नाम्ना सुबोधिनीं॥२॥ अथ प्रयोगः। तत्रादौ वासन्नम
रणेन देहशुद्ध्यर्थं प्रायश्चित्तं शक्त्यनुसारेण षडब्दं त्र्यब्दं सार्द्धाब्दमेकाब्दं वा कर्त्तव्यं। तत्र मिताक्षरामहार्णवनारायण
भट्टादिसंमतः प्रायश्चित्तप्रयोगः। यथा। चतुरस्त्रीनेकं वाध्यात्मविद्यं पर्षत्त्वेनोपवेश्य कृतस्नानः शक्तो सत्यां क्लिन्नवासा अ
भुंजानः पर्षदं प्रदक्षिणीकृत्य हृदयेन दूयता साष्टांगं प्रणमेत्। ततस्तैः किं ते कार्यं मिथ्या मा वादीः सत्यमेव वदेत्यादिष्टे पर्ष
दग्रे गोवृषयोः प्रत्येकं पत्याम्नायत्वेन यथाशक्ति स्वर्णं रूप्यं ये निष्कं तदर्द्धं तदर्द्धं वा अथवा रूपस्य पणनवतिपणान् गोद्वा
त्रिंशत्पणान्निधाय प्रायश्चित्तग्रहणं गमिदं गोमिथुनं निष्क्रयद्रव्यं सभ्येभ्योहं संप्रददे न मम। इत्येवं संकल्पं विधाय। अमु
कस्य मे जन्मप्रभृत्य पद्य यावत् ज्ञानाज्ञानकामाकामसकृदसकृत्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ता
प भुक्तपीतापीतसकलपातकातिपातकोपपातकलघुपातकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्र
कीर्णकपातकानां निरासार्थमनुग्रहं कृत्वा प्रायश्चित्तमुद्दिशंतु भवंतः। तथा। सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजाः।
मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः। मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषं। प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छ
था पूज्यैः कृतपवित्रोहं भवेयं द्विजसत्तमैः। एवं प्रार्थयेत्। पुत्रादिश्चेत्प्रायश्चित्तकर्त्ता तदास्मच्छब्दस्थाने तन्नाम निर्दिशे १

तत्प्रार्थनानंतरंमामनुगृह्णंतुभवंतइत्युक्त्वाप्रणमेत्।ततस्तेतमुत्सार्यतस्यशारीरद्रव्यादिशक्तिमुत्तममध्यमाध
मपक्षांश्चविचार्यअस्मिन्पक्षेअयंशक्तइतिनिश्चित्यकथयेयुः।अस्मिन्कालेप्रायश्चित्तीचंदनपुष्पादिभिःपुस्तक
पुजांसभ्यानुवादकपूजांचविधायनिबंधपूजात्वेनचकिंचिद्यथाशक्तिद्रव्यंनिधायकृतांजलिपूर्वोनम्रंतिष्ठेत्।अनु
वादकाम्सचयायानुसारेणन्यतिस्त्रांदक्षिणांदद्यात्।ततोनुवादकःपूर्वोक्तविशेषणविशिष्टानांमहापातकव्यतिरिक्ता
नांपातकानांक्षयोनेनपर्षदुपदिष्टेनसर्वप्रायश्चित्तेनामुकप्रत्याम्नायद्वाराप्राच्योदीच्यांगसहितेनाचीर्णेनतवशु
द्धिर्भविष्यतितेनत्वंकृतार्थोभविष्यसीत्युपदिशेत्।तच्चसर्वप्रायश्चित्तंशक्त्यनुसारेणाब्दंत्र्यब्दंसार्द्धाब्दमन्यद्वापर्ष
दोनुमतं।प्राजापत्यप्रत्याम्नायाश्चगायत्र्ययुतजपेनगायत्र्यातिलहोमसहस्रेणद्वादशब्राह्मणभोजनेनतीर्थयोजन
यात्रायांएकगोदानेनस्वर्णरूप्ययोर्निष्कंतदर्द्धंतदर्द्धंनवाद्वात्रिंशत्पणैर्वागोमूल्यानांशक्त्यादानेनशुष्कैकेशस्यद्वाद
शस्नानेनद्विगुणद्वादशमात्रदानादेचैकःप्राजापत्यइतितत्रशक्तस्यामात्रद्विगुणंचतुर्गुणमित्यादिज्ञेयं।प्रत्याम्नाया
नांमूलवाक्यान्यस्मत्कृतकृत्यचिंतामणौद्रष्टव्यानि।निष्कस्यलोकशास्त्रयोरेकवाक्यतायांमाषाः४०।तदर्द्धंवा२०।तत्रा
र्द्धंवा१०।तत्रमुख्यंसुवर्णंतस्याशक्तौरजतंग्राह्यं।तदशक्तौद्वात्रिंशत्ताम्रपणाः।ततोनिवेदितंप्रायश्चित्तंभवदनुग्रहइत्यं
गीकृत्यसन्मानपूर्वकंप्रणम्यपर्षदंविसर्जयेत्।अस्मिन्नहनिशक्तेनोपवासःकार्यः।अशक्तेनहविष्याशनंकार्यं।ततस्स

२ षनीमेवप्रातःकस्यांचिद्दिक्षायांतिथौवाकृतमाध्याह्निकंस्नायात्हेगंगादिपुण्यतीर्थेगत्वाक्षालितहस्तपादःकुशपाणिरा
चांतःकृतप्राणायामोदेशकालौसंकीर्त्यअमुकशर्मणोममजन्मप्रभृत्यद्ययावत्ज्ञानाज्ञानकामाकामसकृदस
कृत्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातकलघु
2 पातकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णपातकानांनिरासार्थंमरणकालेशुद्ध्यर्थंश्री
परमेश्वरप्रीत्यर्थंअमुकप्रायश्चित्तंअमुकप्रत्याम्नायेनप्राच्योदीच्यांगसहितंयथाशक्तिकरिष्ये इतिसंकल्प्यक्षौरंकार
येत्।तत्रमंत्रः।यानिकानिचपापानिब्रह्महत्यासमानिच।केशानाश्रित्यतिष्ठंतितस्मात्केशान्वपाम्यहं।इतिमंत्रेणशिखा
कक्षोपस्थवर्जंनखरोमाणिवापयित्वाशुध्यर्थंस्नात्वाप्राङ्मुखोद्वादशांगुलदंतकाष्ठेन।आयुर्बलंयशोवर्चःप्रजांपशू
न्वसूनिच।ब्रह्मप्रज्ञांचमेधांचत्वन्नोधेहिवनस्पते।मुखदुर्गंधिनाशायदंतानांचविशुद्धये।ष्ठीवनायचगात्राणांत्वन्नोदेहि
वनस्पते।इतिमंत्राभ्यांदंतान्संशोध्यतावत्प्रमाणकाष्ठांतरेणजिह्वामुल्लिख्यप्रक्षाल्यकाष्ठद्वयंकिंचिद्दूरंत्यक्त्वासमुत्सृज्यस्नात्वा
भस्मादिदशस्नानानिकुर्यात्।तत्रभस्मस्नानं।ॐतत्पुरुषायविद्महेमहादेवायधीमहि।तन्नोरुद्रःप्रचोदयात्इतिरुद्रगाय
त्र्याप्रणवेनचजलालोडितंभस्मसर्वांगेलापयित्वाजलेनस्नायात्।ततोगोमयेन।गोमयंजलेनालोड्यहस्तेनादायगाव २
श्चिद्वासमन्यवइतिमंत्रेणअग्रमग्रंचरंतीनामितिवागोमयंमस्तकादंगेषुप्रतिलोमंलापयित्वास्नायात्।अथमृत्तिकाप्रास

हस्तशीर्षा घृतवत्यश्वक्रांता इत्यादिमंत्रैर्मृत्तिकामादाय इदं विष्णु[illegible]रित्यादिप्रणमंत्रैर्जलेन तां मृदमालोड्य उद्धृतासि वराहेणाम्भो
सीति मंत्राभ्यां मूर्ध्नि अंगेषु प्रतिलोममालिंपेत्। ततः प्रवाहाभिमुखस्त्रिवारं मज्जेत्। इति मृत्तिकास्नानं। ततः शुद्धोदकेन। तत्र शन्नो
देव्यापो हिष्ठीया तिरूपास्मा इत्यादि पावमानीभिस्तरत्समंदीभिरेतोन्विंद्रं स्तुतमुष्टवामनकिं इदं लदुत्तरं पवित्रं ते इत्यादिभिः कुशो
दकेन मार्जयित्वा स्नायात्। अथ पंचगव्यस्नानानि। तत्र गायत्र्या गोमूत्रेण गंधद्वारामिति गोमयेन। आप्यायस्वेति गोक्षीरेण। द
धिक्राव्ण इति दध्ना। घृतवतीति घृतेन। एवं पंचगव्यैः स्नात्वा कुशोदकेन स्नायात्। देवस्य त्वेति मंत्रेण अभिषिंचामीति वाक्यशेषः।
स्त्रीशूद्रा[illegible]णाममंत्रकाणि स्नानानि। एवं दश स्नानानि विधाय स्नानांगतर्पणं कृत्वा धौते वाससी परिधाय हरिं चभ्यर्च्य विष्णोः पूजां
कुर्यात्। यथा। आचम्य प्राणानायम्य देशकालौ संकीर्त्य सकलपापक्षयकामः श्रीविष्णुप्रीतये प्रायश्चित्तांगं श्रीविष्णोः पूजामहं करिष्ये
इति संकल्प्य समाचारात् तंडुलैरष्टदलं कृत्वा कर्णिकायां ताम्रकलशं यथाविधिना संस्थाप्य कलशोपरि सुवर्णनिर्मितां विष्णोः प्रति
मां शालग्रामं वा निधाय प्रतिमायां हे विष्णो इहागच्छ इह तिष्ठ इत्यावाह्य प्रागाद्यष्टपत्रेषु रुक्मिण्याद्या अष्टौ स्थापयेत्। प्रतिदलं तं
डुलपुंजान् कृत्वा रुक्मिणि इहागच्छ इह तिष्ठ। सत्यभामे इहा०। जांबुवति इहा०। नाग्नजिति इहा०। कालिंदि इहा०। मित्रविंदे इहा०। लक्ष्मणे इहा०।
चारुहासिनि इहा०। इत्यावाह्य प्रतिष्ठां कुर्यात्। प्रतिष्ठामंत्रो पठित्वा अस्मिन्मंडले अष्टशक्तिसहितः श्रीविष्णुः सुप्रतिष्ठितो वरदो
भवतु इत्युक्त्वा अक्षतान् क्षिपेत्। ततः पूजा। सा च इदं विष्णुरिति मंत्रेण कार्या। इदं विष्णुरिति पठित्वा विष्णवे आसनं समर्पयामि।

३ एवंपाद्यं। अर्घ्यं। आचमनीयं। स्नानं। पुनराचमनीयं। वस्त्रं। पुनराचमनीयं। उपवीतं। चंदनं। पुष्पं। ततः प्रागाद्यष्टशक्तीः पूजये
त्। रुक्मिण्यै नमः। सत्यभामायै नमः। जांबुवत्यै० नाग्नजित्यै० कालिंद्यै० मित्राविंदायै० लक्ष्मणायै० चारुहासिन्यै० ततो धूपं। दीपं।
नैवेद्यं। पुनराचमनीयं। प्रदक्षिणा। स्तुतिः। नमस्कारः। एवंसपरिवारं देवमभ्यर्च्य। अद्यपूर्वोच्चरितएवंग्रहगुणविशेषणवि
शिष्टायां तिथौ प्रायश्चित्तांगभूता विष्णोः पूजनकृतस्य विधेः सर्वं परिपूर्णमस्तु। प्रतिमापक्षे दानांते विष्णो त्वमस्व पूजितोसि वि
सर्जयामि इत्युक्त्वा विसर्जयेत्। शा लियाम पूजायामावाहनविसर्जने नस्तः। इति विष्णुपूजा। अथ वैश्वदेवश्राद्धं। तत्र युग्मान्ब्रा
ह्मणानुपवेश्य अनावेदर्भचतुष्टयं वा निधाय यवहस्तः। अक्रोधनै० देवकार्यमेद्य० विष्णो एतत्ते पाद्यं पादावनेजनं। एतद
र्घ्यं। इदमत्र चंदनं च पुष्पं। आचमनं। भूर्भुवः स्वः समाधं। आचमनं। प्राणायामः गायत्री गायत्रं च पठित्वा। प्रसादं कृत्वा वैस्व
वंश्राद्धं कारयध्वं। अग्निष्वात्ताः० श्राद्धभूमौ० सप्तव्याधा० देवताभ्यः० अपवित्रः० दशगायत्री। एतोन्विंद्र० पृथिव्या अधिसा
नविभवतां प्रसादात् वैश्वदेवश्राद्धोपहाराणां पवित्रतास्तु। देश० अद्य मासपक्षतिथौ मम सकलपापक्षयार्थं प्रायश्चित्तांग
त्वेन विहितं वैश्वदेवं श्राद्धं संकल्प्य श्राद्धविधिना अहं करिष्ये। भगवते विष्णवे इदमासनं स्वाहा। हस्त प्र० ततः प्राद्जान्वं समूर्द्ध
सुदक्षिणांगपूर्वकं चंदनेन पूजां कृत्वा। अथ दत्तं गंधाद्यर्चनं भगवते विष्णवे स्वाहा। इदं विष्णवे न मम। अत्र गंधपुष्पधूपदी २
पाच्छादनानां प्रदानं। इदं वो० अस्य वैश्वदेवश्राद्धस्यार्चनविधेः० आचमनं। ततोऽन्नं परिविष्य असंभवे द्विगुणं चतुर्गुणं वा

आमान्नमग्रे निधाय सत्यं त्वर्त्तेनाभि॰ परिषिञ्चे॰ इदमन्नादि॰ भोजनं दत्तं आमान्नं वा भगवते विष्णवे स्वाहा। इदं विष्णवे न मम।
न भोजनपक्षे मुखवासं दत्वा सुप्रोहित॰ अस्य वैष्णवश्राद्धस्य सांगतासिध्यर्थं इमां दक्षिणां मुखवासं च भगवते विष्णवे स्वाहा। इदं वि
ष्णवे न मम। अद्य पूर्वो॰ तिथौ प्रायश्चित्तांगवैष्णवश्राद्धकृतस्य विधेः सर्वं परिपूर्णमस्तु। अशक्तासंभ वे विष्णूद्देशेन ब्राह्मण
पूजापूर्वकं भोजयेदामान्नं वा दद्यात्॥ इति वैष्णवश्राद्धं॥ ततो गोदानं प्रत्यक्षं निष्क्रयद्वारा वा कुर्यात्। प्रत्यक्षगोदानपक्षे ब्राह्मण
मुदङ्मुखमुपवेश्य संपूज्य गां च संपूज्य सुसंप्रोहितमित्यादि कृत्वा कुशोदकमादाय प्रायश्चित्तांगत्वेन विहितामिमां गां रुद्रदैव
तां अमुकगोत्राय अमुकशर्मणे अमुकगोत्रोहं अमुकशर्मा तुभ्यमहं संप्रददे। गवामंगेषु तिष्ठंति भुवनानि चतुर्दश। यस्मात्तस्मा
च्छिवं मेस्यादिहलोके परत्र च। इति पठित्वा न मम इति वदेत्। एतद्गोदानप्रतिष्ठासिध्यर्थं इमां दक्षिणां तुभ्यमहमित्यादि। निष्क्रय
द्रव्यदानपक्षे प्रायश्चित्तांगत्वेन विहितगोदाननिष्क्रयद्रव्यं तुभ्यमित्यादि। एवं गोदानं कृत्वा होमं कुर्यात्॥ अथ प्रायश्चित्तांग हो
मविधिः॥ अरत्निमात्रं सममचतुरस्रं स्थंडिलं कृत्वा तस्य पश्चिमतः प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य प्रा
यश्चित्तांगत्वेन विहितं पापहा विष्णुप्रीतये आज्येन होममहं करिष्य इति संकल्प्य स्थंडिले पंच भूसंस्कारान्विधाय विधिनामान
मग्निं संस्थापयामीत्यग्निं संस्थाप्य इदं भूमेरिति भूजपं कृत्वा यथाविधिना आज्यं संस्कृत्य अदितेनुमन्यस्वेत्यादिमंत्रैः प्रसि
च्य देवसवितरिति पर्युक्ष्य स्त्रुवं संमार्ज्य समिधं हुत्वा व्याहृतिभिरष्टोत्तरशतमष्टाविंशति वाहुतीर्जुहुयात्। ततः पंचगव्यं कार्यं।

६ ताम्रवर्जितस्वर्णादिपात्रे पत्रपुटे वा ताम्रायां गोमूत्रं त्रिपलं गायत्र्या प्रणवेन वा आदाय। ततोऽङ्गुष्ठार्धपरिमितं श्वेताया गोम
यं गावश्चिद्वा समन्यव इत्यादाय। कपिलायाः पयः सप्तपलमाप्यायस्वेत्यादाय नीलायाः सप्तपलमेव दधिक्राव्णो इत्यादाय कृ
या ष्णायाः घृतमेकपलं घृतवती भुवनानामित्यादाय दद्यात्। तत एकपलं कुशोदकं आपो हिष्ठेत्याद्यं प्रणवेनालोड्य प्रणवेनै
व यज्ञियकाष्ठेन निर्मथ्य प्रणवेनाभिमंत्र्य सप्तपत्रे हरितैः कुशैर्दशाहुतीर्जुहुयात्। तत्र मंत्राः। स्योना पृथिवि नो भवेति स्वा
हा तेन होमः। इदं पृथिव्यै न मम। इदं विष्णुर्विचक्रमे। इदं विष्णवे न मम। मानस्तोके। इदं रुद्राय न मम। ब्रह्मजज्ञानं। इदं ब्रह्मणे
५ न मम। अग्नये स्वाहा। इदमग्नये न मम। सोमाय स्वाहा। इदं सोमाय न मम। गायत्र्या जुहुयात्। इदं सूर्याय। प्रणवेन जुहुयात्। इदं
प्रजापतये न मम। भूर्भुवः स्वः स्वाहा। इदं प्रजापतये न मम। अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। ततो व्याहृतित्रयं पु
नर्हुत्वा समिद्धो मानुपर्युक्षणप्रसेकान् विधाय अग्निं प्रदक्षिणीकृत्य पात्रं निनीय पुनः प्रपूर्य वामदेव्यं गायेत्। ततो ब्रह्मतत्प्र
हणं करिष्य इति द्विजान् पृष्ट्वा कुरुष्वेत्यभ्यनुज्ञातः प्रणवेन सर्वं पिबेत्। एतच्च यामाद्बहिर्न धार्यं दस्त्रीरेन हस्त दर्शने कार्यं अ
शक्तौ तु गोमूत्रादिस्वल्पं ग्राह्यं सर्वस्य पेयत्वात्। अस्मिन्दिने उपवासः शक्तस्य। अशक्तस्य हविष्याशनं। एवं पंचगव्यं प्राश्य
गृहेष्वागत्य विष्णुं स्मरन्निशामतिवाह्य प्रक्रांतप्रायश्चित्तं संकल्पानुसारेण प्रत्याम्नाय दानं वा कुर्यात्। पुनः विष्णुं संपू ६
ज्य स्तुत्वा यस्य स्मृत्येति विसृजेत्। तत्र गोदानप्रत्याम्नायपक्षे एकाब्दप्रायश्चित्ते त्रिंशद्गावः। त्र्यब्दपक्षे नवतिः। षडब्दे साशी

तिशतसंख्याकाः।सार्द्धद्वेपंचचत्वारिंशत्॥प्रत्यक्षगोदानाशक्तौतावतीनांगवांमूल्यंदद्यात्॥एवमन्येपिप्रत्याम्नायाः।ए
वंप्रायश्चित्तंकृत्वाउत्तरांगानिकुर्यात्॥पूर्ववद्ब्राह्मणान्तिनिराज्यंहुत्वापूर्ववत्प्रायश्चित्तांगवैष्णवश्राद्धंकृत्वातेगोदानंपूर्वव
त्कुर्यात्॥एवंप्रायश्चित्तंकृत्वाशक्तौसत्यांदशदानान्यपिकुर्यात्॥तानिच।गोभूतिलहिरण्याज्यवासोधान्यगुडानिचारौप्यं
लवणमित्याहुर्दशदानानिपंडिताः।इति।तत्रगवांमंगेष्वित्यनेनगावोमेग्रतइत्यनेनवागोर्देया॥सर्वभूताश्रयाभूमिर्वरा
हेणसमुद्धृता।अनंतसस्यफलदाह्यतःशांतिंप्रयच्छमे।इतिमंत्रेणभूमिर्देया।महर्षेगोत्रसंभूताकश्यपस्यतिलाःस्मृताः।तस्मा
देषांप्रदानेनममपापंव्यपोहतु।इतितिलानांदानमंत्रः।हिरण्यगर्भगर्भस्त्वंहेमबीजंविभावसोः।अनंतपुण्यफलदमतःशांतिं
प्रयच्छमे।इतिहिरण्यदानमंत्रः।कामधेनुसमुद्भूतंसर्वक्रतुषुसंस्थितं।देवानामाज्यमाहारमतःशांतिंप्रयच्छमे।इत्याज्यदान
मंत्रः॥शरणंसर्वलोकानांलज्जायारक्षणंपरं।सुवेषधारणंवस्त्रमतःशांतिंप्रयच्छमे।इतिवस्त्रदानमंत्रः॥सर्वदेवमयंधान्यंस
र्वोत्पत्तिकरंमहत्।प्राणिनांजीवनोपायमतःशांतिंप्रयच्छमे।इतिधान्यदानमंत्रः॥यथादेवेषुसर्वात्माप्रवरश्चजनार्दनः।सा
मवेदस्तुवेदानांमहादेवस्तुयोगिनां।प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा।तथारसानांप्रवरःसदैवेक्षुरसोमतः।ममतस्मा
त्परांलक्ष्मींददस्वगुडसर्वदा।इतिगुडदानमंत्रः॥प्रीतिर्यतःपितृणांचविष्णुशंकरयोःसदा।शिवनेत्रोद्भवंरौप्यमतःशांतिंप्रय
च्छमे।इतिरजतस्य॥यस्मादन्नरसाःसर्वेनोत्कृष्टालवणंविना।शंभोःप्रीतिकरंनित्यमतःशांतिंप्रयच्छमे।इतिलवणदानमंत्रः॥

५ एवंदशदानानिदत्वा ॥ मंत्रहीनंक्रियाहीनंश्रद्धाहीनंसुरेश्वर । तत्सर्वंक्षम्यतांदेवप्रसीदपरमेश्वर ॥ इतिविष्णुंसंप्रार्थ्यप्रणमे
त् । एतानिदशदानानिसम्भवेऽप्यएव । तदसंभवेत्वन्यत्योपि । ततोयन्मयाकृतममुकप्रायश्चित्तंतदच्छिद्रमस्तुइतिकर्त्रोउ
क्तेअच्छिद्रमस्तुब्राह्मणाःप्रतिब्रूयुः । यच्छावृतच्छिद्रंतपश्छिद्रंयच्छिद्रंयज्ञकर्मणि । सर्वंभवतुमेच्छिद्रंयस्यचेच्छंतिवैद्विजाः ।
इतिपठित्वाविप्रान्प्रार्थयेत् । प्रतिवचनंपूर्ववत् । इतिप्रायश्चित्तप्रयोगः ॥ एतत्प्रायश्चित्तमकृत्वैवयदिपित्रादिर्मृतस्तदा
पातकनिश्चयेइदमवश्यंपुत्रादिनाकार्यं । अनिश्चयेनावश्यकं । पुत्रादिनाकरणेपंचगव्यप्राशनाभावः । मरणानंतरंचतु
द्वा र्द्धाविशिष्टाधरोच्छिष्टोभयोच्छिष्टास्पृश्यस्पृष्टमरणस्व[illegible]मरणबंधनमरणादिषुसत्सुत्रीन्षट्द्वादशपंचदशवाब्दप्रान्
प्रायश्चित्तंनिमित्तानुसारेणब्राह्मणवचनाद्गृहीत्वातदानीमेवतत्प्रत्याम्नायतयाहिरण्यादिदत्वाशुद्धिंसंपाद्यदहनादि
कुर्यात् । अशक्ताःपुत्रादयःपित्रादेःपापिनःसर्वात्मनाशुद्धीच्छवःसर्वप्रायश्चित्तेष्वन्यतमंकृत्वादहनादिकुर्युः । प्रेतस्यात्मशुद्धि
मकृत्वालोभादिनादाहादिकेकृतेतदुद्देशेनकृतंसर्वमफलंभवति । निश्चयेनोभयोर्नरकप्राप्तिर्भवति । एवंस्वस्यापिउत्तर
कार्यकर्तृत्वेप्यधिकाराभावेशक्त्याकृच्छ्रादिरूपांशुद्धिमात्मनःसंकल्पेनैवतद्देववाप्रत्याम्नायेनसंपाद्यदहनादिकुर्या
त् । अन्यथोन्यत्सर्वंव्यर्थंभवतीत्यलंबहुना ॥ इ[illegible]पर्युक्तोविचारः ॥ अथोत्क्रांतिधेनुदानविधिः ॥ साचदरिद्रायकुटुंबिनेश्रो ५
त्रियब्राह्मणायदेया । क्षालितहस्तपादोबद्धशिखोधृतकुशःआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममसुखेनप्राणो

त्यु

क्रमणार्थं गोदानमहं करिष्ये। इति संकल्प्य उदङ्मुखं ब्राह्मणमुपवेश्य पाद्यादिभिः संपूज्य गां च तत्र समानीय संपूज्य पु
च्छमादाय अद्येत्यादि कालं संस्मृत्वा अमुकगोत्रस्यामुकशर्मणो मम सुखेन प्रा[illegible]क्रमणप्रतिबंधकोक्तनिःकृत्यनुक्तनिष्कृ
तिसकलपातकक्षयद्वारा सुखेन प्राणोत्क्रमणार्थं यथाशक्त्यलंकृतामिमामुत्क्रान्तिधेनुं रुद्रदैवतां अमुकगोत्रायामुक
शर्मणे तुभ्यं संप्रददे। गवामंगेषु तिष्ठंति भुवनानि चतुर्दश। यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च। इति पठित्वा न ममेति दद्या
त्। एतदुत्क्रान्तिधेनुदानप्रतिष्ठासिद्ध्यर्थमिमां दक्षिणां तुभ्यमित्यादि। पित्रादेरुत्क्रान्तौ पुत्रादिर्दद्यात्। तत्र ममेति पदस्थाने पित्रा
देरिति विशेषः। धेन्वभावे तत्प्रत्याम्नायत्वेन द्रव्यं दद्यात्। इत्युत्क्रान्तिधेनुदानवाक्यं॥ अथ वैतरणीदानविधिः॥ तत्र सुवर्णेन निर्मिता
यममूर्तिः। लोहदंडो दक्षिणे। पाशश्चापरे। महिषारूढः। पट्टवस्त्रबद्धेक्षुदंडमयां ह्युडुनौकां विधाय तत्र तां गामवस्थाप्य समीपे स
प्तधान्यानि संस्थाप्य छत्रोपानहौ चोपकल्पयेत्। सन्निधौ द्रोणपरिमितकार्पासं संस्थाप्य तदुपरि ताम्रभाजने यममूर्तिं न्यसेत्।
एवं संभारं संभृत्य प्राङ्मुख उपविश्य आचम्य प्राणानायम्य मासपक्षतिथ्यादिकमुच्चार्य अमुकगोत्रस्यामुकशर्मणो मम यम
मार्गस्थवैतरण्याः [illegible] सुखेनोत्तरणार्थं गोदानमहं करिष्ये इति संकल्प्य उदङ्मुखं ब्राह्मणमुपवेश्य तस्य पादौ प्रक्षाल्य गं
धमाल्यवस्त्रादिभिर्यथाशक्ति अभ्यर्च्य ताम्रभाजनस्थं यमं च स्वमंत्रेण प्रतिष्ठापूर्वकं पूजयेत्। नाके सुपर्णमिति मंत्रेण यमं
सर्वोपचारैरभ्यर्च्य नमस्कुर्यात्। महामहिषमारूढ दंडपाशधर प्रभो। [illegible]केहणमहाबाहो धर्मराज नमोस्तु ते। एवं यमं

कुलीया

गरुडपुराणे
प०
१२८

६ संपूज्यधेनुंचपूजयेत्।ततोब्राह्मणस्यहस्तेशिवाआपःसंतु।सौमनस्यमस्तु।अक्षतंचारिष्टंचास्तु।यद्यच्छ्रेयस्तदस्तु।य
त्पापंतत्प्रतिहतमस्तु।इतिकृत्वा।धेनुकेत्वंप्रतीक्षस्वयमद्वारेमहापथे।उत्तितीर्षुरहंदेविवैतरण्यैनमोस्तुते।इतिधेनुंसं
प्रार्थ्य।विष्णुरूपद्विजश्रेष्ठभूदेवपङ्क्तिपावन।तर्तुंवैतरणीमेनांकृष्णांगांप्रददाम्यहं।इतिब्राह्मणंसंप्रार्थ्यकुशोदकमादा
यअद्येत्यादिउक्त्वावैतरणीसंतरणार्थमिमांगांसुवर्णशृंगींरौप्यखुरांताम्रपृष्ठींकांस्यदोहनांघंटाभरणभूषितांकृष्णवस्त्र
6 युगाच्छादितांपट्टवस्त्रबद्धखुरांदंडमयद्रोणीकासमीपावस्थितांमुक्तादामावलंबितपुच्छांसप्तधान्यद्रोणसहितांकार्पासद्रो
णस्थताम्रभाजनस्थलोहदंडपाशोपेतहेमयमसहितांरक्तमाल्याद्यलंकृतांविष्णुदेवतांअमुकगोत्रायामुकशर्मणेतुभ्यं
संप्रददेयमद्वारेमहाघोरेघोरावैतरणीनदी।तांतर्तुंकामोयच्छामिकृष्णांवैतरणींतुगां।नममइत्युक्त्वाविप्रहस्तेजलंक्षिपे
त्।एतद्गोदानप्रतिष्ठासिद्ध्यर्थमिमांदक्षिणामित्यादि।कृष्णायाअभावेअन्यवर्णापिदेया।गोरभावेद्रव्यंदेयं।तस्याशक्तौमुद्रा
दिर्देया।तत्रआद्येमंत्रेउत्तितीर्षुरयमितिपठेत्।द्वितीयेतर्तुंवैतरणीमस्येति।तृतीयेतांतर्तुमस्येति।अत्रोपकल्पितंछत्रोपा
नहधान्यकार्पासादियममूर्तिंचेतिसर्वंब्राह्मणायदेयं।ततोधर्मराजंगांब्राह्मणंचप्रदक्षिणीकृत्यनत्वाविसर्जयेत्।इतिवै
तरणीदानविधिः॥अथतिलपात्रदानविधिः।तत्रयथाशक्तिताम्रपात्रेतिलान्प्रक्षिप्यअद्येत्यादिममजन्मप्रभृतिमरणांतकृ ६
तनानाविधपापप्रशमनार्थंतिलपात्रदानमहंकरिष्येइतिसंकल्प्यविप्रस्यपादप्रक्षालनगंधमाल्यादिभिर्यथाशक्तिपूजांकृ

तिलपात्रदानानन्तरं घृतपात्रदा व्याऽस्य रथमहिषी
वाजनवस्त्र

त्वाकशोदकमादायअद्येत्यादिसमुच्चार्यममजन्मप्रभृतिमरणांतनानाविधपापशमनार्थंइदंतिलपात्रंरुद्रदेवतंअमुक
गोत्रायामुकशर्मणेतुभ्यमहंसंप्रददे। तिलाःपुण्याःपवित्राश्चतिलाःसर्वकराःस्मृताः। शुक्लावायदिवाकृष्णाऋषिगोत्रसमुद्भ
वाः। यानिकानिचपापानिब्रह्महत्यासमानिच। तिलपात्रप्रदानेनतानिनश्यंतिसर्वदा। महर्षेर्गोत्रसंभूताःकश्यपस्यतिलाःस्मृ
ताः। तस्मात्तेषांप्रदानेनममपापंव्यपोहतु। नममेतिविप्रहस्तेजलंदद्यात्। पुत्रादिश्चेद्ददातितदाअस्यपापंव्यपोहत्विति
दत्तायदद्यात्अयंमंत्रः। योदेवःपितृरूपेणहव्यकव्यभुगव्ययः। तिलपात्रप्रदानेनसमेविष्णुःप्रसीदतु। इति। दानांतरेसोस्यविष्णुः
प्रसीदत्विति पठेत्। एतन्मंत्रपठनेविष्णुप्रीतिरेवफलत्वेनोक्तेरव्या॥ इतितिलपात्रदानविधिः॥ अथाष्टमहादानानि। तानिगारुडे।
तिलालोहंहिरण्यंचकर्पासंलवणंतथा। सप्तधान्यंक्षितिर्गावएकैकंपावनंस्मृतमिति। दशमहादानान्युक्तानिकूर्मपुराणे। कन
काश्वतिलानागोदासीरथमहीगृहाः। कन्याचकपिलाधेनुर्महादानानिवैदश। नागोहस्ती। सप्तधान्यानिषट्त्रिंशन्मते। यव
गोधूमधान्यानितिलाःकंगुस्तथैवच। श्यामाकंचीनकंचैवसप्तधान्यमुदाहृतं। धान्यशब्देनव्रीहयः। देवयानीयेसप्तधान्या
न्यन्यानि। व्रीहयोयवगोधूमामुद्गामाषाप्रियंगवः। तिलाश्चसप्तमाःप्रोक्ताःसप्तधान्यमुदाहृतं। चतुर्दशोपदानानितत्रैव।
अन्नंचउदकंचैवउपानहौकमंडलुः। छत्रंवस्त्रंतथायष्टीलोहदंडस्तथाष्टमः। अग्निष्ठिकांचदीपंचतैलंतांबूलमेवच। चं
दनंपुष्पदानंचोपदानानिचतुर्दशेति। अग्निष्ठिकाअंगीठीइतिलोके॥ अथाष्टमहादानानांदानवाक्यानि। आदौविष्णुं

७ संपूज्य ब्राह्मणं च चंदनादिभिः संपूज्य कुशोदकमादाय देशकालौ संकीर्त्य इदं तिलदानं सोमदैवतं प्रजापतिदैवतं वा गंधाद्य
र्चितं श्रीविष्णुप्रीतये अमुकगोत्राया मुकशर्मणे अमुकगोत्रोऽमुकशर्माहं तुभ्यमहं संप्रददे। तिलाः कृष्णास्तिलाः श्वेतास्ति
ला गोमूत्रसन्निभाः। ते मे हरंतु पापानि शरीरेण कृतानि च। न मम। इत्युक्त्वा जलं क्षिपेत्। एतद्दानप्रतिष्ठासिद्ध्यर्थमिमां दक्षि
णामित्यादि। इति तिलदानं। अथ लोहदानं। इदं लोहमग्निदैवतं श्रीविष्णुदैवतं वा श्रीविष्णुप्रीतये अमुकगोत्राया मुकशर्म
णे अमुकगोत्रो मुकशर्माहं तुभ्यमहं संप्रददे। यस्मादायसकर्माणि त्वदधीनानि नित्यशः। लांगलाद्यायुधादीनि ततः शांतिं प्र
यच्छ मे। न मम। इति लोहदानं। अथ हिरण्यदानं। इदं सुवर्णमग्निदैवतं अमुकगोत्राय० संप्रददे। हिरण्यगर्भगर्भस्थं हेमबीजं
विभावसोः। अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे। न मम। सुवर्णदाने रजतं दक्षिणात्वेन देयमिति देवः। अन्यत्र सुवर्णमेव दक्षि
णा। सुवर्णं परमं दानं सुवर्णं दक्षिणा परेति वाक्यात्। इति सुवर्णदानं। अथ कर्पासदानं। इदं कर्पासं बृहस्पतिदैवतं अमुक
गोत्राय० संप्रददे। येन दत्तेन प्रीयंते भूर्भुवः स्वरिति क्रमात्। ब्रह्माद्यास्त्रयः सर्वे शंकराद्यास्तथैव च। इंद्राद्या देवताः सर्वे क
र्पासेन तु तोषिताः। न मम। इति कर्पासदानं। अथ लवणदानं। इदं लवणं विष्णुदैवतं अमुक० संप्रददे। यस्मादन्नरसाः सर्वे नो
त्कृष्टा लवणं विना। पितॄणां च प्रियं नित्यं तस्मात्स्वर्गप्रदं भवेत्। न मम। इति लवणदानं। अथ सप्तधान्यानां दानं। इमानि स ७
प्तधान्यानि प्रजापतिदैवतानि गंधपुष्पाद्यर्चितानि यमस्य तद्दूतानां च प्रीतये अमुक० संप्रददे। अन्नं प्रजापतिः साक्षादन्नमेव

जनार्दनः॥ अन्नाद्भवंति भूतानि जगदन्नेन वर्द्धते न मम॥ इत्यन्नदानं॥ अथ भूमिदानं॥ इमां भूमिं विष्णुदैवतां सर्वसस्यप्रदां स-
स्यवतीं चेतां सर्वसस्यवतीं विष्णुपदप्राप्तये अमुक॰ संप्रददे॥ समुद्रवसना देवि भूतधात्री च वैष्णवी॥ सा मे दहतु पापानि जन्मां-
तरकृतान्यपि न मम॥ इति भूमिदानं॥ ततोऽष्टमहादानांतःपातितिसृणां गवां दानं॥ इमास्तिस्रो गावः रुद्रदैवताः त्रिविधपापह-
यार्थं अमुकगोत्राय॰ संप्रददे॥ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहं॥ न मम॥ इत्यष्टौ म-
हादानानि॥ तिलादिषु सर्वेषु महादानेषु हिरण्यं दक्षिणा॥ दातृप्रतिग्रहीतृधर्माः सर्वदानेषु साधारणा ज्ञेयाः॥ सर्वदानानां पृथक्-
दानकालसंभवे पृथक् देयानि॥ असंभवे तु समुदितानां संकल्पः॥ देशकालं संकीर्त्य इमानि तिलादीन्यष्टौ महादानानि नानादेव-
तानि गंधपुष्पाद्यर्चितानि सदक्षिणानि श्रीविष्णुप्रीतये तत्तद्दानफलावाप्तये नानागोत्रेभ्यो ब्राह्मणेभ्यो नानानामभ्योऽहं संप्रददे
न मम॥ समभ्यर्च्य हृषीकेशं पुष्पधूपादिभिस्ततः॥ प्रणिपातैः स्तवैः पुण्यैः ध्यानयोगेन पूजयेत्॥ दत्वा दानानि विप्रेभ्यो दीनानाथे-
ष्वेव च॥ बंधौ कलत्रे पुत्रे च देहे धान्ये गृहादिषु॥ मित्रवर्गे च सर्वत्र ममत्वं विनिवर्त्तयेत्॥ शक्तश्चेत्तिलधेन्वादिदानानि दद्या-
त्॥ अथानाशनग्रहणविधिः॥ तत्रादौ सर्वोपचारैर्विष्णोः पूजनं तत्र संकल्पो विशेषः॥ अद्येत्यादि मम इहजन्मकृतसकलपाप-
क्षयपूर्वकं श्रीविष्णुप्रीतये अनाशनग्रहणांगं श्रीविष्णोः पूजनमहं करिष्ये इति संकल्प्य यथावत्पूर्वोक्तविधिना पूजां कृत्वा वैष्णवं
श्राद्धं कुर्यात्॥ अनाशनग्रहणांगं वैष्णवं श्राद्धं संकल्पविधिनाऽहं करिष्ये इति संकल्प्य यथावेच्छ्राद्धं कृत्वा संकल्पं कुर्यात्॥ ता

न्नपात्रेकुशाक्षतजलानिकृत्वाहस्ताभ्यामादायविष्णुंनत्वाअद्येत्यादितिथ्यंतमुच्चार्यममएतज्जन्मकृताशेषपापौघनि
वृत्त्यर्थंश्रीविष्णुप्रीतये।अन्नंचतुर्विधंस्वादुषड्रससमन्वितं।संन्यस्तंतन्मयादेवप्रीतयेतवकेशव॥१॥यान्यन्यानितुक
र्माणिगीतवाद्यादिकानिच।मयान्यस्तानिसर्वाणिप्रीतयेतवकेशव॥२॥नभोक्तव्यंमयादेवअस्मिन्देहेतुमुक्तिदा।प्राप्तेदे
हांतरेचान्येअहंनोद्येजनार्दन॥३॥संन्यस्तानिमयान्यानिसंन्यस्तंविषयादिकं।एकमेवनसंन्यस्तमुदकंविश्वजीवनं॥४॥
एवमुक्त्वाजलंभूमावुत्सृज्यप्रार्थयेत।सर्वावस्थासुदेवेशमरणेचविशेषतः।लोकांतरेन्यदेहेषुनतिर्यक्कुदेवयोनिषु॥५॥वा
सुदेवेभगवतिभावोभवतुमेसदा॥मारतिःसुतदारेषुमादेहेषुचबंधुषु॥६॥हृदिस्थंचरणध्यानंसदाभवतुकेशव।त्वंप्रभुंस
र्वदेवानांत्वंगतिर्गतिमिच्छतां॥७॥त्वंशरण्यःशरण्यानांत्वंप्रभुःसर्वदेहिनां।आर्तानांमार्गमाणानांकालधर्ममुपेयुषां॥८॥अ
नन्यशरणानांचत्राताभवतुकेशव।तत्त्वमस्यादिवाक्यैश्चवेदांतैर्यन्निगद्यते॥९॥स्वरूपंवासुदेवाख्यंसोहमस्मिपरात्परः।
त्वमस्यदेवदेवेशनध्यातोसिमयाप्रभो॥१०॥सदालङ्घितनंदेवभूतानांभुविदुर्लभं।प्रतिज्ञायातवेशस्यविष्णोःस्मरणकर्म
णा॥११॥अंतकालेकृतामेघसफलासास्तुकेशव।एवंस्तुत्वातुसंप्रार्थ्यदंडवत्प्रणमेत्ततः॥१२॥ततःपरिपूर्णतांप्रार्थयेत्॥ ना
अद्यपूर्वो॰तिथौअनाशनग्रहणविधेयंन्यूनमतिरिक्तंतत्सर्वंश्रीविष्णोःप्रसादात्परिपूर्णमस्तु।अनेनानाशनग्रहणेनश्रीप ८
रमात्मानारायणःप्रीयतां॥इत्यनाशनग्रहणविधिः॥अथासन्नमरणकृत्यं।तत्रादावासन्नमरणावस्थामारभ्यदेहांतःस्मा

न्त्रोग्निमतोविधिरुच्यते।स्वयंहोमासमर्थेनयजमानेनऋत्विगादिनाहोमेक्रियमाणेसमीपेगमनं।समीपगमनासमर्थेनश
यनीयादुत्थायतत्रैवभूमावुपवेशनं।शुक्लपक्षेसायंहोमानंतरंयजमानोमुमूर्षुश्चेत्तदाप्रातर्होमस्तदानीमेवकार्यः।
इदंप्रातराहुतिहोममात्रविधानंशुक्लपक्षेएव।कृष्णपक्षेतुसायंहोमानंतरंयजमानस्यमरणाशंकायांतद्दिनमारभ्यामा
वास्यापर्यंतंयावत्योऽवशिष्टारात्रयस्युस्तासांसायंप्रातराहुतीःप्रतिसंख्यायसायंकालएवतंत्रेणसायंप्रातर्होमोकृत्वापिंड
पितृयज्ञंविनाअमावास्यासंबंधिपद्धादिस्थालीपाकःकार्यः।यद्यमावास्यापर्यंतंजीवतितदावैश्वदेवपूर्वकःकेवलःपिंड
पितृयज्ञःकार्योनत्वत्याशनं।शुक्लपक्षेतुउक्तत्वात्प्रातर्होममात्रंनान्येऽवशिष्टाहोमाः।नपौर्णमासीयस्थालीपाकः।दिवामरणे
सायमाहुतिश्चनाऽभयत्रकर्मणोनारंभात्।ततसंभावितसन्निकृष्टमरणंज्ञात्वामृदागोमयेन[illegible]गोमूत्रेणतीर्थोदकेनकुशो
दकेनचस्नापयित्वाशुद्धवाससीपरिधाप्यगोमयोपलिप्तायांभूमौदक्षिणाग्रान्दर्भानास्तीर्यबहुलांस्तिलान्विकीर्यतत्रदक्षि
णाशिरसंभूमौनिवेशयेत्।तत्रपार्श्वेघृतदीपःकार्यः।शालग्रामतुलस्यादिसान्निध्यंसर्वंकार्यं।विष्णुपूजनं।पूर्वमकृतंचेदत्र
वैतरण्यादिदानं।बंधौकलत्रेमित्रेक्षेत्रधान्यधनपुत्रादिषुचसर्वत्रममत्वनिवृत्तिःकार्या।उच्चैःपुरुषसूक्तादिकंपुत्रादिःश्राव
येत्।श्रीविष्णोःस्मरणं।ततोगतासुंज्ञात्वापुत्रादेःस्नानं।ततोऽपसव्यंकृत्वामृतशरीरस्यघृतेनाभ्यंजनं।सशिरस्कस्यस्नापनं।पू
र्वधृतवस्त्रद्वयस्यत्यागः।पुनरक्षतवस्त्रद्वयंपरिधाप्यउपवीतद्वयंचपरिधापयेत्।ततश्चंदनेनसर्वांगेषुप्रोक्षणं।पुष्पैरलंक

आचमनंतूष्णींप्राणायामः।पिंडद्रव्यप्रोक्षणं।अपसव्यं।दक्षिणाग्रं।दर्भानास्तीर्यअवनेजनं।मृतस्थानेशवएषतेपिंड१ प्र०। द्वारेपांथ ए०२
प्र०चत्वरेखेचर ए०३प्र०विश्रामेभूत ए०४प्र०चितास्थानेसाधक ए०५प्र०प्रेतहस्तेप्रेत ए०६प्र०

९ [?]णं।ततोमृतस्यमुखमध्येसुवर्णच्छिद्रेषुहिरण्यशकलानिप्रक्षिप्यवस्त्रेणपिधायनिर्हरणंकार्यं।अत्रदुर्मरणाशंकायांत
न्निमित्तंप्रायश्चित्तंकृत्वानिर्हरणंकार्यं।ततोमृतस्यस्थानेएकोद्दिष्टविधिनाश्राद्धं।तत्रसर्वममंत्रकं।ब्राह्मणाभावेएकंदर्भचटुं
निधायसर्वंकुर्यात्।उत्क्रांतिश्राद्धनिमित्तंएतत्तेपाद्यमित्यादिनापादप्रक्षालनं।तूष्णींप्राणायामः।अपसव्येनपिंडद्रव्यस्यप्रो
9 क्षणं।श्राद्धोपहाराःपूताभवंतु।देशकालपाकपात्रद्रव्यश्रद्धासंपत्।अत्राद्यमासेपक्षेतिथौ।अपसव्येनैवअमुकगोत्रस्या
मुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंदाहादियोग्यताप्राप्त्यर्थंउत्क्रांतिस्थलेएकोद्दिष्टविधिनाश्राद्धमहंकरिष्ये।स्वयमेवप्रतिवचनं।
आसनदानं।अमुकगोत्रायामुकप्रेतायदत्तंआसनं।आवाहनार्घोर्ध्वनपात्रालंभावगाहनानामभावः।आचमनं।आमा
न्नसंकल्पः।दास्यमानंआमान्नंसघृतंअमुकगोत्रामुकप्रेतएतत्तेउपतिष्ठतां।ततःपिंडदानं।तत्रअवनेजनरेखाप्रत्यवनेजनगंधा
द्यर्चनानामभावः।भूमौपिंडदानं।अमुकगोत्रामुकशवएषतेपिंडः।आचमनं।आशीःप्रार्थनास्वधावाचनायांनिषेकानामभ
भावः।दक्षिणादानमपसव्येन।कृतैतत्प्रेतैकोद्दिष्टसांगतासिद्ध्यर्थंदक्षिणांदास्यमानांअमुकगोत्रामुकप्रेततेउपतिष्ठतां।माषान्न
सहितंदास्यमानंजलकुंभंअमुकगोत्रामुकप्रेततेउपतिष्ठतां।पिंडचालनं।नस्वस्तिवाचनं।अस्योत्क्रांतिश्राद्धस्यविधेर्यन्न्यूनम
तिरिक्तंतद्द्विजोःप्रसादात्परिपूर्णं।चटुविसर्गः।ततोद्वारदेशेएवमेवएकोद्दिष्टविधिनाश्राद्धं।तत्रअद्येत्यादिअमुकगोत्रस्यामुक ९
प्रेतस्यप्रेतत्वनिवृत्त्यर्थंदाहादियोग्यताजननार्थंश्मशानंनीयमानस्यद्वारदेशेएकोद्दिष्टविधिनाश्राद्धमहंकरिष्ये।अन्यत्सर्वंपूर्व

वत्।अमुकगोत्रामुकपांथ एष ते पिंडः। दक्षिणाकालेमाषान्नसहितजलकुंभदानं। ततो मन्मयस्थाल्यामग्निं कृत्वा यष्टित्र
यं शकटाकारेण बद्ध्वा तस्याधस्तात्तमग्निं स्थालीं रज्ज्वादिना बध्वा मृतं करादिषु यथास्थानं चारं निधाय स्कंधेनाग्निपुरःसरं स्था
मात्दक्षिणस्यां दिशि श्मशानं प्रति नयेयुः। स्मार्तकर्मसाधनभूतानि पात्राणि आज्यं तिलान्दर्भांश्च पिंडदानद्रव्यं च गृहीत्वास्य पिं
डाय मे गाथां गायमाना अनुगच्छंति। ततश्चत्वरे पूर्ववदेकोद्दिष्टविधिना श्राद्धं। तत्र अद्येत्यादि अमुकस्यामुकप्रेतस्य प्रेतत्वविमुक्त्य
र्थं दाहादियोग्यताप्राप्त्यर्थं श्मशानं नीयमानस्य चत्वरदेशे श्राद्धमहं करिष्ये। अमुकगोत्रामुक खेचर एष ते पिंडः समाषान्नज
लकुंभसंकल्पः। ततोऽर्द्धमार्गे विश्रमणस्थाने श्राद्धं। अद्येत्यादि अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थं दाहादियोग्यताज
ननार्थं दाहार्थं नीयमानस्यार्द्धमार्गे विश्रमणस्थाने एकोद्दिष्टविधिना श्राद्धम०। अमुकगोत्रामुक भूत एष ते पिंडः समाषान्नकुंभ
दानं। ततः श्मशानसन्निधौ भूमौ शनैः शवस्य दक्षिणाशिरसः स्थापनं। ततश्चितास्थाने एकोद्दिष्टश्राद्धं। अमुकगोत्रस्यामुकप्रेतस्य
प्रेतत्वविमुक्त्यर्थं दाहयोग्यताप्राप्तये चितास्थाने एकोद्दिष्टविधिना श्राद्धमहं क०। अमुकगोत्रामुक साधक एष ते पिंडः समाषा
न्नकुंभदानं। ततः सर्वाणि तीर्थानि मनसा ध्यात्वा शवस्य स्नापनं। अथ पुत्रादिः स्नात्वा शुद्धे दक्षिणाप्रवणे भूप्रदेशे कृतापसव्यो दक्षि
णाभिमुखः सकृत्सकृत्संमार्जनादिभूसंस्कारान्विधाय तत्राग्नेः स्थापनं। ततो दक्षिणाय[illegible]तां अश्रुद्धाहतैः काष्ठैश्चितां कृत्वा तत्रो
त्तानं दक्षिणाशिरस्कं शवं निदध्यात्। प्रेतसंबंधिवस्त्रं द्वेधा कृत्वा एकेन खंडेन प्रेतशरीरमाच्छाद्य खंडांतरं भूमौ श्मशानवासार्थं नि

१० रस्येत्यातत प्रेतस्यदक्षिणकरे प्रेतनाम्नापिंडदानं। अमुकगोत्रामुकप्रेतएषतेपिंडः। समाप्यान्नकुंभसंकल्पः। सर्वत्रप्रथमेकोदिष्ट
वत्सर्वेपिंडाःसहदग्धव्या इतिदेशाचारः। पिंडानामप्सुप्रक्षेप इतिशिष्टाः। अथस्मार्त्तपात्राणांप्रतिपत्तिः। आज्यपूर्णांस्रुचंदक्षिण
ग्रांमुखेन्यसेत्। नासिकयोःस्रुवमाज्यपूर्णंदक्षिणाग्रंपादयोःप्रागग्रामधरारणिं उत्तरारणिंप्रागग्रामुरसिसव्येपार्श्वेदक्षिण
ग्रंशूर्पंदक्षिणपार्श्वेदक्षिणाग्रेचमसंऊर्वोर्मध्येअधोमुखेलूखलमुसलेतत्रैवचत्रांअवेलीचान्यानिसर्वाणिदर्व्यादीनितत्रै
वाचत्रोविलीकर्णालेग्नंलोहकीलकपट्टिकादिब्राह्मणायदेयमप्सुवाप्रक्षेप्यां इदंपूर्वोक्तंवक्ष्यमाणंचयत्कर्मतत्सर्वमपसव्येनका
र्यं ततोदक्षिणाभिमुखोभूत्वासव्यंजान्वाच्यदक्षिणस्यांप्रेतशिरोभागेअग्निंमंत्रेणदद्यात्। अस्मात्वमधिजातोसित्वदयंजाय
तांपुनः। असौस्वर्गायलोकायस्वाहाइति। असावित्यत्रअमुकनामइतिनामोक्त्वा। अनेनमंत्रेणाग्नेरादीपनमितिनारायणः। ए
तदंतःस्मार्त्ताग्निमतोदाहविधिः। दाहोत्तरकालीनस्यविधेःश्रौतस्मार्त्ताग्निमतोरविशेषेणएकत्वात्। श्रौताग्निमतोदाहविधिक
थनानंतरमुत्तरंविधिंवक्ष्यामः। अथश्रौताग्निदाहविधिः॥ शुक्लपक्षेसायंहोमानंतरंयजमानस्यमरणाशंकायांतदेवाग्नी
न्विहृत्यप्रातर्होमःकार्यः। तस्मिन्नेवविहारेवातंत्रेणसायंप्रातर्होमोकार्यौ। अत्रहोमद्रव्याहरणानंतरंतस्योन्नयनात्प्राग्यज
मानस्यमरणेगार्हपत्येहोमद्रव्यंप्रक्षिप्यदहेत्। उन्नयनादूर्ध्वंप्राग्घोमादाहवनीयेदाहः। एवंकृतेयदिप्रातःकालपर्यंतंजीवतित
दानपुनःप्रातर्होमःकृतत्वात्। इदंप्रातर्होममात्रविधानंशुक्लपक्षएव। अन्येऽवशिष्टोहोमानपौर्णमासेष्टिः। कृष्णपक्षेतु १०

रात्रौ मृतिशंका चेत्प्रातराहुतिं पृथग्घुत्वा तद्दिनमारभ्य अमावास्यापर्यंतानां सायंप्रातर्होमानां तंत्रेणानुष्ठानं कुर्यात्॥ ततः
पिंडपितृयज्ञवर्जितामावास्येष्टिं कुर्यात्॥ अत्र होमकर्मणि दृष्टो चानुष्ठीयमानकर्मणि अशक्त्या पत्नीयजमानकर्तृककर्म
र्मलोपे पि न दोषः॥ सकलेष्ट्यसंभवे आज्यं संस्कृत्य चतुर्गृहीतेन पुरोनुवाक्यायाज्याभ्यां प्रधानदेवतानां यागमात्रं कुर्या
त्॥ तस्याप्यसंभवे प्रतिदैवतं पूर्णाहुतिं जुहुयात्॥ आज्यं संस्कृत्य चतुर्गृहीतेन होमः॥ अग्नये स्वाहा॥ विष्णवे स्वाहा॥ इन्द्राग्निभ्यां
स्वाहा॥ इन्द्राय स्वाहेति सान्नाय्ययाजिनः॥ स्मार्ताग्नावप्येवं समासहोमं पूर्वकं पक्षादिकर्म कार्यं॥ अत्रापि सकलकर्मासंभ
वे प्रधानदेवताया आज्याहुतिः॥ एवं कृते यद्यमावास्यापर्यंतं जीवति तदा नव प्रतिदिनं सायंप्रातर्होमाः॥ अमावास्यायामपरा
ह्णे केवलं दक्षिणाग्निमुद्धृत्य पिंडपितृयज्ञः कार्यः॥ नाग्न्यन्वाधानं॥ न व्रत्याशनं तस्य यागांगत्वात्॥ नामावास्येष्टिः कृतत्वात्॥
सकलेष्टौ क्रियमाणायां हविर्ग्रहणानंतरं प्रागासादनान्मरणे हविषां गार्हपत्ये प्रक्षेपः॥ आसादनादूर्ध्वं प्राग्घोमान्मर
णे आहवनीये दाहो हविषां॥ असमाप्ते कर्मणि मृते तदंतमेव कर्म भवति॥ ततो दुर्बलावस्थं यजमानं सन्निकृष्टमरणं ज्ञात्वा
गोमयोपलिप्तायां दर्भाद्यास्तृतायां वेदौ दक्षिणाशिरसं निवेशयेत्॥ सर्वमन्यदुक्तवत्॥ ततो गतासुं ज्ञात्वा पुत्रादेः स्नानं अ
पसव्यं कृत्वा मृतस्य घृताभ्यंगपूर्वकं स्नापनं॥ अहतवस्त्रस्याधरोत्तरीयस्य परिधापनं॥ उपवीतस्य च॥ चंदनेन सर्वांगप्र
लेपनं॥ पुष्पैरलंकरणं॥ नात्र हिरण्यशकलप्रक्षेपः॥ ततः पुत्रा[illegible]दिः कृतापसव्य आहवनीयदक्षिणाग्न्योः सकृत्सकृत्

११ रिसमूहनादिसंस्कारान्कृत्वागार्हपत्यात्तद्योरुद्धरणं।ततोगार्हपत्याहवनीयदक्षिणाग्नीनांमन्त्रमयस्थालीषुग्रहणं।सर्वं
कर्मापसव्येनदक्षिणामुखेनचकर्त्तव्यं।सभ्यावसथ्यावपिप्रत्येकंद्वावेववनेयौ।सर्वासुस्थालीषुअसंकरार्थंनामलेखनादिना
चिह्नकरणं।ततोमरणस्थानेश्राद्धमुक्तवत्।द्वारदेशेच।ततःशवकटेस्थालीस्थपंचाग्निसहितंवस्त्राच्छादितंमृतंस्थापयित्वा
सर्वाणिपात्राणिवृषदाज्यदर्भास्तिलान्घृतंहिरण्यशकलानिएतान्यादायसपिंडादक्षिणस्यांदिशिशवकटेननयंति।पिंडदा
नार्थंयवपिष्टोनुनेयः।यमगाथांनाकेसुपर्णमित्यादिपठंतोनुगच्छेयुः।ततश्चत्वरेविश्रामस्थानेचपूर्ववच्छ्राद्धद्वयं।ततःश्म
शानेगत्वाशवकटात्भूमौशनैःशवस्यस्थापनं।ततःशुद्धायांदक्षिणाप्रवणायांभूमौचितास्थानेपूर्ववच्छ्राद्धं।ततःआयतंपु
रुषतिवद्धितानस्साधनं।सर्वेप्राचीनावीतिदक्षिणामुखःकुर्यात्।गार्हपत्यस्यपुरस्ताद्दृष्टसुप्रक्रमेष्वाहवनीयस्थानं।वितृतीये
दक्षिणस्यांदक्षिणाग्नेः।एवंस्थानानिकृत्वागार्हपत्याहवनीययोर्मध्येदक्षिणायताकाष्ठैश्चिताकर्त्तव्या।ततःपुत्रादिःकृताप
सव्योदक्षिणाभिमुखउपविश्यगार्हपत्यादीनांस्थानेषुसकृत्सकृत्परिसमूहनादिपंचभूसंस्कारान्कुर्यात्।ततोयथास्थान
मग्नीनांस्थापनं।सभ्यावसथ्ययोःपार्श्वेस्थापनं।नसप्तसुप्रक्रमेषु।ततस्तस्यां।चितौदक्षिणाशिरसंप्रेतंनिदध्यात्।प्रेतसंबं
धिवस्त्रंद्विधाकृत्वाखंडैकेनप्रेतशरीरमाच्छाद्यखंडांतरंश्मशानवास्यर्थंभूमौप्रक्षिपेत्।ततःप्रेतस्यदक्षिणकरेप्रेतनाम्नेवपिं ११
डदानं।समाप्याकुंभसंकल्पः।ततःपूर्वस्थापितपात्राणांपूर्वोक्तप्रकारेणपिप्रतिपत्तिंकृत्वाश्रौतपात्राणांप्रतिपत्तिंकुर्यात्।सर्वाणि

चपात्राणिउक्तानानियानिसरवातानितानिपृषदाज्यवंतिवक्ष्यमाणप्रकारेणप्रेतशरीरेनिदध्यात्।दधिमिश्रघृतंपृषदा
ज्यंपात्रन्यासोयथा।शिरसिकपालानि।इडापात्रीपृषदाज्ययुक्तादक्षिणाग्रांशिरस्येव।ललाटेप्राशित्रहरणंपृषदाज्ययुक्तं
दक्षिणाग्रं।अग्निहोत्रहोमसंबंधिस्रुवोदक्षिणोनासायांपृषदाज्ययुक्तोदक्षिणाग्रः।एवमेवेष्टिसंबंधिस्रुवोवामनासायां।
एतौस्रुकस्रुवौकर्णयोर्न्यस्तव्याविति।निदानो।हिरण्यशकलान्यस्मिन्नवसरेमुख्येषुसप्तछिद्रेषुप्रक्षेप्तव्यानिसूत्रकाराभि
प्रायात्।ग्रहेहिरण्यशकलप्रक्षेपःस्यान्नाग्निमत्परः।हिरण्यशकलप्रक्षेपक्रमोयथा।मुखेप्रथमं।ततोदक्षिणनासापुटे।त
तःसव्ये।ततोदक्षिणेचक्षुषि।ततोवामे।ततोदक्षिणकर्णे।ततोवामे।एवंहिरण्यशकलानिप्रक्षिप्यअग्निहोत्रहवणीतिरश्चीपृष
दाज्ययुक्ताप्रागग्रामुखे।दक्षिणेपाणौजुहूःपृषदाज्ययुक्तादक्षिणाग्रा।तथैवसव्येपाणावुपभृत्।ध्रुवांपृषदाज्ययुक्तांदक्षिणा
ग्रांहृदये।पृषदाज्ययुक्तेपुरोडाशपात्र्यौदक्षिणाग्रेउदरेउपस्थेकृष्णाजिनं।सक्थ्नीअंतरेशम्यादृषदुपले।यद्द्रव्यमुकप्र
देशेस्थापनीयमितिनोक्तंतदपिसक्थ्न्यंतरेस्थापनीयं।तानिचसर्वाणिसमुदायेनदक्षिणाग्राणिन्यस्तव्यानि।यथा।अरणि
द्वयंचत्रोविलीकप्रणीताग्निहोत्रपदनश्रुतावदानांतर्द्धानकरपूर्णपात्रषडवत्तकूर्चयोक्त्राणीति।अत्रापियानिसरवांतानि
तेषुपृषदाज्यप्रक्षेपः।दक्षिणकटिसन्निकृष्टजघनप्रदेशेउलूखलंऊर्द्ध्वमुखःपृषदाज्ययुक्तःस्थाप्यः।तत्रैवोर्द्ध्वभागेमुसलंद
क्षिणाग्रं।पादयोःशूर्पं।अस्मिन्नवसरेसक्थ्न्यंतरेसम्यावसथ्योस्थाप्यो।बोधायनः।सर्वेभ्योऽग्निभ्यउलपराजीस्तृणुयुर्यथा।

१२ स्मिन्नग्नयःसमवेष्यंतीति।अस्य मा भूदकारोपि।अथसर्वग्रहणंकिमर्थमिति।अग्निभ्यइतिबहुवचनसामर्थ्यात्सिद्धमिदंय
थासर्वेभ्यइतिउच्यते।सर्वग्रहणंक्रियतेग्रह्यस्याप्यग्नेरुपयोगइति।अथकिंस्थापनंतस्येति।उच्यते।यज्ञानाहंस्यामइति।
तदनंतरंबहुलकुशतृणश्रेणिरूपांउपलपराजींस्तृणुयुर्यथायजमानस्यदेहेगार्हपत्यादयोऽग्नयआगच्छंति।एवमुक्तप्रकारेण
दत्तेषुयज्ञपात्रेषुब्रह्मातदभावेपुत्रादिरन्योवाप्राचीनावीतीसन्कोकेसुपर्णमित्यस्यामृचिआयामृत्र्ययामंइतिस्तोमोप ना४
तंत्रिःपठेत्।तस्यायमर्थःत्रिष्टुप्पूर्वेनवरुणयमाः।दत्तेषुयज्ञपात्रेषुगानेविनियोगः।ततआहवनीयादीनालभ्यमंत्रंपठेत्।दत्ता
सुदुःकरंकर्मजानतावाप्यजानता।मृत्युकालवशंप्राप्यनरंपंचत्वमागतं।धर्माधर्मसमायुक्तंलोभमोहसमावृतं।दहेयंसर्वगा
त्राणिदिव्यान्लोकान्सगच्छतु।ततश्चंदनाक्षतैरग्नीनांपूजनं।तत्रमंत्रः।त्वंभूतकृज्जगद्योनेत्वंलोकपरिपालकः।उक्तःसंहारक
स्तस्मादेनंस्वर्गमृतंनयइति।ततोगार्हपत्येआज्यस्थालींनिरुप्यमाज्यमधिश्रित्यखादिरंस्रुवमग्निहोत्रहवणींचसंमृज्यआ
ज्यमुद्वास्यपवित्राभ्यामुत्पूयचेत्खादिरेणस्रुवेणहवण्यांसकृदाज्यंगृहीत्वाकुशोपग्रहोदक्षिणामुखःप्राचीनावीतीसव्यं
जान्वाच्यदक्षिणाग्नौप्रेतस्यमुखेसमिधंप्रक्षिप्यआहुतिंजुहोति।अस्मात्त्वमधिजातोसित्वदयंजायतांपुनः।असौस्वर्गायलोकाय
स्वाहाइतिमंत्रेण।इदमग्नयेनमम।असावित्यत्रप्रथमांतंप्रेतस्यनामग्राह्यं।ततःस्फ्यंदक्षिणहस्तेसादयेद्दक्षिणाग्नौ।पृषदाज्य १२
युक्तांमुखेएवाग्निहोत्रहवणींप्रागग्रांतिरश्चींन्यसेत्।वामनासायांदक्षिणायांस्रुवः।पृषदाज्ययुक्तः।एतौपूर्वंन्यस्तावादाय

12

होमानंतरंतत्रन्यस्तव्यो।ततोगाढतरंरोदनं।ततोधूमउदितेत्वेषस्तेधूमऋण्वंतु।इतित्रिःपठेत्।तस्ययमोऽनुष्टुबग्निःधूमउदिते
विनियोगः।प्रज्वलितेऽग्नावग्नेमृडमहांअसीत्येतयोरन्यतरत्त्रिःपठेत्।तस्ययमोगायत्र्यग्निः।प्रज्वलितेऽग्नौविनियोगः।तत
ोदाहेजातेकिंचित्परिशोषणीयं।ततःसप्तसमिधोगृहीत्वापुत्रादयःसव्यप्रदक्षिणाःकुर्युः।प्रतिप्रदक्षिणमेकैकसमित्प्रक्षेपंचिता
ग्नौकुर्युः।ततःकुमारेणोल्मुकस्योपरिसव्यप्रहारदानं।ततःक्रव्यादायनमस्तुभ्यमित्युक्त्वाऽप्रदक्षिणंचितांमुक्त्वापश्चात्तोनावलो
कयंतोरीतीभूताःकनिष्ठपूर्वायमसूक्तंजपंतःस्नानार्थंनद्यादौगच्छंति।।इतिसद्योदाहस्यश्रौताग्निमतोदाहविधिः।।स्त्रियाअप्यनेने
वविधिनादाहःकार्यः।तत्रकेवलस्मार्ताग्निमतःपत्नीदाहेअस्मात्वमधिजातोऽसीत्यग्निप्रदानमंत्रोनप्रयोज्यः।श्रौताग्निमतःस्त्रीदा
हेअसावित्यत्रानूहवतामंत्रेणाज्याहुतिहोमइतिकर्कोपाध्यायाः।व्यवस्थिताप्रव्यवस्थितायाद्दाहविधौविशेषजातंसर्वमग्रेवदिष्यते।
अथोदकदानं।पुत्रादयःसर्वेकनिष्ठपुरःसरानद्यादावागत्यपरिहितंवस्त्रंप्रक्षाल्यतदेवपरिधायपुत्रादयःसपिंडाःसमानोदका
श्चदक्षपूर्वाउदकंप्रविश्यएकवस्त्राअशिखाःप्राचीनावीतिनःसव्यपाणेरनामिकयानद्यादिस्थंजलमपनोदयत्रअपनःशोशुचदघमि
तात्रि३ त्येतावतामंत्रेणअपसार्यदक्षिणामुखाःसकृन्निमज्जंतियुगपदंगोद्धूननमकुर्वंतः।ततःप्रेतायदाहोपशांत्यर्थंउदकंदद्युः।तत्रेत्थं।तीरेआ
गत्याचम्याशिखांबद्ध्वादक्षिणाग्रान्कुशान्हस्तयोःकृत्वासतिलमुदकंपाणिभ्यामादायदक्षिणाभिमुखावाग्यताःपितृतीर्थे
नभूमौएकैकमंजलिंत्रीस्त्रीन्दशदशवादद्युः।अमुकगोत्रामुकप्रेतैतत्तेसतिलतोयांजलिरुपतिष्ठतामिति।अमुकगोत्रामुकप्रेत

१२ स्तृप्यतुइतिवा।अमुकगोत्रंअमुकप्रेतंतर्पयामीतिवायथास्वगृह्यप्रयोगः।छंदोगैस्तुप्रथमांतपदप्रयोगेणतर्पणंकर्त्तव्यं।अग्निस्तृ
प्यतिलेत्यादितथाप्रयोगदर्शनात्।ततोदंतधावनंविधायस्नात्वाआचम्यवस्त्रांतराणिपरिधायस्नानवस्त्राणिसकृदेवनिःपीड्यउ
दकदेशान्निःसृत्यशुचौदेशेमृदुतृणवतिसर्वेउपविशंति।इत्युदकदानं।ततस्तत्रोपविष्टानामन्येसुहृदःपुराणेतिहासकथाभिःशो
कापनोदंकुर्युः।माशोकंकुरुतानित्येसर्वस्मिन्प्राणधर्मिणि।धर्मंकुरुतयत्नेनयोवःसहगमिष्यति।मानुष्येकदलीस्तंभेनिःसारेसार
मार्गणं।यःकरोतिससंमूढोजलबुद्बुदसन्निभे।गंत्रीवसुमतीनाशमुदधिर्दैवतानिच।फेनप्रख्यःकथंनाशंमर्त्यलोकोनयास्यति।
पंचधासंभृतःकायोयदिपंचत्वमागतः।कर्मभिःस्वशरीरोत्थैस्तत्रकापरिदेवना।सर्वेक्षयांतानिचयाःपतनांताःसमुच्छ्रयाः।संयो
13 गाविप्रयोगांतामरणांतंहिजीवितं।श्लेष्माश्रुबांधवैर्मुक्तंप्रेतोभुंक्तेयतोवशः।अतोनरोदितव्यंहिक्रियाःकार्याःप्रयत्नतः।इतिशोका
पनोदकानिवाक्यानि।ततोब्राह्मणैरनुज्ञातास्ततउत्थायपश्चादनवलोकयंतोधोमुखाःकनिष्ठानग्रेकृत्वापंक्तीभूताएवग्रामंप्रत्या
यांति।दिवामृतेऽस्तमयादूर्ध्वंग्रामंप्रविशंति।रात्रौमृतेसूर्योदयानंतरं।अथवाब्राह्मणैरनुज्ञातास्तदानीमेवप्रविशंति।ततोगृहद्वारस
मीपेआगत्यसर्वेत्रीणित्रीणिनिंबपत्राणिदंतैर्विदश्याचम्य।शमीपापंशमयतुइतिशमीमालभंते।अश्मेवस्थिरोभूयासमित्यश्मानं।
अग्निर्नःशर्मयच्छतुइत्यग्निं।तूष्णीमुदकं।गोमयंगोरसर्षपांस्तैलंदूर्वाप्रवालान्वृषभंचयथाक्रमंतूष्णीमालभ्यततःपादेनपाषाण १२
माक्रम्यगृहंप्रविशंति।इतिप्रवेशः।एवमुक्तविधिनादुर्बलंस्नापयेदिलेत्यादिप्रवेशांतःसर्वोपिनिरग्नेरपिदाहेभवति।नतत्रपात्रा

णाभावात्। तत्र क्रमः। दुर्बलावस्थस्य स्नापनं। दक्षिणाशिरसस्य निवेशनं। मरणानंतरं घृतेनाभ्यंजनं। पुनः स्नापनं। वस्त्रद्वयस्य
परिधापनं। उपवीतस्य च। चंदनेन प्रोक्षणं। पुष्पैरलंकरणं। सप्तसु छिद्रेषु हिरण्यशकलप्रक्षेपः। उत्क्रांतिश्राद्धं। द्वारदेशे चालोकि
काग्निपुरःसरं निर्हरणं। ततश्चत्वरे पिंडदानं। विश्रामे च। ततश्चितास्थाने पिंडदानं। सकृत्स्पृष्टसंमार्जनादि कृत्वा चिताकार्या। तत्र द
क्षिणाशिरस्य निधानं। तस्य हस्ते पिंडदानं। अस्मात्त्वमिति मंत्रं विना शिरोभागे वह्नेरादीपनं। कृत्वा सुदुष्करं कर्मेत्यादि मंत्रद्वयस्य पाठः।
समानमन्यत्। इति निरग्नेर्दाहे विशेषः। अथ दाहोत्तरं प्रथमदिनकृत्यं। तत्र प्रथमदिवसादारभ्य सपिंडीकरणं यावत्सर्वं प्रेतकृत्य
मजुस्मैः कार्यं। तत्र नद्यादौ गलस्नानात् कृते आर्द्रवाससी परिधाय पिंडदानं कुर्यात्। दक्षिणामुखः कृतापसव्यस्तूष्णीं प्राणाना
यम्य मनसैव विष्णुमंत्रस्मरणेन जलमभिमंत्र्य तेनोदकेन पिंडद्रव्यसंप्रोक्ष्य पिंडद्रव्योपहाराणां च पवित्रता। देशकालौ पाकपात्रद्र
व्यश्रद्धासंपत्। अत्राद्यमासे पक्षे तिथौ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं क्षुत्तृष्णानिवृत्त्यर्थं शिरोवयवनिःपत्त्यर्थं पि
ंडदानमहं करिष्ये इति संकल्पं कृत्वा दक्षिणायतां कर्षूं कृत्वा तत्र समूलदक्षिणाग्रदर्भस्तरणं। पात्रे जलमादाय अमुकगोत्रामुक
प्रेत अवनेनिक्ष्व। ततस्तिलघृतक्षीरमधुशर्करामिश्रं पिंडमादाय प्रथमदिवसे अमुकगोत्रस्यामुकप्रेतस्य शिरोवयवनिःपत्त्यर्थं
अमुकगोत्र अमुकप्रेत एष ते पिंडः। इति ऋजुहस्तेन पिंडं दद्यात्। ततः पिंडपात्रक्षालनजलेन प्रत्यवनेजनं। अमुकगोत्र अमुक
प्रेत अवनेनिक्ष्व। ततः पिंडोपरि सूत्रप्रक्षेपः। अमुकगोत्रामुकप्रेत अयं ते वासः उपतिष्ठतां। अमुकगोत्रामुकप्रेत गंधोयं ते

ते क

१४ उपतिष्ठतां। अमुकगोत्रामुकप्रेत इदं पुष्पमुपतिष्ठतां। पुष्पं तु भृंगराजपत्रं तुलस्यादि। अमुकगोत्रामुकप्रेत धूपोयं ते उपतिष्ठ
तां। अमुकगोत्रामुकप्रेत दीपोयं ते उपतिष्ठतां। अमुकगोत्रामुकप्रेत इदं शीतमुदकं ते उपतिष्ठतां। अमुकगोत्रामुकप्रेत इदं
नैवेद्यं ते उप०। समाचारात् अर्घोयं ते उप०। अमुकगोत्रस्यामुकप्रेतस्य क्षुधानिवृत्यर्थं तस्य मानं आमान्नं ते उप०। अनेनामा
न्नदानेन अमुकगोत्रस्यामुकप्रेतस्य क्षुधानिवृत्तिः। ततोंजलिदानं तत्र पिंडसमीपे पाषाणे परिकार्यः। पिंडसमीपे पाषाणं सं
स्थाप्य अमुकगोत्रस्यामुकप्रेतस्य तृष्णानिवृत्यर्थं सतिलतोयांजलिदानमहं करिष्ये। इति संकल्पं कृत्वा दक्षिणाभिमुखो भूत्वा
14 सजलकुशान् हस्ते कृत्वा सतिलतोयांजलिं दद्यात्। अमुकगोत्रममुकप्रेतं तर्पयामि। अमुकगोत्रामुकप्रेत एष ते सतिलतोयांज
लिरुपतिष्ठतां इति वा। अमुकगोत्रामुकप्रेत तृप्यतु इति वा यथास्वाचारं कर्तव्यं। एवं दशाहांतमहरहरेकैकमंजलिं वर्द्धयेत्। ए
वं पंचपंचाशदंजलयो भवंति। द्वयोत्र स्वधा वा दद्यात्। प्रत्यहं त्रयं त्रयं वा दद्यात्। प्रत्यहं दश दश वा दद्यात्। प्रत्यहमेकमेव वा।
प्रत्यहं प्रथमदिनादारभ्य तर्पणांते अनादिनिधनो देवशंखचक्रगदाधरः। अक्षय्यः पुंडरीकाक्ष प्रेतमोक्षप्रदो भव इति पठनीयं।
ततः पृष्ठा। अद्य पूर्वोच्चरित एवं ग्रहगुणविशेषणविशिष्टायां तिथौ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्यर्थं क्षुत्तृष्णानिवृत्य ह
र्थं पिंडदानतर्पणकृतस्य विधेः सर्वं परिपूर्णं। अनेन पिंडदानतर्पणकृतेन अमुकगोत्रस्यामुकप्रेतस्य क्षुत्तृष्णानिवृत्तिपूर्वकशि १४
रोवयवनिःपत्तिः। द्वितीयदिवसे करिष्यमाणकर्मयोग्यतावाप्तिः। ततस्तं पिंडमप्सु प्रक्षिप्य पाषाणं क्वचिदेकांते सन्यस्य स्नात्वा

वाससी परिधाय गृहमागच्छेत्। पिंडदानानंतरं प्रत्यहं स्नानं कार्यं। तत्तद्दिने स्वगृहान्नेन पाको न विधेयः। क्रीतं सुहृद्भिर्लब्धं वाश्नीयुः। गोत्रजानां तद्दिने तद्गृह एव भोजनं। कर्त्ता भोजनकाले पात्रस्थं किंचित्सघृतमन्नमादाय अमुकगोत्रायामुकप्रेताय इदमन्नमुपतिष्ठतु इत्युक्त्वा गृहोपरि प्रक्षिपेत्। भोजनपात्रसमीपे वा दद्यात्। एवं दशाहं वा दद्यात्। दशदिनानि भोजनस्थानविपर्यासो न कार्यः। हविष्यान्नमेव भुंजीरन्। लेखनहास्यहर्षोच्छ्वासनोत्सवस्त्रादिधारणतैलाभ्यंगस्त्रीसंगखट्वाशयनान्यस्पर्शनादीनि वर्जयेयुः। रात्रौ पृथक्केवलतृणास्तृतभूमौ शयीरन्। महागुरुनिपाते त्र्यहमेकाहं वोपवासः। बालवृद्धातुराणां नैते नियमाः।
ततः सायंकाले त्रिकाष्ठिकायां शिक्यादौ वा एकस्मिन्नपक्वे मृन्मये पात्रे उदकं। द्वितीये क्षीरं कृत्वा आकाशे स्थाप्यं। तत्र प्रयोगः। अपसव्यं कृत्वा दक्षिणाभिमुख उपविश्य देशं कालं च संकीर्त्य अमुकगोत्रस्यामुकप्रेतस्य सर्वतापोपशांत्यर्थं अध्वश्रमापनयनार्थं मृन्मये पात्रे क्षीरोदकदानमहं करिष्ये इति संकल्प्य अमुकगोत्रामुकप्रेतात्र शीतोदके स्नाहि। अमुकगोत्रामुकप्रेतात्र क्षीरं पिब। अनेनाकाशे मृन्मये पात्रे क्षीरोदकनिधानेन अमुकगोत्रस्यामुकप्रेतस्य सर्वतापोपशांतिः। एवमेवाहं त्र्यहं वा दशाहं वा कार्यं॥ इति प्रथमदिनकृत्यं॥ अथास्थिसंचयनं॥ तच्च संवर्त्तेन तु प्रथमतृतीयसप्तमनवमादिषु दिवसेषूक्तं। कर्मप्रदीपे कात्यायनेन तु द्वितीये तृतीये वा दिवसे कार्यमित्युक्तं। कात्यायनसूत्रे तु दशाहदिवसाच्चतुर्थ्यां तिथावुक्तं। स्वस्वसूत्रानुसारेण सर्वैः कार्यं। छंदोगैस्तु द्वितीये तृतीये वा दिवसे कार्यं। तत्र सामग्री। गोदुग्धं। गोघृतं च। तिलाः। एका शमीशाखा। द्वितीया पलाशशाखा। कर्पूरागरुचंदनक

मृत्तिकाकेसरमितिसुगंधद्रव्याणि।मृत्पात्रसंपुटं।सूत्रं।पिंडदानार्थद्रव्यं पिष्टादिमधुशर्कराच।एतान्यादाय दाहभूमिंगत्वा तत्रती
र्थोदेएकवस्त्राः प्राचीनावीतिनोदक्षिणामुखाः पुत्राद्यः स्नानंकुर्युः।अनंतरंभूमौपाषाणेवा प्रथमदिवसवत्त्रपेणंकुर्युः।तस्त्नं त
रंस्नानं।आचमनं।दाहदेशसमीपेगत्वाउपविश्यकृतापसव्योदेशकालादिसंकीर्त्यअमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थं
दाहतापोपशांत्यर्थंअस्थिसंचयनमहंकरिष्यइतिसंकल्प्यगोदुग्धेनसर्वाण्यस्थीनिसिंचेत्।ततःशमीपलाशशाखाभ्यांभस्मनः
सकाशादुद्धृत्यएकत्रचयंकृत्वागव्येनाज्येनाभ्यज्यपूर्वोक्तसुगंधवारिणासिंचेत्।ततस्तान्यस्थीन्यस्थीनिमृत्पात्रसंपुटेकृत्वातत्सं
पुटंसूत्रेणपरिवेष्ट्यशुचौदेशेश्वभ्रंखात्वादक्षिणामुखस्तस्मिन्गर्तेतत्संपुटंन्यसेत्।ततःसेवालसंयुक्तंकर्दमपिंडंसंपुटोपरिदत्वा
सुमृदागर्त्तंपूरयेत्।ततोऽस्थिसमूहंभस्मसमूहंचतीर्थेप्रक्षिप्यदाहभूमेःसंमार्जनादिकृत्वातत्रास्थिसंचयनांगपिंडदानंकुर्यात्।
तूष्णींप्राणायामः।पिंडद्रव्यस्यप्रोक्षणं।अद्येत्यादिअमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थंअस्थिसंचयननिमित्तंपिंडदानम
हंकरिष्येइतिसंकल्प्यसमूलंदक्षिणाग्रंकुशमास्तीर्यअमुकगोत्रामुकप्रेतअवनेनिक्ष्वेत्यवनेज्यअमुकगोत्रामुकप्रेतएषतेपिंडं
इतिपिंडंदत्वाप्रत्यवनेजनंपूर्ववत्।ततःसूत्रचंदनभृंगराजतुलस्यादीनांपिंडोपरिप्रक्षेपः।धूपदीपनैवेद्यादिदत्वाआमान्नसंक
ल्पः।पुनर्दक्षा।अद्यपूर्वोच्चरितएवं०तिथौअमुकगोत्रस्यामुकप्रेतत्वविमुक्त्यर्थंअस्थिसंचयनांगपिंडदानकृतस्यविधेःपरि १५
पूर्णं।अनेनास्थिसंचयनांगपिंडदानेनअमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्तिःअग्र्यकर्मयोग्यताप्राप्तिः।ततःपिंडस्याप्सुप्र

क्षेपः। संचयनानंतरं यद्वस्तु जीवतोयदिष्टं अन्नवस्त्राभरणादि तत्सर्वं प्रेतस्योपकाराय ब्राह्मणेभ्यो देयं। अद्येत्यादि इदं वस्त्राभ
रणान्नादि दीयमानं दास्यमानं वा अमुकगोत्रामुकप्रेत ते उपतिष्ठतां। अमुकगोत्रस्यामुकप्रेतस्य तत्तद्दानजन्यफलावाप्तिः॥ इ
त्यस्थिसंचयनं॥ अथ द्वितीयदिनकृत्यं। पूर्वदिनकृत्यदेशं गत्वा पूर्ववत्स्नानाद्यमंत्रकं विधाय पिंडद्रव्यप्रोक्षणांते अद्येत्यादि सं
मुच्चार्य अमुकगोत्रस्यामुकप्रेतस्य चक्षुःश्रोत्रनासावयवनिःपत्तये पिंडदानमहं करिष्ये। दर्भस्तरणाद्युक्तवत्। अवनेजनं। पिंड
दाने द्वितीयदिननिमित्तं अमुकगोत्रस्यामुकप्रेतस्य चक्षुःश्रोत्रनासावयवनिःपत्तये अमुकगोत्रामुकप्रेत एष ते पिंडः। प्रत्यवनेज
नादि सर्वं प्राग्वत्। ततस्तर्पणं। प्रागुक्तयद्वाणामन्यतमपद्धेणांजलिदानमुक्तवत्। तत्रांजलित्रयं द्वयं दश वा एको वा दद्यात्। पृष्ठायां।
अद्यपूर्वोच्चरितएवं॰तिथौ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थं क्षुत्तृष्णानिवृत्त्यर्थं पिंडदानतर्पणकृतस्य विधेः सर्वं परिपूर्णं।
अनेन पिंडदानतर्पणकृतेन अमुकगोत्रस्यामुकप्रेतस्य क्षुत्तृष्णानिवृत्तिपूर्वक चक्षुःश्रोत्रनासावयवनिःपत्तिः तृतीयदिनकर्मयोग्य
तावाप्तिः। समानमन्यत्प्राग्वत्॥ इति द्वितीयदिनकृत्यं॥ अथ तृतीयदिनकृत्यं। तत्र संकल्पे विशेषः। तिथ्यंतमुच्चार्य अमुकगोत्रस्यामु
कप्रेतस्य प्रेतत्वविमुक्त्यर्थं तृतीयदिननिमित्तं ग्रीवामुखभुजवक्षसां निःपत्त्यर्थं पिंडदानमहं करिष्ये। अवनेजनादि। पिंडदाने अमुक
गोत्रस्यामुकप्रेतस्य तृतीयदिननिमित्तं ग्रीवामुखभुजवक्षसां निःपत्त्ये अमुकगोत्रामुकप्रेत एष ते पिंडः। प्रत्यवनेजनाद्युक्तवत्।
अंजलयः पंच त्रयः दश वा। पुनः पृष्ठा। अद्यपूर्वो॰तिथौ अमुकगोत्रस्यामुकप्रेतस्य क्षुत्तृष्णानिवृत्तिपूर्वक ग्रीवामुखभुजवक्षसां

१६ निःपत्तिः।चतुर्थदिनकर्मयोग्यताप्राप्तिः।अन्यत्सर्वंप्राग्वत्॥इतितृतीयदिनकृत्यं॥अथचतुर्थदिनकृत्यं।चतुर्थदिननिमित्तंनाभिलिं
गगुदावयवनिःपत्त्यर्थंपिंडदानमहंकरिष्ये।इतिसंकल्प्य।अमुकगोत्रस्यामुकप्रेतस्यनाभिलिंगगुदावयवानांनिःपत्त्येअमुकगोत्रा
मुकप्रेतएषतेपिंडइतिपिंडदानं।अंजलयःसप्तत्रयश्चत्वारोवादशवा।अन्यत्पूर्ववत्॥इतिचतुर्थदिनकृत्यं॥अथपंचमदिनकृत्यं।पं
चमदिननिमित्तंऊरुजानुजंघाद्यवयवनिःपत्त्यर्थंपिंडदानमहंकरिष्ये।अमुकगोत्रस्यामुकप्रेतस्यऊरुजानुजंघाद्यवयवनिःपत्त्य
16 र्थंअमुकगोत्रामुकप्रेतएषतेपिंडः।अंजलयोनव।त्रयःपंच।दशवा॥इतिपंचमदिनकृत्यं॥अथषष्ठदिनकृत्यं॥षष्ठदिननिमित्तंगु
ल्फपादांगुलिमर्माद्यवयवनिःपत्त्यर्थंपिंडदानमहंकरिष्ये।अमुकगोत्रस्यामुकप्रेतस्यगुल्फपादांगुलिमर्माद्यवयवनिःपत्त्यर्थंअमु
कगोत्रामुकप्रेतएषतेपिंडः।अंजलयएकादश।त्रयःषड्दशवा॥इतिषष्ठदिनकृत्यं॥अथसप्तमदिनकृत्यं॥सप्तमदिनेनिमित्तंअ
स्या स्थिमज्जाशिराद्यवयवनिःपत्त्यर्थंपिंडदानमहंकरिष्ये।अमुकगोत्रमुकप्रेतस्यअस्थिमज्जाशिराद्यवयवनिःपत्त्यर्थंअमुकगो
त्रामुकप्रेतएषतेपिंडः।अंजलयस्त्रयोदश।त्रयःसप्त।दशवा॥इतिसप्तमदिनकृत्यं।अथाष्टमदिनकृत्यम्।अष्टमदिननिमित्तं
नखलोमाद्यवयवनिःपत्त्येपिंडदानमहं०अमुकगोत्रस्यामुकप्रेतस्यनखलोमाद्यवयवनिःपत्त्यर्थंअमुकगोत्रामुकप्रेतएष
तेपिंडः।अंजलयःपंचदश।त्रयःअष्टोवादशवा॥इत्यष्टमदिनकृत्यं॥अथनवमदिन।कृत्यं॥नवमदिननिमित्तंमर्मवीर्यादिसर्वा १६
वयवसंपत्त्येपिंडदानमहं०अमुकगोत्रस्यामुकप्रेतस्यमर्मवीर्यादिसर्वावयवसंपत्त्येअमुकगोत्रामुकप्रेतएषतेपिंडः।अंजल

यः सप्तदश। नव। त्रयः। दश वा॥ इति नवमदिनकृत्यं॥ अथ दशमदिनकृत्यं॥ पूर्वदिनस्य शेषगत्वा स्नानादि विधाय। अद्येत्यादिति
थौ अमुकगोत्रस्यामुकप्रेतस्य क्षुत्पिपासानिवृत्त्यर्थं पिंडदानमहं करिष्ये। अमुकगोत्रस्यामुकप्रेतस्य क्षुत्पिपासानिवृत्त्यर्थं अमुक
गोत्रामुकप्रेत एष ते पिंडः। अंजलयः एकोविंशति। त्रयः। दश वा॥ पिंडानामप्सु प्रक्षेपः सर्वत्र। दशाहिकाः पिंडा एकेन कर्त्रा एकस्मिन्
देशे एकेनैव द्रव्येण देयाः। तर्पणं चैकस्यामेव शिलायां। ततः पिंडदानानंतरं सूतकनिवृत्त्यर्थं सर्वे सपिंडाः केशश्मश्रुवपनं कारयेयुः।
नखलोमकृंतनं चाद्यं च मृदत्यवयसां संबंधेनापि कनिष्ठानां भवति। ततः प्रेतसंबंधिकर्मकालपरिहितवस्त्रत्यागः। तिलकल्केन गौ
रसर्षपकल्केन तैलसंयुते शिरःस्नानं च कृत्वा अहतवासोयुगमन्यत्परिधाय गांस्वर्णं दूर्वादीनि मंगलद्रव्याणि स्पृष्ट्वा शुद्धिं संकीर्त्त
यित्वा शुद्धा भवंति। गृहेपि सर्वाणि वस्त्राणि गुप्तदोरकादीनि चद्दालनीयानि। मृन्मयानां भांडानां सूतकिसंस्पृष्टानां परित्यागः। गृ
हस्य संमार्जनमुपलेपनं कार्यं। तत आबालं सर्वे स्नांति। एवं कृते शुद्धिर्भवति नान्यथा। ततः शन्नोदेवीरित्यादिनृग्भिर्भावोष्याचरि
ष्टवर्गेण शांत्युदकमानिमंत्र्य तेनोदकेन गृहस्य आबालं सर्वेषां प्रोक्षणं। ब्राह्मणानां पूजनं। ततस्ते अप्रतिरथाद्यरिष्टवर्गादिशां
तिं पठेयुः। ततः सुवासिन्यो भ्यंगपूर्वकं स्नातास्तदानीमेवोदकमाहृत्य तेनोदकेन भोजनार्थं पाकं कुर्युः। दशमध्ये दर्शपाते दशदि
न एव सर्वं दशाहसंबंधिपिंडोदकदानं सर्वं समापनीयं। पित्रोर्मरणे पित्रिरात्रादूर्ध्वं दशाहिकं कर्म सर्वं समापनीयं। न त्रिरात्राद
र्वाग्दर्शपाते। अन्येषां मातापितृव्यतिरिक्तानां प्रथमदिनप्रभृति दर्शे सर्वं समापनीयमेव॥ इति दशमदिनकृत्यं॥ अथैकादशा ह

१७ दहत्यं॥ तत्र श्रौतस्मार्ताग्निमतोर्विशेषेण दाहादेकादशेऽह्नि एकाहश्राद्धसंबंधि सर्वं भवति। श्रौतस्मार्ताग्निरहितस्य मरणदि
नादेकादशेऽह्नि एकादशाहिकं कर्म कार्यमिति विवेकः पुत्रादिः कर्त्ता साग्निश्चेत्तेन लौकिकेऽग्नौ वृषोत्सर्गं गृहोमादिकं सर्वं मि
न्यत्वेन कार्यं कर्त्तव्यं। नं स्वपरिगृहीतस्मार्ताग्नौ। तीर्थादौ गत्वा स्नात्वा संध्यावंदनादि विधाय स्वस्य अशुद्धदैहिकाधिकारसि
६४ द्ध्ये प्रायश्चित्तमादौ कार्यं। तद्यथा। चतुस्त्रीनेकं वाध्यात्मविदं पर्षत्त्वेनोपवेश्य पर्षदं प्रदक्षिणीकृत्य साष्टांगं प्रणमेत्। ततो
गोवृषयोः प्रत्येकं प्रत्याम्नायत्वेन द्रव्यमादाय प्रायश्चित्तग्रहणार्थमिदं गोमिथुननिष्क्रयद्रव्यं सभ्येभ्यो अहं संप्रददे न मम इत्युक्त्वा
गोत्र६ पर्षदग्रे निधाय वदेत्। अमुकस्य अमुकप्रेतस्यौर्ध्वदैहिकक्रियाकरणयोग्यतासिद्ध्ये प्रायश्चित्तमुपदिशंतु भवंतः इत्युक्त्वा
प्रार्थयेत्। आब्रह्मस्तंबपर्यंतं भवद्भिः स्थमिदं जगत्। यक्षरक्षःपिशाचादि सदेवासुरमानुषं॥१॥ सर्वे धर्मविवेक्तारो गोप्तारः स
कला द्विजाः॥ मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः॥२॥ प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ। पूज्यैः कृतपवित्रोऽहं भवेयं
17 द्विजसत्तमैः॥३॥ ततः सभ्यास्तस्य द्रव्यादि शक्तिं विचार्य मुख्यपक्षेण प्रत्याम्नायद्वारा वा कथयेयुः। ततोऽनुवादको नेनैता
वत्प्रायश्चित्तेनाचीर्णेन तवाधिकारो भविष्यतीति वदेत्। तन्निवेदितं प्रायश्चित्तमंगीकृत्य प्रायश्चित्तसंकल्पं कुर्यात्। देश
कालौ संकीर्त्य अमुकशर्मणो मम अमुकगोत्रस्यामुकप्रेतस्यौर्ध्वदैहिककरणयोग्यताजननार्थं प्रायश्चित्तं अमुकप्रत्या १७
म्नायेन प्राच्योदीच्यंगसहितं यथाशक्ति करिष्ये इति संकल्प्य कृत्वा दशस्नानानि कुर्यात्। भस्मगोमयमृद्वारिपंचगव्यकुश।

दकैरितिक्रमः।स्नानविधिमंत्राश्च पूर्वोक्ता एवात्र ज्ञेयाः।तदनंतरं विष्णोः पूजनं।अद्येत्यादितिथौ अमुकशर्मणो मम अमुक
गोत्रस्यामुकप्रेतस्योर्ध्वदैहिककरणयोग्यताजननार्थं विष्णोः पूजनमहं करिष्ये इति संकल्प्य ताम्रपात्रे शुद्धोदकमापूर्य तत्र
गंधादीनि क्षिप्य गायत्र्यादिमंत्रैस्तज्जलमभिमंत्र्य तेन जलेन पूजासामग्रीं संप्रोक्ष्य प्रार्थयेत्।विष्णुपूजोपहाराणां पवित्रतास्तु।
ततः समाचारात् श्वेतवस्त्रमास्तीर्य तदुपरि तंडुलैरष्टदलं कृत्वा कर्णिकायां यथाविधिना कलशं संस्थाप्य तस्मिन्कलशे विष्णु
मावाहयेत्।इदं विष्णुरिति सामपठित्वा विष्णो इहावाहितो भव।इत्यावाह्य पूर्वाद्यष्टपत्रेषु प्रतिपत्रं तंडुलपुंजान्विधाय तेषु पुंजे
षु प्रागादि रुक्मिण्याद्यष्टशक्तीनामावाहनं कुर्यात्।रुक्मिणीं आवाहयामि।सत्यभामां०जांबुवतीं०नाग्निजितीं०कालिंदीं०मि
त्रविंदां०लक्ष्मणां०चारुहासिनीं आवाहयामि इति सर्वत्र।एवमावाह्य प्रतिष्ठां कुर्यात्।अक्षतानादाय वाक्कामनः।एता एवास
महाव्रता इति प्रतिष्ठामंत्रौ पठित्वा अस्मिन्पीठे रुक्मिण्याद्यष्टशक्तिसहितः सत्येशः सुप्रतिष्ठितो वरदो भवतु इत्युक्त्वा अक्षता
न्क्षिपेत्।तत इदं विष्णुरिति मंत्रेण षोडशोपचारैः पूजनं।मंत्रं पठित्वा विष्णवे इदमासनं समर्पयामि।एवं पाद्यं समर्पयामि।अ
र्घ्यं।आचमनीयं।स्नानं।पुनराचमनीयं।वस्त्रं।पुनराचमनीयं।उपवीतं।चंदनं।पुष्पाणि।ततोऽष्टशक्तीनां पूजनं।रुक्मिण्यै न
मः।सत्यभामायै०जांबुवत्यै०नाग्निजित्यै०कालिंद्यै०मित्रविंदायै०लक्ष्मणायै०चारुहासिन्यै०ततो धूपं।दीपं।नैवेद्यमुपक
ल्प्य मंत्रांते अष्टशक्तिसहिताय सत्येशाय विष्णवे इदं नैवेद्यं समर्पयामि।नैवेद्यांते आचमनं स०प्रदक्षिणा।इदामे इति सा

१८ मपठित्वाऽयंस्तुतिः।नमस्कारः।अद्यपूर्वोच्चरितएवंग्रहगुणविशेषणविशिष्टायांतिथौयथाशक्त्याविष्णोःपूजनकृतस्यवि
धेःसर्वंपरिपूर्णमस्तु।ततःप्रायश्चित्तांगवैश्वदेवश्राद्धसिद्ध्येयथासंपन्नेनान्नेनत्रीन्ब्राह्मणान्भोजनेनाहंतर्पयिष्ये।आमा
न्नानिवादास्ये।इतिसंकल्पंकृत्वा।प्रायश्चित्तांगत्वेनविहितहोमसिद्ध्येहोमद्रव्यंआज्यमग्निदैवतंकस्मैचिदित्यादितन्निष्क्र
यद्रव्यंवादास्येसंप्रददेइतिवातदानींदानपक्षे।एवंपूर्वांगानिकृत्वातदानीमेवसंकल्पानुसारेणप्रायश्चित्तंस्यात्।असंभ
वेसंकल्पमात्रंकृत्वाकालांतरेकुर्यात्।ततउत्तरांगानिकुर्यात्।होमद्रव्यसंकल्पः।गोदानस्यचाज्यमुखावलोकनमाज्यपात्रेत
तोजपाच्छिद्रंतपश्छिद्रंयच्छिद्रंयज्ञकर्मणि।सर्वंभवतुमेऽच्छिद्रंयस्यचेच्छंतिवैद्विजाइतिविप्रान्संप्रार्थयेत्।सर्वमच्छिद्रमस्तुइतिद्विजा
नांप्रत्युक्तिः।अद्यपूर्वोच्चरितएवं०तिथौममऊर्ध्वदैहिकक्रियाकरणयोग्यताजननार्थंकृतस्यप्रायश्चित्तविधेःसर्वंपरिपूर्णम
18 स्तु।।इतिप्रायश्चित्तं।।अथविष्णुतर्पणं।।तत्रादौविष्णुतर्पणांगंवैश्वदेवंश्राद्धं।आसनेप्राङ्मुखंब्राह्मणमुपवेश्यअसंभवेदर्भंच
दूर्वांनिधाययवहस्तः।अक्रोधनैः०देवकार्ये०दैवेक्षणः०।विष्णोरेतत्तेपाद्यं।इत्यादि।आचमनं।भूर्भुवःस्वःसमा०आचमनं।प्राणा
यामः।गायत्रींगायत्रंचपठित्वा।प्रसादंकृत्वावैश्वदेवंश्राद्धंकारयध्वं०।अग्निष्वात्ता०।सप्तव्याधा०।देवताभ्यः०।अपवित्रः०।दश
गायत्री०एतोन्विंद्रं०पृथिव्या०।भवतांप्रसादात्।वैश्वदेवश्राद्धोपहारा०।देशकाल०।अत्राद्यमासेपक्षेतिथौ।अपसव्यं।अमुक १८
गोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंविष्णुतर्पणांगंवैश्वदेवंश्राद्धंसांकल्पविधिनासद्यः।अहंकरिष्येइतिसंकल्प्यगंधाद्यर्चै

नंभगवतेविश्वेस्वाहा।अत्रगंधाः०।इदंवोज्योतिः।अस्यवैश्वदेवश्राद्धस्यार्चनविधेः०।आचमनं।भोजनसंकल्पः।दास्यमानं
तृप्तिपर्यंतंभोजनंभगवतेविश्वेस्वाहा।सुसंप्रोक्षितं०।दीर्घमायुःशांतिस्थानेअपसव्यंकृत्वा।अमुकगोत्रस्यामुकप्रेतस्य
प्रेतत्वविमुक्तिपूर्वकपुण्यलोकप्राप्तिः।सव्यं।अस्यवैश्वदेवश्राद्धसांगतासिध्यर्थंदास्यमानांदक्षिणांमुखवासंचभगवते
विश्वेस्वाहा।अद्यपूर्वोच्चा०तिथौ।विष्णुतर्पणांगवैश्वदेवश्राद्धकृतस्यविधेःसर्वंपरिपूर्णं।अनेनवैश्वदेवश्राद्धेनअपसव्यं
अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्तिः।विष्णुतर्पणाख्यकर्मयोग्यतावाप्तिः।।इतिवैश्वदेवश्राद्धं।।अथविष्णुतर्पणं।।आच
मनं।प्राणायामः।दशगायत्री।एतोन्विंद्रं।पृथिव्याअधिसानवि।भवतांप्रसादात्विष्णुतर्पणीयोपहाराणांपवित्रता।देशका
ल०अद्येत्यादितिथौअपसव्यंअमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्योत्तमलोकप्राप्त्यर्थंसव्यंविष्णुसंहितयाअन्यैर्वै
ष्णवैश्चसामभिःपुराणोक्तश्लोकैःसव्यंविष्णुतर्पणमहंकरिष्ये।एवंसंकल्पंविधायविष्णुरूपंप्रेतंस्मरन्दक्षिणाभिमुखोभू
त्वातर्पणंसमाचरात्तत्शंखोदकेनकुर्यात्।इदामेकृत्यादिविष्णुसंहितासाम।१।संहितासमाप्तौ।अनादिनिधनोदेवशंखचक्र
गदाधरः।अक्षयःपुंडरीकाक्षप्रेतमोक्षप्रदोभव।१।अतसीपुष्पसंकाशंपीतवाससमच्युतं।येनमस्यंतिगोविंदंनतेषांविंद
रा तिभयं।२।कृष्णकृष्णकृपालोत्वमगतीनांगतिर्भव।संसारार्णवमग्नानांप्रसीदपरमेश्वर।३।श्लोकत्रयेणतर्पणंतेसामानि।
अहोयित्वामिद्धिहवामहा३ऊएइतिश्चहसाम।आ३मित्वाशूरनोनुमोवा३इतिरथंतरं।तवाहं३सो।तवा।तवा३इतिद्वे।सोमःपवते

१९ जनितामा३ताथिनारसूइत्यादिनिचत्वारि।हाउहोहायि।अंतरिक्षं०सुवर्दिवंइत्यादीनिएकादशसामानिरहस्ये।इदंविष्णु
अहोहायि।इतिवारवंतीयं।किमित्राते वा३यि।स्तोपरिवा३इतिगोरीवितं।अहोयि।किमित्तेविष्णोपरिचा३ए।इतिरहस्ये।साम।इदंवि
ष्णुर्विचक्रमइत्याद्याःषड्‌ऋचः।श्लोकाः।पूर्वोक्ताश्चाएवमेनिर्मंत्रैस्तर्पणंकृत्वासुसंप्रोक्षितमित्यादिपूर्ववत्।अत्रसमाचारा
द्गोदानसंकल्पः।कृतस्यविष्णुतर्पणसांगतासिध्यर्थंगांतत्प्रतिनिधिभूतंद्रव्यंवाविष्णुप्रीतयेकस्मैचिद्ब्राह्मणायाहंदास्ये।
19 तेनश्रीविष्णुःप्रीयतां।अद्यपूर्व०तिथौअपसव्यंअमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थंविष्णुतर्पणंकृतस्यविधेःसर्वंप
रिपूर्णं।अनेनविष्णुतर्पणेनकृतेनअमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्तिः।विष्णुलोकप्राप्तिः।उत्तरकर्मयोग्यताप्राप्तिः।ततः
सव्येनाचमनं।।इतिविष्णुतर्पणं।।अतःपरमेकादशविष्णुगणश्राद्धंब्रह्मादिपंचदेवताश्राद्धमिदानींतनाःकुर्वंति।अतस्तेषामा
चारानुरोधात्तान्युच्यंते।।अथैकादशविष्णुगणश्राद्धं।।तच्चैकोद्दिष्टविधिनाकुर्वंति।तस्माद्वैश्वदेवं।आवाहनाग्नौकरणे
नस्तः।दिवकलाद्यवैस्तिलार्थाः।यज्ञोपवीतिनाऋजुदर्भैःसर्वंकार्यं।विष्णुगणानांतःपातित्वात्प्रेतावर्जनपिंडदानान्नसंकल्पादौ
नापसव्यमितिबहवः।इदंप्रेतोपकारायविष्णूद्देशेनक्रियमाणश्राद्धंज्ञेयं।विष्णुरूपप्रेतोद्देशेनवाश्राद्धेक्रियमाणेप्रेतमात्रो
द्देशेपक्षेचअपसव्येनवाकार्यमितिभट्टानामभिप्रायः।अस्मद्देशीयास्तुसव्येनाचरंति।अथप्रयोगः।एकादशब्राह्मणान्प्रा १९
ङ्मुखानुदक्संस्थानुदगग्रासनेषूपवेश्यश्राद्धारंभःकार्यः।द्विजाभावेएकादशदर्भचटून्।आचमनं।अक्रोधनैः०देवकार्य०

देवेक्षणः क्रियतां। विश्वो एतत्ते पाद्यं इत्यादि। एवं शिव एतत्ते पाद्यं। यम एतत्ते पाद्यं। सोमराज एतत्ते पाद्यं। हव्यवाहन एतत्ते०
कव्यवाहन एतत्ते० काल एतत्ते० रुद्र एतत्ते० पुरुष एतत्ते० प्रेत एतत्ते०। विश्वो एतत्ते०। आचमनं। भूर्भुवः स्वः स्वमाध्वं। समास्म
हे। एवं सर्वत्र। आचमनं। प्राणायामः। प्रसादं कृत्वा एकादशविष्णुगणश्राद्धं कारयध्वं। अग्निष्वात्ता० रक्षोभूत०। आब्रह्म मे०
अपवित्र० पात्रे जलपूरणं। दश गायत्री। एतो न्विन्द्रं० पृथिव्या अधिसानवि। भवतां प्रसादात् एकादश विष्णुगणश्राद्धोपहारा
णां पवित्रतास्तु। देश० अद्येत्यादि तिथौ। अपसव्यं अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्योत्तमलोकप्राप्त्यर्थं विश्वादि
विष्णुपर्यन्तानामेकादशवैष्णवश्राद्धानि एकोद्दिष्टविधिना तंत्रेणाहं करिष्ये। इति संकल्प्य आसनदानं कुर्यात्। विश्वेद
मासनं स्वाहा। हस्तप्रक्षालनं दत्वा उपयम्य हस्त०। एवं शिवाय इदमासनं स्वाहा। हस्त०। यमाय इदं० हस्त०। सोमराजाय०। हव्यवाह
नाय० कव्यवाहनाय० कालाय० रुद्राय० पुरुषाय० प्रेताय० विश्ववे०। ततोऽर्घपात्राण्येकादश उदगग्राणि सन्यस्य प्रतिपात्रे
द्वे द्वे पवित्रे दैवत्वात् प्रेतपात्रे च सन्यस्य प्रतिपात्रं शन्नो देवीरित्यपो निषिच्य यवोसीयवया इति मंत्रेण प्रतिपात्रं यवान्प्र
क्षिप्य चंदनपुष्पे प्रक्षिपेत्। अर्घपात्राणामर्चनविधेः परिपूर्णं स्वाहार्घ्या भवन्तु। अस्तु स्वाहा। विश्ववे नम इदं पुष्पं यादि
व्या० सुहवा भवन्तु। विश्वो एतत्ते अर्घ्यं स्वाहा। एवं सर्वत्र। शिवाय नम इदं पुष्पं। यादिव्या० शिव एतत्ते अर्घ्यं स्वाहा। यमाय न
म इदं पुष्पं। यादिव्या० यम एतत्ते०। सोमराजाय नम इदं० यादि० सोमराज एतत्ते० हव्यवाहनाय इदं० यादि० हव्यवाहन एतत्ते०।

नम

२० कव्यवाहनायनमइदंपुष्पं।यादि०कव्यवाहनएतत्ते०कालायनमइदंपुष्पं।यादि०कालएतत्ते०रुद्रायनमइदं०यादि०रुद्रएत
त्ते०पुरुषायनमइदं०यादि०पुरुषएतत्ते०प्रेतायेदंपुष्पं।यादि०प्रेतएतत्ते०विष्वक्सेनायनमइदं०यादि०विष्वक्सेनएतत्ते०।ततःपवित्रा
णिस्वस्वार्घपात्रेकृत्वातानिपात्राण्यन्यत्रस्थापनीयानि।ततश्चन्दनादिभिःपूजांकृत्वार्चनसंकल्पः।यथादत्तंगंधाद्यर्च
नंविष्णुशिवयमसोमराजहव्यवाहनकव्यवाहनकालरुद्रपुरुषप्रेतविष्वक्सेनेभ्योयथायथाविभागंवःस्वाहा।अत्रगंधपुष्पं०।
इदंवोज्योतिः।सुज्योतिः।दीपज्योतिः०।अस्यविष्णुगणश्राद्धस्यार्चनविधेःप०।आचमनं।ततःप्रत्येकंपात्रेन्नंपरिविष्यसंकल्पं
कुर्यात्।सत्यैं०पृथ्वीतेपात्रं०इदंविष्णु०इदमन्नादियदत्तंयच्चदास्यामितत्सर्वंतृप्तिपर्यंतंभोजनंभगवतेविष्वक्सेनस्वाहा।इदं
विष्वक्सेनममा।एवंशिवाययमाय०सोमराजाय०हव्यवाहनाय०कव्यवाहनाय०कालाय०रुद्राय०पुरुषाय०प्रेताय०विष्वक्से
नस्वाहा।एवमन्नसंकल्पंकृत्वापिंडदानं।नात्रविकिरः।प्रागग्रानेकादशस्थानेषुप्रागग्रसंस्थानुदकसंस्थान्वादर्भानास्तीर्यपात्रे
जलमादायावनेजनंकुर्यात्।विष्वक्सेनावनेनेनिक्ष्व।शिवअव०यमअव०सोमराजअव०हव्यवाहनअ०कव्यवाहनअ०काल०
रुद्रअ०पुरुषअ०प्रेतअ०विष्वक्सेनअव०ततःपिंडदानं।विष्वक्सेनएषतेपिंडः।शिवए०यमए०सोमराजए०हव्यवाहनएषते०कव्य
वाहनए०कालए०रुद्रए०पुरुषए०प्रेतए०विष्वक्सेनएषतेपिंडः।ततःप्रत्यवनेजनंपूर्ववत्।पिंडानामुपरिसूत्रदानं।गंधस्यापु २०
ष्पाणांचा।धूपदीपो।नैवेद्यं।इदंनैवेद्यंविष्वक्सेनादिभ्योयथायथाविभागंवःस्वाहा।पिंडानामर्चनविधेःपरिपूर्णोस्त्वनेनपिंडदा

नेन अपसव्यं अमुकगोत्रस्यामुकप्रेतत्व विमुक्तिः॥ पुण्यलोकप्राप्तिः॥ सव्यं। आचमनं। सुसंप्रोक्षितादिकृत्वा अपसव्यं कृ
त्वा अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिपूर्वक पुण्यलोकप्राप्ति॥ इत्युक्त्वा जलं पिंडाग्रे क्षिपेत्। सव्यं। विष्णोः दत्तं श्राद्धं चो
पतिष्ठतां॥ शिवस्य दत्तं॰ यमस्य दत्तं॰ सोमस्य दत्तं॰ हव्यवाहनस्य दत्तं॰ कव्यवाहनस्य दत्तं॰ कालस्य दत्तं॰ रुद्रस्य दत्तं॰ पुरुषस्य
दत्तं॰ प्रेतस्य दत्तं॰ विष्णोः दत्तं॰ ततः पवित्राणि पिंडोपरि क्षिप्य पिंडोपरि इति पिंडं जलधारा साम्ना शंखोदकेनाचारात्। सोमद
राज्ञा साम पठित्वा साम्नांते विष्णु पिंडे जलधारां दद्यात्। प्रमित्राय प्राहाउ इति प्रथमेन शिवपिंडे जलं॰ प्रमित्राय प्रोहोवाइ इति द्वि
तीयेन यमपिंडे जलं॰ प्रमित्राय प्रार्यम्णो वाइ इति तृतीयेन सोमराजपिंडे॰ घृतवती इति प्रथमेन हव्यवाहनपिंडे॰ द्वितीयेन कव्य
वाहनपिंडे॰ हाउ आयुष्मत्कृज्योतिः॥ इति साम्ना कालस्य पिंडे॰ हाउ ऐरयत इति रुद्रपिंडे॰ हाउ ऐरयन इति पुरुषपिंडे॰ हाउ
आजा आजा। ३। आयूरायुः। ३। इति प्रेतपिंडे। हाउ हाउ आजा अवा। ३। उद्दुल्यं जा। ३। इति विष्णुपिंडे। ततो दक्षिणासंकल्पः। अ
स्य एकादशविष्णुगणश्राद्धसांगतासिध्यर्थं दास्यमानां दक्षिणां मुखवासं च विष्ण्वादिभ्यो यथायथा विभागं वः स्वाहा। अद्य
पूर्वोच्चरित एवं॰ तिथौ अपसव्यं अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्योत्तमलोकप्राप्त्यर्थं एकादशविष्णुगणश्राद्धकृ
तस्य विधेः सर्वं विष्णोः प्रसादात्परिपूर्णं। अनेन एकादशविष्णुगणश्राद्धेन अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिः। पुण्य
लोकप्राप्तिः॥ सव्यं। अभिरम्यतामिति विसृज्य पिंडानुद्धृत्य स्थलं संशोध्य स्नायात्॥ इति विष्णुगणश्राद्धं॥ अथ बलादि

२१ पंचदेवताश्राद्धानि॥ अत्रापि प्रागुक्ताः सर्वे धर्मा भवंति। आचमनं। प्राणायामः। अद्येत्यादितिथ्यंतमुच्चार्य अपसव्यं अमुक
गोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्योत्तमलोकप्राप्त्यर्थं सव्यं ब्रह्मादिपंचदेवानां श्राद्धमहं करिष्ये। तत्रादौ ब्रह्मादिसूक्तजापका
नां वरणमहं करिष्ये इति संकल्प्य उदङ्मुखान्ब्राह्मणानुपवेश्य स्वयं प्राङ्मुखो वृणुयात्। गोत्रं प्रवरं सामवेदस्य कौथुमीशा
खाध्यायिनं अमुकशर्माणं अस्मिन्श्राद्धकर्मणि ब्रह्मसूक्तजपार्थं त्वामहं वृणे। वृतोस्मि इति प्रतिवचनं। जापक एतत्ते पाद्यं। पा
दावनेजनं। एष अर्घः। इदमत्र चंदनं पुष्पं। एवं विष्णुसूक्तजपार्थं त्वा० रुद्रसूक्तजपार्थं त्वा० यमसूक्तजपार्थं त्वा० तत्पुरुषसूक्त
जपार्थं० एवं तेषां पादप्रक्षालनं विधाय स्वपादौ प्रक्षाल्याचम्य प्राणानायम्य गायत्र्याभिमंत्रितोदकेन पूजोपहारसंप्रोक्ष्य जा
21 पकपूजोपहारद्रव्याणां पवित्रतास्तु देश० अत्राद्यतिथौ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्योत्तमलोकप्राप्त्यर्थं सव्यं
सूक्तजापकानां पूजनमहं करिष्ये इति संकल्प्य पूजां कुर्यात्। वृतेभ्यो ब्राह्मणेभ्यो इमान्यासनानि इत्युक्त्वा आसनानि दद्यात्।
ततश्चंदनादिभिः संपूज्य। यथादत्तं गंधाद्यर्चनं वृतेभ्यो ब्राह्मणेभ्यो हं संप्रददे न मम। अत्र गंधपुष्प० इदं वो ज्योतिः। दीपज्योति०
अस्य वरणश्राद्धस्यार्चनविधेः सर्वं परिपूर्णं। आचमनं। दास्यमानं भोजनं वृतेभ्यो हं संप्रदास्ये। सुसंप्रोक्षितमित्यादि। वरणश्रा
द्धसांगतासिद्ध्यर्थं वृतेभ्यो ब्राह्मणेभ्यो दक्षिणामहं दास्ये। वरणश्राद्धस्य विधेः सर्वं परिपूर्णं। ततो यवपुंजेषु व्रीहिपुंजेषु वा यथा
विधिना पंच कलशान्संस्थाप्य तेषु सर्वौषधिदूर्वापल्लवसप्तमृत्तिकाफलसुवर्णादीनि निक्षिप्य वस्त्रेणावेष्ट्य पूर्णपात्रेण प्र २१

स्येकक्रमेण यवव्रीहितिलमुद्गमाषपूरितेनापिधाय तदुपरि क्रमेण रजतसुवर्णताम्रकांस्यलोहमय्यः प्रतिमाः सन्न्यस्य
तासु क्रमेण ब्रह्मविष्णुरुद्रयमतत्पुरुषान् स्वस्वमंत्रेणावाहयेत्। ब्रह्मा। आ रक्षुह्नु। इति साम पठित्वा ब्रह्माणमावाहयामि।
इदं विष्णुरिति पठित्वा विष्णुमावाहयामि। आ वो राजेति रुद्रं० नाके सुपर्णमिति यमं० सेतुंस्साम्ना तत्पुरुषं० ततः प्रतिष्ठामंत्रं पठि
त्वा कलशस्थ तत्तत्प्रतिमासु ब्रह्मविष्णुरुद्रयमतत्पुरुषाः सुप्रतिष्ठिता भवंतु। ततः पूजा। ब्रह्मजज्ञानमिति ब्रह्माणं पूजयेत्।
९५ इदं विष्णुरिति विष्णुं। आ वो राजेति रुद्रं। नाके सुपर्णमिति यमं। अहमस्मि प्रथमजा ऋतस्येति तत्पुरुषं। एभिर्मंत्रैः सर्वोपचारैः संपू
ज्य आवाहनप्रकरणोक्ततत्तत्साम्ना जपस्तेन तेन कर्तव्यः। अनेन स्वस्वसूक्तजपेन ब्रह्मविष्णुरुद्रयमतत्पुरुषाः प्रीयंतां। ब्रह्मादी
नां पूजनविधेः सर्वं परिपूर्णमस्तु। ततः श्राद्धं। आचमनं। तत्र ब्राह्मणाननुपवेश्य। अक्रोधनैः० देवेन्द्रणः० ब्रह्मन् एतत्ते पाद्यं। एवं
विष्णो एतत्ते पाद्यं। रुद्र एतत्ते० यम एतत्ते० तत्पुरुष एतत्ते० आचमनं। भूर्भुवः० आचमनं। प्राणायामः। प्रसादं कृत्वा श्राद्ध० अग्नि
ष्वात्ता० रक्षोभूत० श्राद्धभूमौ० सप्तव्याधा० देवताभ्यः० अपवित्रः० दशगायत्री। एतो न्विंद्रं० पृथिव्या अधि० नवतां० पंचश्राद्धोपहा
राणां पवि० देशकाल० अद्येत्यादितिथौ अपसव्यं। अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये उत्तमलोकप्राप्त्यर्थं रथोत्सर्गो
त्पूर्वदैहिकसंपादनयोग्यतासिद्ध्यै ब्रह्मादीनां पंचश्राद्धानि एकोद्दिष्टविधिना तंत्रेणाहं करिष्ये। ब्रह्मणे इदमासनं स्वाहा।
हस्त० विष्णवे इदमासनं स्वाहा। हस्त० रुद्राय इद० हस्त० यमाय इद० तत्पुरुषाये इदमासनं स्वाहा। हस्त० नावाहनं। अर्घपा

त्राएणासाद्य पवित्राणितेषु सन्न्यस्य।शन्नोदेवी॰।यवोसि॰।इदमन्नचंदनं॰।अर्घ्यपात्राणामर्चनविधि॰स्वाहा।अर्घ्या॰।ब्रह्मणेनमइदं पुष्पं।यादिव्या॰।ब्रह्मन्‌एतत्ते अर्घ्यं स्वाहा।एवं विष्णोएतत्ते॰रुद्रएतत्ते॰यमएतत्ते॰।तत्पुरुषएतत्ते॰पवित्राणि पात्रेषु निधाय पात्राण्यन्यत्र स्थापयेत्।ततश्चंदनादिनिस्सर्चनं कृत्वा।यथादत्तं गंधाद्यर्चनं ब्रह्मविष्णुरुद्रयमतत्पुरुषेभ्यो यथायथा विभागं वः स्वाहा।अत्र गंध॰इदंवो॰।दीपज्योति॰अस्य श्राद्धस्यार्चनविधे॰।आचमनं।पात्रे अन्नं परिविष्य।सत्ये॰पृथ्वीति॰विष्णोहव्यं॰इदमन्नादि॰।भोजनं ब्रह्मणेस्वाहा।एवं विष्णवे॰रुद्राय॰यमाय॰तत्पुरुषाय॰।न विकिरः।पिंडदानं प्रागग्रेषु कुशेषु।ब्रह्मन्‌ अवनेनिक्ष्व।विष्णो अव॰।रुद्र अव॰यम अव॰तत्पुरुष अव॰।ब्रह्मन्‌एषते पिंडः।विष्णो एष॰रुद्र एष॰यमएष॰तत्पुरुषएष॰।प्रत्यवनेजनं पूर्ववत्।सूत्रदानं।चंदनादि।धूपदीपौ नैवेद्यं।इदं नैवेद्यं ब्रह्मविष्णुरुद्रयमतत्पुरुषेभ्यो यथायथा विभागं वः स्वाहा।पिंडानामर्चनविधिः परिपूर्णः।अनेन पिंडदानेन अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिः।आचमनं।सुसंप्रोक्षितमित्यादि।ब्रह्मणः दत्तं श्राद्धं चोपतिष्ठतां।विष्णोः दत्तं॰रुद्रस्य दत्तं॰यमस्य दत्तं॰तत्पुरुषस्य दत्तं॰पवित्राणि पिंडानामुपरि निधाय शंखोदकेन जलधारा।ब्रह्मा।आरुह्य।इति ब्रह्मणः पिंडे जलधारा।इदामेइति विष्णोः पिंडे॰।आवोराजेति रुद्रस्य पिंडे॰।आस्याम इति यमस्य पिंडे॰।सेतूंस्तरइति तत्पुरुषस्य॰।ततः सूक्तजापकाः स्वस्वकलशस्थं सतिलं जलमादाय अमुकगोत्रायामुकप्रेताय ब्रह्मरूपिणे इदं तिलोदकमुपतिष्ठतां।एवं विष्णुरूपिणे।रुद्ररूपिणे।यमरूपिणे।तत्पुरुषरूपिणे इदं तिलोदकमुपतिष्ठतामिति प्रत्येकं पिंडाग्रे दद्युः।अमीषां पंच 

22

श्राद्धानांकृतप्रतिष्ठासिध्यर्थंदत्स्यमानांदक्षिणामुखवासंचब्रह्मविष्णुरुद्रयमतत्पुरुषेभ्योयथायथाविभागंवःस्वाहा।ततः
कलशस्यदेवनांसुतासोमधुमन्तमा इतिविसर्जनं।ततःकलशानांसंकल्पः।इमंकलशंसजलंसवस्त्रंअमुगोत्रस्यामुकप्रेतस्य
प्रेतत्वविमुक्त्यर्थंब्रह्मसूक्तजापकायाहंसंप्रददेनमम।अनेनकलशदानेनब्रह्मा।प्रीयतां।एवंविष्णुसूक्तजापकाय०अनेन०
विष्णुःप्रीयतां।रुद्रसूक्तजापकाय०रुद्रःप्रीयतां।यमसूक्तजापकाय०यमःप्रीयतां।तत्पुरुषसूक्तजापकायाहं०तत्पुरुषःप्रीयतां।
अद्यतिथौ।अमीषांश्राद्धानांकृतस्यविधेर्यन्न्यूनमतिरिक्तंतत्सर्वंविष्णोःप्रसादात्परिपूर्णं।अनेनपंचश्राद्धेनअपसव्यंअमुक
गोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्तिः।वृषोत्सर्गकर्मयोग्यतावास्तिःसव्यं।अभिरम्यतामितिश्राद्धीयब्राह्मणानांविसर्जनं।पिंडो
द्धरणंभूमिशोधनादिकृत्वाविष्णुंस्मरेत्।।इतिपंचश्राद्धानि।।अथवृषोत्सर्गः।।साग्निनापिवृषोत्सर्गांगहोमोलौकिकाग्नावेवका
र्यः।नात्रब्राह्मणोवरणं।नाचार्यस्य।स्वयमेवसर्वंकुर्यात्।यथोक्तंस्थंडिलंविधायतस्यपश्चिमतःप्राङ्मुखउपविश्यआचम्यप्राणा
नायम्यदेशकालौस्मृत्वाअपसव्यंअमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंएकादशाहादिकर्मयोग्यताप्राप्त्यर्थंसव्यंवृषोत्स
र्गाख्यंकर्माहंकरिष्ये इतिसंकल्प्यस्थंडिलेपंचभूसंस्कारान्कृत्वाअग्निंसंस्थाप्यअग्नौसमिधमाधायइदंभूमेरितिमन्त्रंचकर्मकु
र्यात्।इमंस्तोमेत्यादित्रृग्भिःपरिसमूहनं।ब्रह्मोपवेशनं।अग्नेणाग्निंपरिक्रम्येत्यादिविधिना।आगत्यपात्रासादनं।उदकपात्रचरु
स्थालीकुशोलूखलमुसलकं‿ससहविःशूर्पपवित्रद्वयमेक्षणंबर्हिरिध्मआज्यस्थालीसमिद्द्वयसंमार्गकुशस्रुक्स्रुवौगो।

स्थानं निधाय द्रव्यं दुग्धं च। एतान्यासाद्य गायत्र्याभिमंत्रितोदकेनासाद्यक्रमेण संप्रोक्ष्य सदुग्धां चरुस्थालीमग्नावधिश्रयेत्। ततो
ग्नेः पश्चात्प्रागग्रान् दर्भानास्तीर्य तेषूदूखलमुसलकंसपात्रसहविःशूर्पाणामासादनं। कंसेन निर्वपणं। अग्नये त्वा जुष्टं निर्वपा
मि। पूष्णे त्वा०। इंद्राय त्वा०। ईश्वराय त्वा०। द्विस्तूष्णीं॥ त्रिःकंडनं। त्रिरुत्पवनं। त्रिःफलीकरणं। त्रिःप्रक्षालनं। पवित्रांतर्हितायां स्थाल्यां तंडुलावापः।
त्रिः प्रदक्षिणमेक्षणेनावघट्टनं। ज्वरक्षणेनावज्योतनं। ततः समाचारात् स्थंडिलादीशान्यां स्थंडिलो परि रक्तवस्त्रमास्तीर्य तंडुलैश्चतुरस्रं
हं विधाय तत्र वृषमातृणां स्थापनं। नंदां स्थापयामि। सुमनसां०। सुभद्रां०। सुशीलां०। सुरभीं०। तस्येशान्यां रुद्रकलशं संस्थाप्य तस्मिन्क
लशे रुद्रमावाह्य प्रतिष्ठां कुर्यात्। प्रतिष्ठामंत्रो परि लिखात्। अस्मिन्मंडले नंदाद्या वृषमातरः सरुद्रकलशाः सुप्रतिष्ठिता वरदा भवंतु। ततो
नंदायै नमः। सुमनसायै०। सुभद्रायै०। सुशीलायै०। सुरभ्यै०। रुद्रकलशे रुद्राय नमः इति संपूज्य कलशे रुद्रसंहिताजपः कार्यः। ततः पवित्रांतर्हि
तं श्रृतं चरुमभिघार्य पुनरवज्योत्य उदगुद्वास्य पुनरभिघारयेत्। ततोऽग्नेः परिस्तरणं। पुरस्ताद्दक्षिणत इत्यादिना प्रकारेण। उत्तरतः प्र
णीतासादनं। अग्नेः पश्चिमतः स्तृतबर्हिषि स्थालीपाकमासाद्य इध्ममग्नावभ्याधाय आज्यं संस्कुर्यात्। तत्संस्कृतमाज्यं स्थालीपाका
त्पूर्वस्यामासाद्य अदितेऽनुमन्यस्वेत्यादिमंत्रैः प्रसेकः। देवसवितरिति पर्युक्षणं। तपश्चेत्यादिविरूपाक्षजपः। स्रुक्स्रुवमेक्षणा
नां संमार्गादि। ततश्चतुर्गृहीतेन अग्नये स्वाहा। सोमाय स्वाहा। इत्याज्यभागौ। ततः प्रधानहोमः उपस्तरणाभिघारहृताभ्यंगपूर्वकः।
अग्नये स्वाहा। इदमग्नये न मम। पूष्णे स्वाहा। इदं पूष्णे न मम। इंद्राय स्वाहा। इदमिंद्राय न मम। ईश्वराय स्वाहा। इदमीश्वराय न मम। २३

ततश्चतुर्गृहीताज्येन चतस्र आहुतयः। तत्र मंत्राः। सोमं राजानं० स्पतिं स्वाहा। इदमग्नये० शुक्रं ते अन्य० रस्तु स्वाहा। इदं पूष्णे न मम।
इन्द्रापर्वता० मद्न्ता स्वाहा। इदमिंद्राय न मम। आवो राजा० कृणुध्वं स्वाहा। इदमीश्वराय न मम। ततो भूरादि व्याहृति चतुष्टयं हुत्वा स्वि
ष्टकृद्धुत्वा पुनर्व्याहृतित्रयं जुहुयात्। ततः समिद्धोमः। देव सवितः इति पर्युक्षणं। अदितेन्वमं० स्था इत्यादि मंत्रैः प्रसेकः। ततो यज्ञ
वास्तु स्तत एव बर्हिषः कुशमुष्टिमादायेत्यादिना प्रकारेण। वसुभ्यः स्वाहेत्याज्याहुतिः। ततो वृषं वत्सतरीचतुष्टयसहितमग्नेः समी
पे मानीय प्राङ्मुखमवस्थाप्य न्यासान्कुर्यात्। तेयथा। गायत्री मूर्ध्नि नमस्तो ललाटे। रोरवयौधाजये नेत्रयोः। बृहद्रथंतरे कर्णयोः।
सेतु साम मुखे। देवव्रतानि त्रिणि कंठे। अधिपतायि इत्यादीनि। वामदेव्यं कंबलो व्रतपक्षौ स्कंधयोः। उरस्स धर्म्ये श्यायि। मनोजयिद्ध
च दये। आत्मनुहोतानाम्नो। तद्वो होवा इत्यादीनि लारिजान्वोः। श्यावाश्वांधीगवे ऊर्वोः। उदुत्यं जंघयोः। पावकान ईयाहृतिपुच्छे। हाउ श्या
वोहाउ इति रोमकूपेषु। आत्मन आहुति चत्वारि गुदे। रक्षोघ्नानि पादेषु। आवो राजेति हृदयं। तद्वो वर्ग शिरः। आज्य दोहैः शिखा। प्रथमेन
देवव्रतेन कवचं। मध्यमेन नेत्रं। तृतीयेनास्त्रं। एवं विन्यस्ते देहो रुद्ररूपो रयोज्ञेयः। अथ वत्सतरीणां शरीरेषु न्यासाः। शिरसि ब्रह्म
णे नमः। उदरे विष्णवे नमः। ललाटे महादेवाय नमः। कर्णयोः अश्विभ्यां नमः। नेत्रयोः चंद्रसूर्याभ्यां नमः। पृष्ठे वैवस्वताय नमः। पादेषु
सप्तसागरेभ्यो नमः। सप्तऋषिभ्यो नमः। रोमकूपेषु। सर्वांगे सर्वदेवेभ्यो नमः। ततः स्थंडिलादेशान्यां स्थापितं कलशमादाय कल
शस्थाभिरद्भिः। हाहुमा। आयो वा। अ। इति एक वृषे ऐसाम्ना वृषं संस्नाप्य शेषोदकेन वत्सिकांश्च स्नापयेत्। ततस्तं वृषं अहत वासोभ्या

२५

२५ माष्वाद्यतिलकाकृतिसुवर्णयद्दं।सत्यमिथ्यारं। वृषासोमा।इतिसामभ्यांशिग्यसिविन्यसेत्।ततोरृषस्यवस्मतरीणांचनूपुरघंटाद्या
भरणादिकंसर्वंकार्यं।ततोरक्तचंदनेनमानस्तोकइतिमंत्रपठन्वृषस्यदक्षिणपार्श्वेत्रिशूलाकारंशलाकयाकुर्यात्।वृषाहसी
24 तिमंत्रेणवामपार्श्वेचक्राकारंलिखेत्।कर्मसमाप्त्यनंतरंतप्तलोहशलाकयातावेवस्यश्रोकेनचित्कारयेत्।अथाग्निपरिक्रम
माणंवृषमेकांवस्मांतरीमनुक्रामयेत्तांचानुक्रममाणामनामिकयांस्पृष्ट्वाअतुमंत्रयेन्मंत्रेण।काम्यासिप्रियासिहव्यासीडासि
रंतासिसरस्वत्यसिमह्यसिविश्रुतिरसिइति।ततोवृषवस्मतर्योःपुच्छेतर्पणं।अग्नेःपश्चात्प्राङ्मुखोतावेवस्थाप्य।देशंकालोस्म
त्वा।अपसव्यं।अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्त्यर्थंतस्मान्निवृत्त्यर्थंवृषवस्मतर्योःपुच्छतर्पणमहंकरिष्ये।इतिसंकल्प्य
सव्येनपुरुषसूक्तेनादौप्रतिसामतर्पणं।ततोऽपसव्यंकृत्वादक्षिणाभिमुखोभूत्वाअमुकगोत्रंअमुकप्रेतंतर्पयामिइतितर्पयेद्वार
त्रयं।ततःसव्यंकृत्वावस्मतरीणांमध्येतंवृषमुत्सृजेन्मंत्रेण।सकुशोदकमादायअद्येत्यादितिथ्यंतमुक्त्वाएतंवृषंयथाशक्त्यलंकृ
तंगंधाद्यर्चितंत्रिशूलचक्रांकितंरुद्रदेवतं।अपसव्यं।अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्तयेवस्मतरीणांमध्येअहमुत्सृजामि।
एकावस्मतरीचेत्वस्मतर्यासहउत्सृजामीतिवाच्यं।युवंयुवानंपतिंवोददामितेनक्रीडंतीश्चरथप्रियेणमानस्तोकेतनयेचरीरि
षोमाचमुन्नदरमभिमुंचथा।इतिमंत्रंपठन्नुत्सृजेत्।ततःसामानिश्रावयेत्।उपत्वाजा।प्रसम्राजोहायि।सोमःपूषा।हाउ।गावोहा २४
उ।हाउउवा।अग्निमीळेपुरोहितम्।हाउ।तेमन्वतप्रथमन्नामगो।नाम्।हाउवा।सहर्षभाःसहवत्साउदेत।आंबोराजा।तद्वो।

होवा।सामचतुष्टयं।आज्यदोहानित्रीणि।अधियातायिइत्यादीनित्रीणि।वामदेव्यंचांते।अथतंवृषंप्रेरयेत्।यथेष्टंयूथंपर्यट
इतिमंत्रेण।प्रेरणंदक्षिणस्कंधेनेतिप्रांचः।ततःप्रदक्षिणागमनं।पात्रनिनयनं।पुनःपूरणं।सुसंप्रोक्षितमित्यादि।अस्यवृषोत्स
र्गकर्मणःसांगतासिद्ध्यर्थंकर्मांगभूतांगां आचार्यायतुभ्यंसंप्रददे नमम।अस्यवृषो०सिध्यर्थंब्राह्मणेपूर्णपात्रंसंप्रददे।अस्यवृ
षो०ब्राह्मणान्भोजनेनाहंतर्पयिष्ये।वृषोत्सर्गसांगतासिद्ध्यैतिलान्उदककुंभान्वासोहिरण्यंचशक्त्यादद्यात्।ततोवामदे
व्यजपः।अद्यपूर्वोच्चरितएवं०तिथौवृषोत्सर्गकर्मणःकृतस्यविधेर्यन्न्यूनमतिरिक्तंतत्सर्वंश्रीविष्णोःप्रसादात्परिपूर्णं।अनेनवृषो
त्सर्गकर्मणाकृतेनअपसव्यंअमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वविमुक्तिःपुण्यलोकप्राप्तिः।।इतिवृषोत्सर्गः।।अथमहैकोद्दिष्टं।।।
तत्रअयुग्माब्राह्मणाः।एकोवा।पूर्वदिवसेनिमंत्रणं।दक्षिणाग्रन्यस्तदर्भेषुतानुपवेश्यश्राद्धमारभेत्।नात्रसव्यं।अपसव्यंकृत्वाद
क्षिणाभिमुखःसव्यंजान्वाच्यतिलैर्नारायब्राह्मणस्यसव्यंजान्वालभ्य।गतोसिदिव्यलोकेत्वंकृतांतविहितान्पथा।मनसावायु
भूतेनविप्रेत्वाहंनियोजये।पूजयिष्यामिभोगेनब्राह्मणोवेदपारगो।सर्वपापैर्विनिर्मुक्तैःकामक्रोधविवर्जितैः।भवद्भिःप्रेतकार्यं
मेसंपाद्यंचप्रसीदत।स्वागतं।सुस्वागतं।प्रेतकर्मणिएतत्तेपाद्यं।एषअर्घः।इदमन्नंचंदनंचपुष्पं।आचमनं।समाधुं।आचमनं।प्र
णवंविनाभूरादिनिर्मानसेःप्राणायामः।पितृशब्ददेवशब्दवतांमंत्राणांलोपः।तस्मात्रामग्निष्वात्तादितृप्तीतिलकुशप्रक्षेपेणदिग्बं
धः।श्राद्धभूमौगयांध्यात्वाध्यात्वादेवंगदाधरं।एतावद्देवानचतयोर्नमस्कारः।सप्तव्याधा०तेभ्योवसीदयानैदेवताभ्यःपितृभ्यश्च

२५ ति। मनसा पठितैर्मंत्रैर्जलमभिमंत्र्य प्रोक्षणं। भवतां प्रसादात् श्राद्धोपहाराणां पाकादीनां पवित्रता। देशकालपात्रद्रव्यश्रद्धा
संपत्। अत्राद्य मासे पक्षे तिथौ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं आद्यां त्यनवश्राद्धाद्यमासिकाद्याब्दिकमहैकोद्दि
ष्टानि तंत्रेणाहं करिष्ये। ततः आसनदानं। अमुकगोत्रामुकप्रेत आसनमिदं ते उपतिष्ठतां। हस्त० नावाहनं। अर्घपात्रमेकं दक्षि
णाभिमुखं संस्थाप्य एकतंतुरूपं पवित्रं दक्षिणाग्रं निधाय तत्र जलमासिच्य। तिलोसि प्रेतदैवत्यो गोसवो स्वनिर्मितः। प्रत्नमद्भिः
पृक्तः [illegible] प्रेत इमांल्लोकान्प्रीणाहि नः इति मंत्रेण तिलावापः। ततश्चंदनतुलस्यादि निक्षिप्य। अर्घपात्रस्यार्द्धेन विधेः परिपूर्णो। अ
क र्घा भवंतु। प्रेतायेदं पुष्पं नया दिव्या इत्यादि। अमु[illegible]गोत्रामुकप्रेत अर्घोयं ते उपतिष्ठतां। इत्यर्घं दत्वा अर्घपात्रमुत्तानमेव स्था
प्यां। पवित्रं ब्राह्मणहस्तादादाय पात्रे स्थापनीयं। ततश्चंदनादिभिः संपूज्य संकल्पान्कुर्यात्। अमुकगोत्रामुकप्रेत गंधोयं ते उप
25 तिष्ठतां। एतानि पुष्पाण्युपतिष्ठंतां। एते बार्हस्पत्ये वाससी उपतिष्ठेतां। धूपोयं ते उपतिष्ठतां। दीपोयं ते उप०। इदं वारुणं जलपात्र
मुप०। इमे आंगिरसदैवते उपानहौ उपतिष्ठेतां। इमे प्राजापत्ये उपवीते उपतिष्ठेतां। इदं छत्रं ते उपतिष्ठतां। इमानि प्रेतसंबंधीन्याभ
रणान्युपतिष्ठंतां। वस्त्राणि ते उपतिष्ठंतां। दास्यमानां शय्यां ते उपतिष्ठतां। सति विभवे दास्यमानं गृहं ते उप०। ततः अस्य श्राद्धस्या
र्द्धेन विधेः परिपूर्णो। आचमनं। ततोन्नसंकल्पः। तत्रान्नपात्रालंभः। नद्धिजां[illegible]गुष्ठनिवेशनं। इदमन्नं आमान्नं वा सघृतं सशाकं २५
सलवणं गुडशर्कराद्युपेतं अमुकगोत्रामुकप्रेत ते उपतिष्ठतां। न विकिरः। स्वदितं सुस्वदितं। ततः पिंडदानं। समूलं कुशं दक्षिणा

रमास्तीर्य अवनेजनं कार्यं नात्र रेखाकरणं। पात्रे जलमादाय अमुकगोत्रामुकप्रेत अवनेनिक्ष्व। अमुकगोत्रामुकप्रेत एष
ते पिंडः। अमुकगोत्रामुकप्रेत अवनेनिक्ष्व। तूष्णीं सूत्रदानं। ततो गंधादि पिंडोपरि प्रक्षिपेत्। अमुकगोत्रामुकप्रेत गंधोयं तउपति
ष्ठतां। इदं पुष्पं तउपतिष्ठतां। धूपोयं ते० दीपोयं ते० इदं नैवेद्यं अमुकगोत्रामुकप्रेत तेउपतिष्ठतां। पिंडस्यार्चनविधेः परिपूर्णं अ
नेन पिंडदानेन अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिः सद्गतिप्राप्तिः। आचमनं। सुसंप्रोक्षितस्यानेतूष्णीं जलादीनां दा
नं। अमुकगोत्रस्यामुकप्रेतस्य दत्तं श्राद्धं चोपतिष्ठतां। ततः पवित्रं पिंडोपरि निधाय तूष्णीं तदुपरि धारां दद्यात्। ततो दक्षिणादानं।
अस्य श्राद्धस्य कृतप्रतिष्ठासिध्यर्थं रजत दक्षिणामिमां अमुकगोत्रामुकप्रेत तेउपतिष्ठतां। अत्र दक्षिणा वस्त्रं वासो हिरण्यादि
द्वि तस्य यद्यत्प्रियं तत्सर्वं देयं लेनात्र देयं। उदकुंभस्य च दानं। ततस्तांबूलादि दानं। पात्रस्य चालनं। अद्य पू[illegible]चरित एवं० तिथौ अ वी° ६
स्यैकादशाहे विहितस्य आद्यांत्यनवश्राद्ध द्यमासिकाद्याब्दिक महैकोद्दिष्टानां तंत्रेण कृतस्य विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं श्री
विष्णोः प्रसादात्परिपूर्णं। अनेन श्राद्धेन अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिः सद्गतिप्राप्तिः। कुंभादिदानयोग्यतावाप्ति।
ततः पिंडोद्धरणं। भूमिशोधनं। स्नानं॥ इति महैकोद्दिष्टं॥ अथोदकुंभानां दानं॥ तत्रादौ विष्णुपूजा। आचमनं। प्राणायामः। गाय
त्र्याभिमंत्रितोदकेनोपहारप्रोक्षणं। भवतां प्रसादात्। विष्णुपूजोपहारद्रव्याणां० देशकाल०। अत्राद्यमासे पक्षे तिथौ अपसव्यं अ
मुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं तत्स्वानिवृत्त्यर्थं करिष्यमाणोदकुंभदानांगं विष्णोः पूजनमहं करिष्ये। इति संकल्प्य

२६ विस्नोःपूजनं।ततोवैस्नवंश्राद्धंतत्रसंकल्पेविशेषः।अमुकगोत्रेत्याद्युचार्यउदकुंभदानांगंवैस्नवंश्राद्धमहंकरिष्यइतिसंकल्प्य
पूर्ववद्वैस्नवंश्राद्धंविधायकुंभानांसंकल्पंकुर्यात्।लक्ष्मीसुसंघोक्षितमित्यादिलत्वाकुशोदकमादायमासेपक्षेतिथौअपसव्यं
अमुकगोत्रस्यामुकप्रेतस्यतृस्नानिवृत्यर्थंसव्यंएकांवर्द्धनींश्रीविस्नुप्रीतयेकस्मैचित्ब्राह्मणायाहंदास्ये।एकंकुंभंसान्नोदकं
यमप्रीत्यैकस्मैचिद्ब्राह्मणायाहंदास्ये।एकंकुंभंसान्नोदकंचित्रगुप्तप्रीत्यैकस्मैचि०।इमेत्रयोदशकुंभाःसान्नाःसोदकाःसोपवी
ताःनानागोत्रेभ्योब्राह्मणेभ्योदास्यमानाःअमुकगोत्रामुकप्रेततेउपतिष्ठतां।अनेनसान्नोदककुंभदानेनअमुकगोत्रस्यामुक
26 प्रेतस्यप्रेतत्वविमुक्तिः।ततोऽष्टविधंपदंबहूनिवादेयानि।आसनोपानहौछत्रंमुद्रिकाचकमंडलुः।भाजनंभाजनाधारोवस्त्राण्य
वि ष्टधंपदमिति।अन्यान्यपिदानान्यत्रदेयानि।एकादशाहमारभ्यप्रथमसंवत्सरांतिमदिनपर्यंतंप्रत्यहंसान्नजलपूर्णकुंभदानं।
तत्रपक्षद्वयं।केचित्संकल्प्यश्राद्धविधिनाब्राह्मणायभोजनंदत्वाकुंभदानमेवदक्षिणामिच्छंति।अपरेतुप्रेतोद्देशेनैवसान्नजलकुं
भस्यसंकल्पपूर्वकंदानमिच्छंति॥ततःप्रात्यहिकदीपदानसंकल्पः।अद्येत्यादिप्रयोगमुच्चार्यअमुकगोत्रस्यामुकप्रेतस्ययममा
र्गेतमोनिवृत्यर्थंदेवालयेद्विजालयेवाएकादशाहमारभ्यप्रथमसंवत्सरांतिमदिनपर्यंतंदास्यमानोदीपोगंधा[illegible]चितंअमुकगो
त्रामुकप्रेततेउपतिष्ठतां।अनेनदीपदानेनअमुकगोत्रस्यामुकप्रेतस्ययममार्गेतमोनिवृत्तिः।प्रात्यहिकब्राह्मणभोजनाशक्तोअ २६
न्नसंकल्पःकार्यः।एकादशाहमारभ्यसंवत्सरांतिमदिनपर्यंतंप्रत्यहंदीयमानमन्नंप्रेतस्यक्षुधानिवृत्यर्थंअमुकगोत्रामुकप्रेत

तेउपतिष्ठतां॥इत्युदकुंभादिदानानांसंकल्पः॥अथषोडशश्राद्धानि॥तानिचद्वादशाहेसपिंडीकरणपक्षेएकादशाहेकार्याणि।
द्वादशाहेयस्तुकुर्यात्पितुःपुत्रःसपिंडनं।एकादशेह्निकुर्वीतप्रेतश्राद्धानिषोडशेतिनारायणभट्टपद्धतौ।षोडशश्राद्धानितुआ
द्यमासिकं१ऊनमासिकं२द्वितीयमासिकं३त्रैपक्षिकं४तृतीयमासिकं५चतुर्थमासिकं६पंचममासिकं७षष्ठमासिकं८ऊ
नषाण्मासिकं९सप्तममासिकं१०अष्टममासिकं११नवममासिकं१२दशममासिकं१३एकादशमासिकं१४द्वादशमासिकं१५
ऊनाब्दिकं१६ख्यानिद्वादशेह्निसपिंडीकरणाधिकारसिद्ध्यर्थमपकृष्यैकादशेद्वादशेह्निकएकोद्दिष्टविधिनाकार्याणि।य
दामरणादारभ्यद्वादशमासमध्येकश्चिदधिकस्तदातन्मासिकंद्विवारंकार्यं।एवंसप्तदशश्राद्धानिभवंति।अपकर्षपक्षेचदे
तादेशकालकर्त्रैक्यात्पृथगनुष्ठानकालासंभवाद्द्वादशाहिकश्राद्धान्यूनादिकांतानिश्राद्धानितंत्रेणकर्त्तव्यानि।तत्रपक्षद्वयं।
एकंब्राह्मणमुपवेश्यद्वादशाहविहितश्राद्धान्यूनादिकांतानिश्राद्धानितंत्रेणाहंकरिष्येइतिसंकल्प्यएकार्घैकपिंडदानेनापि
सर्वेषांश्राद्धानांसिद्धिर्भवति।पक्षांतरेतुप्रतिश्राद्धंब्राह्मणार्घपिंडदानंभवति।अत्रइदानींतनानामाचारस्यतथादर्शनात्प्रति
श्राद्धंब्राह्मणार्घपिंडदानपक्षेप्रयोगंवदामः।तत्रआद्यस्यसकृदनुष्ठानपक्षेमहैकोद्दिष्टेनसहकृतत्वात्पंचदशैवात्रभवंति।
द्विवारमनुष्ठानपक्षेषोडश।आद्यस्यद्विरावृत्तिबोधकवाक्याद्द्विरावृत्तिरुचिता।अतःपूर्वोक्तक्रमेणैवषोडशश्राद्धानिभवंति।
षोडशब्राह्मणानामसंभवेदर्भंचरूचाआसनेसमुपवेश्यमहैकोद्दिष्टवत्सर्वंकार्यं।गतोसिदिव्यलोकेत्वंकृतांतविहितात्पथा।

२८ मनसावायुभूतेन विधेलाहं नियोजये। पूजयिष्यामि भोजेन ब्राह्मणे वेदपारगे। सर्वाभस विनिर्मुक्तैः कामक्रोधविवर्जितैः। भव
द्भिः प्रेतकार्यं नः संपाद्यं च प्रसीदत। स्वागतं। सुस्वा०। प्रेतकर्मणि एतद्वः पाद्यं। एष अर्घः। इदमत्राचंदनं पुष्पं। एवं सर्वत्र षोडशेषु।
आचमनं समाध्वं। समास्महे। आचमनं। अ एवं विनाभूरादि निर्मानसैः प्राणायामः। तूष्णीं तिलकुशप्रक्षेपेण दिग्बंधः। आद्यभूमिण
यां ध्यात्वा ध्यात्वा देवं गदाधरं। एतावदेव। न च तयोर्नमस्कारः। सप्तव्याधा०। तेभ्यो वसीदथा न देवताभ्यः पितृभ्यश्चेति। मनसा पठितैर्मं
27 त्रैर्जलमभिमंत्र्य श्राद्धोपहारस्यै प्रोक्षणं भवतां प्रसादात् श्राद्धोपहाराणां पाकादीनां पवित्रता। देशकालपाकपात्रद्रव्यश्रद्धासंप
त्। अत्राद्य मासे पक्षे तिथौ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थं आद्यमासिक ऊनमासिक द्वितीयमासिक त्रैपक्षिक तृती
यमासिक चतुर्थमासिक पंचममासिक षष्ठमासिक ऊनषण्मासिक सप्तममासिक अष्टममासिक नवममासिक दशममासिक एका
दशमासिक द्वादशमासिक ऊनाब्दिकाख्यानि षोडशश्राद्धानि एकोद्दिष्टविधिना तंत्रेणाहं करिष्ये। इति संकल्पं कृत्वा आसनदानं कुर्या
त्। अमुकगोत्रामुकप्रेत आसनमिदं ते उपतिष्ठतां। इस्त्र०। एवं षोडशभ्य आसनानि दत्वा अर्घपात्राणि पूरयेत्। तानि दक्षिणाग्राणि
दक्षिणाग्रन्यस्तपवित्राणि। सर्वपात्रेषु तूष्णीमपः प्रक्षिप्य। तिलोसि प्रेतदेवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः प्रेत इमान्लोका
न्प्रीणाहि नः। इति मंत्रेण प्रतिपात्रं तिलप्रक्षेपः। ततश्चंदनपुष्पे प्रतिपात्रं प्रक्षिप्य समाचाराद्रूपदीयो कृत्वा अर्घपात्राणामर्चनविधेः २८
परिपूर्णं। अर्घा भवंतु। प्रेतायेदं पुष्पं। नयाद्दिव्या इत्यादि। अमुकगोत्रामुकप्रेत अर्घोयं ते उपतिष्ठतां। एवं सर्वेभ्यो अर्घं दत्वा सर्वाण्यर्घ

पात्राण्युत्तानानिसंस्थाप्यतेषुपवित्राणिन्यस्तव्यानि।ततश्चंदनादिभिःसंपूज्यसंकल्पंकुर्यात्।अमुकगोत्रामुकप्रेतगंधोयंते
उपतिष्ठतां।एवमेतानिपुष्पाण्युपतिष्ठंतां।वाससीउपतिष्ठेतां।अमीषांश्राद्धानामर्चनविधेःपरिपूर्णो।आचमनं।भोजनसंकल्पः
पात्रेष्वन्नंपरिविष्यदास्यमानंतत्तृप्तिपर्यंतंभोजनंअमुकगोत्रामुकप्रेततेउपतिष्ठतां।एवंसर्वत्र।ततःपिंडदानं।षोडशापिसमूलान्दक्षि
णाग्रान्दर्भान्दक्षिणसंस्थानास्तीर्य।अमुकगोत्रामुकप्रेतअवनेनिक्ष्व।एवंसर्वत्र।आद्यमासिकनिमित्तंअमुकगोत्रामुकप्रेतअ
वनेनिक्ष्व।एवंऊनमासिकनिमित्तं०द्वितीयमासिकनि०त्रैपक्षिकनि०तृतीयमासिकनि०चतुर्थमासिकनि०पंचममासिकनि०ष
ष्ठमासिकनि०ऊनषाण्मासिकनि०सप्तममासिकनि०अष्टममासिकनि०नवममासिकनि०दशममासिकनि०एकादशमासिक
नि०द्वादशमासिकनि०ऊनाब्दिकनि०।पिंडदानमप्येवमेव।ततःप्रत्यवनेजनंपूर्ववत्।सूत्रदानं।चंदनपुष्पादि।धूपदीपौ।नैवे
द्यं।अमुकगोत्रामुकप्रेतनैवेद्यंतउपतिष्ठतां।पिंडानामर्चनविधेःपरिपूर्णो।अनेनपिंडदानेनअमुकगोत्रामुकप्रेतस्यप्रेतत्वनि
वृत्तिः।आचमनं।तल्लीसुसंप्रोक्षितमित्यादि।अमुकगोत्रस्यामुकप्रेतस्यदत्तंश्राद्धंचोपतिष्ठतां।ततःपवित्राणिपिंडानामुपरि
निधायतूष्णींतदुपरिधारांदद्यात्।ततोदक्षिणासंकल्पः।अमीषांश्राद्धानांकृतप्रतिष्ठासिद्ध्यर्थंरजतदक्षिणामिमांअमुकगोत्र
स्यामुकप्रेततेउपतिष्ठतां।अथवाअत्रदक्षिणास्थानेषोडशताम्रमयजलपात्राणांसंकल्पः।दास्यमानानिषोडशताम्रमयानि
जलपात्राणिवरुणदेवतानिअमुकगोत्रामुकप्रेततेउपतिष्ठतां।ततःपात्राणांचालनं।पुनःपृच्छा।अद्यपू०तिथौअमीषांषोडश

२८ श्राद्धानां कृतस्य विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं श्रीविष्णोः प्रसादात्परिपूर्णं। अनेन षोडशश्राद्धकृतेन अमुकगोत्रस्यामुकप्रे
तस्य प्रेतत्वविमुक्तिः पुण्यलोकप्राप्तिः सपिंडीकरणयोग्यतावाप्तिः ततः पिंडोद्धरणं स्नानं॥ इति षोडशश्राद्धानि॥ इत्येकादशा
हकृत्यं॥ अथ द्वादशाहकृत्यं॥ तत्र सपिंडीकरणं। तस्यानेककालत्वेपि कलौ द्वादशाह एव कार्यमनित्यत्वाच्छरीरस्य। पूर्वेद्युर्ब्रा
ह्मणानां निमंत्रणं। वैश्वदेवार्थं द्वौ विप्रौ एकं च प्रेतार्थं प्रेतस्य पित्रादेर्यैः सह सपिंडीकरणं तत्र यार्थं त्रीनेवं पंचानां निमंत्रणं। अश
२९ क्तौ तु दैवे प्रेते त्रयाणां चैकैकमित्येवं त्रीन्वा। प्राङ्मुखं विप्रद्वयमुपवेश्य यवहस्तस्तयोर्दक्षिणं जान्वालभ्य श्वः करिष्यमाणसपिंडी
करणश्राद्धे वैश्वदेवार्थं युवामहं निमंत्रयामि। ततो निमंत्रितौ स्वः इति ताभ्यामुक्ते अक्रोधनैरित्यादिना नियमान् श्रावयेत्। तत
एकमुदङ्मुखं विप्रमुपवेश्य श्वः करिष्यमाणसपिंडीकरणे प्रेतश्राद्धे ब्राह्मणकार्यार्थं त्वामहं निमंत्रयामि। निमंत्रितोस्मि इति प्रति
वचनं। एवमपरमुपवेश्य श्वः करिष्यमाणसपिंडीकरणश्राद्धे प्रेतपितृकार्यार्थं त्वामहं निमंत्रयामि। एवं पितामहकार्यार्थं त्वाम
हं नि०। प्रपितामहकार्यार्थमिति। निमंत्रितोस्मि इति प्रतिवचने प्रत्युक्ते अक्रोधनैरित्यादिनियमश्रावणं। निमंत्रणादि कर्तुस्ते
षां च ब्रह्मचर्यादयो नियमाः। प्रातर्ब्राह्मणानां श्मश्रुकर्माभ्यंगादि कारयित्वा कृतमाध्याह्निकादिः सुस्नातागतान्ब्राह्मणान्प्रत्यु
त्थानाभिवादनादिभिः सत्कृत्य तेषां पादप्रक्षालनार्थं मंडलकरणं। उत्तरे वैश्वदेवं मंडलं चतुःकोणं तद्दक्षिणे प्रेतमंडलं त्रिकोणं। २८
तद्दक्षिणे पितामहादिमंडलं वर्तुलं। चतुःकोणमंडले वैश्वदेविकौ द्वौ प्राङ्मुखौ। त्रिकोणे उदङ्मुखमेकं पार्वणश्राद्धस्य वर्तुले मंडले

त्रीनेकैकंवाउपविश्यपाद्यादिभिःपूजयेत्।कालकामसंज्ञकाविश्वेदेवाइदंवःपाद्यमित्यादिप्रेतब्राह्मणपूजायांतुगतोसिदिव्य
लोकेत्वमित्यादिप्रेतकार्यमेदम्॰प्रेतेदृ्मणः॰प्रेतकर्मणिएतद्वःपाद्यमित्यादि।पितामहादिब्राह्मणपूजायांतु।अमुकगोत्रप्रेतपि
तःअमुकशर्मन्नवसुरूपएतत्तेपाद्यमित्यादिप्रेतपितामहरुद्ररूपएतत्तेपाद्यं॰प्रेतप्रपितामहआदित्यरूपएतत्तेपाद्यं॰ततः
श्राद्धदेशेभूर्भुवस्वःसमाध्वंइतितानुपवेशयेत्।एकोद्दिष्टेतुसमाध्वमित्येव।ततआचमनंप्राणायामः।गायत्रीगायत्रंचपठि
त्वा।अपसव्यंप्रसादंकृत्वासपिंडीकरणंश्राद्धंकारयध्वं।कुरुष्व।अग्निष्वात्ता॰श्राद्धभूमौ॰सप्तव्याधा॰देवताभ्यः॰अपवित्रः॰
दशगायत्री।एतोन्विंद्र॰पृथिव्या॰नवतांप्रसादात्श्राद्धोपहा॰देश॰अद्येत्यादितिथौअपसव्यं।अमुकगोत्रस्यामुकप्रेतस्य
प्रेतत्वविमुक्त्यर्थंवसुरुद्रादित्यलोकप्राप्त्यर्थंअमुकगोत्राणांप्रेतपितृपितामहप्रपितामहानांअमुकामुकामुकशर्मणांवसु
रुद्रादित्यरूपाणांपिंडैःसहसपिंडीकरणंपार्वणैकोद्दिष्टविधानेनसव्यंकरिष्येइतिसंकल्प्यआसनदानंकुर्यात्।कालकामना
मभ्योविश्वेभ्योदेवेभ्यइदमासनंस्वाहा।हस्त॰अपसव्यं।अमुकगोत्रायामुकप्रेतायेदमासनंउपतिष्ठतां।हस्त॰प्रेतोपचारानं
तरंसर्वत्राचमनंकर्तव्यमितिशिष्टाचारः।अमुकगोत्रायप्रेतपित्रेअमुकशर्मणेवसुरूपायइदमासनंस्वधा।हस्त॰एवंप्रेत
क पितामहायअमुशर्मणेरुद्ररूपायइदमासनंस्वधा।हस्त॰प्रेतप्रपितामहायअमुकशर्मणेआदित्यरूपायइदमा॰हस्त॰आ
वाहनं।कालकामसंज्ञान्विश्वान्देवानावाहयिष्ये।आवाहय।विश्वेदेवासआ॰एकोद्दिष्टेनावाहनं।अपसव्यं।अमुकगोत्रान्

अ

२९ प्रेतपितृपितामहप्रपितामहान् अमुकामुकामुकशर्मणः वसुरुद्रादित्यरूपान् आवाहयिष्ये। आवाहय। उशंतस्त्वा०। अपहता इ
ति तिलविकिरणं। अर्घपात्राणां पूरणं। विश्वेषां देवानां प्रकृतिवदर्घपात्रमेकं। दक्षिणाग्रमेकं पात्रं प्रेतस्य। त्रीणि तत्पित्रादी
नां दक्षिणाग्राण्येव। सर्वेषु पात्रेषु प्रतिपात्रं पवित्रद्वयं। एकं तंतुरूपं प्रेतपात्रे स्यात् चिह्नं देवपात्रे। शन्नो देवीरिति जलप्रक्षेपः। यवो
29 सि० इद० चंद०। अपसव्यं। तूष्णीं प्रेतपात्रे जलमासिच्य। तिलोसि प्रेतदेवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः प्रेतस्त्विमांल्लोकान्प्री
णाहि नः इति तिलावापः। तूष्णीमिति केचित्। चंदनं पुष्पादि प्रक्षिप्य आचमनं। अपसव्यं। ततः पित्रादिपात्राणां पूरणं। शन्नो देवी०।
तिलोसि सोम०। चंदनपुष्पादि। सव्यं। देवपात्रस्यार्घार्चनविधेः परिपूर्णतास्तु। अपसव्यं। प्रेतस्यार्घसंपत्तिः। सव्यं। उदकोपः स्वाहा
अर्घा भवंतु। अस्तु। विश्वेभ्यो० या दिव्या०। कालकामनामानो विश्वेदेवा एतद्वोर्घं स्वाहा। अपसव्यं। अर्घा भवंतु। पवित्रं रत्वा प्रेता
येदं पुष्पं। न या दिव्या इत्यादि। अमुकगोत्रामुकप्रेत अर्घोयं तउपतिष्ठतां। इति प्रेतपात्रस्थमर्घं चतुर्थांशं दद्यात्। ततः पवित्रं ततआ
दाय अर्घपात्रे स्थापनीयं। ततः सव्येनाचमनं। ततः समाचारात् सुसंप्रोक्षितमित्यादि। अद्येत्यादि तिथौ। अमुकगोत्रस्यामुकप्रेतस्य
प्रेतत्वविमुक्त्यर्थं वसुरुद्रादित्यलोकप्राप्त्यर्थं अमुकगोत्राणां प्रेतपितृपितामहप्रपितामहानां वसुरुद्रादित्यरूपाणां अर्घैः सह
अर्घसंयोजनमहं करिष्ये। संयोजयेति प्रतिवचनं। ततः प्रेतपात्रस्थं पवित्रं प्रेतपित्रर्घपात्रे संन्यस्य हस्ताभ्यां प्रेतार्घपात्रमादाय। २९
ये समानाः समनसः पितरो यमराज्ये। तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां। ये समानाः समनसो जीवा जीवेषु मामकाः। तेषां श्री

र्मयिकल्पतामस्मिंल्लोके शतꣳ समानाः इति मंत्रद्वयं पठित्वा अमुकगोत्रस्यामुकप्रेतस्य अर्घस्य प्रथमांशः। अमुकगोत्रप्रेत
स्य पितुः अमुकशर्मणः वस्वात्मनः अर्घेण सह संयुज्यतां। संयुतास्म इति प्रतिवचनं। अनेनार्घसंयोजनेन अमुकगोत्रस्यामु
कप्रेतस्य वसुलोकप्राप्तिः। ततः पवित्रं तत आदाय प्रेतपितामहपात्रे संन्यस्य ये समाना० इति मंत्रद्वयं पठित्वा अमुकगोत्रस्या
मुकप्रेतस्य अर्घस्य द्वितीयांशः अमुकगोत्र प्रेतपितामहस्य अमुकशर्मणो रुद्रात्मनः अर्घेण सह संयुज्यतां। प्रतिवचनं पूर्ववत्।
अनेनार्घसंयोजनेन अमुकगोत्रस्यामुकप्रेतस्य रुद्रलोकप्राप्तिः। ततः पवित्रं तत आदाय प्रेतप्रपितामहपात्रे स्थापनीयं। ततः पु
नर्ये समाना इत्यादिमंत्रद्वयं पठित्वा अमुकगोत्रस्यामुकप्रेतस्य अर्घस्य तृतीयांशः। अमुकगोत्रस्यामुकप्रेत प्रपितामहस्य अ
मुकशर्मणः आदित्यात्मनः अर्घेण सह संयुज्यतां। अनेनार्घसंयोजनेन अमुकगोत्रस्यामुकप्रेतस्य आदित्यलोकप्राप्तिः। ततः स
नाचमनं। ततोऽपसव्यं कृत्वा प्रेतपित्रादिपात्रेषु चंदनपुष्पादि प्रक्षिप्य प्रेतपित्रादिपात्राणामर्घार्चनविधेः परिपूर्णमस्तु। स्वधा
अर्घा भवंतु। अस्तु। पवित्रदानं। प्रेतपित्रे नमः इदं पुष्पं। या दिव्या० अमुकगोत्र प्रेतपितः वसुरूप एतत्ते अर्घ्यं ये चा०। अपउप०। एवं
प्रेतपितामहाय नमः इदं पुष्पं। या दिव्या० अमुकगोत्र प्रेतपितामह रुद्ररूप एतत्ते अर्घ्यं० अपउप०। प्रेतप्रपितामहाय नमः इदं पुष्पं।
या दिव्या०। अमुकगोत्र प्रेतप्रपितामह अमुकशर्मन् आदित्यरूप एतत्ते०। ततः पात्रन्युब्जकरणं तत्प्रकृतिवत्। न प्रेतपात्रस्य न्यु
ब्जीकरणं। सव्यं चंदनादिनिर्दैविकान् संपूज्य यथादत्तं गंधाद्यर्चनं कालकामनामभ्यो विश्वेभ्यो देवेभ्यः स्वाहा। इदं विश्वेभ्यो देवे

३०
भ्यो नमम। अपसव्यं। अमुकगोत्रामुकप्रेत गंधोयं ते उपतिष्ठतां। एवं पुष्पाणि ते उ०। बार्हस्पत्ये वाससी ते उ०। प्रेतस्यार्चनविधेः
परिपूर्णा। आचमनं। अपसव्यं। ततः पित्रादिब्राह्मणानां पूजां कृत्वा संकल्पान् कुर्यात्। यथा दत्तं गंधाद्यर्चनं अमुकगोत्राय प्रेत
पित्रे वसुरूपिणे स्वधा। इदं प्रेतपित्रे न मम। एवं प्रेतपितामहाय अमुकशर्मणे रुद्ररूपिणे स्वधा। इदं प्रेतपितामहाय न मम। प्रेत
प्रपितामहाय अमुकशर्मणे आदित्यरूपिणे स्वधा। इदं प्रेतप्रपितामहाय न मम। एवं पुष्पाणि। सर्वेभ्यः प्रत्येकं वासोयुगं दत्वा द
त्ते बार्हस्पत्ये वाससी अमुकगोत्राय प्रेतपित्रे अमुकशर्मणे वसुरूपिणे स्वधा। एवमुक्तवदपरयोः। अस्य श्राद्धस्यार्चनविधेः परि
पूर्णतास्तु। सव्यं। आचमनं। अत्र साग्निकेनापि ब्राह्मणपाणावग्नौकरणं होमः कर्त्तव्य इति देवयाज्ञिकाः स्मृतिवाक्याभिप्रायेण
हुः। करे हुते लौकिकेग्नौ प्रक्षिप्य एधयां। हुतावशिष्टमन्नमन्येषां पित्रादीनां पात्रेषु प्रक्षेप्तव्यं। ततोऽन्नं परिविष्यान्नसंकल्पं कुर्या
त्। आद्ये देवे। सव्यं। सत्येन त्वा० पृथ्वी ते० विष्णो हव्यं० इदमन्नादि० तृप्तिपर्यंतं भोजनं विश्वे० इदं विश्वेभ्यो देवेभ्यो नमम। अपसव्यं।
तूष्णीं अन्नस्य प्रोक्षणं। न पात्रालंभावगाहो। इदमन्नादि यद्दत्तं० तृप्तिपर्यंतं भोजनं अमुकगोत्रामुकप्रेत ते उपतिष्ठतां। तत आचम्य।
अपसव्यं। सत्येन त्वा० पृथ्वी ते० इदं विष्णु० इदमन्नादि० तृप्तिपर्यंतं भोजनं अमुकगोत्राय प्रेतपित्रे अमुकशर्मणे वसुरूपिणे स्वधा।
एवं प्रेतपितामहाय अमुकशर्मणे रुद्ररूपिणे स्वधा। प्रेतप्रपितामहाय अमुकशर्मणे आदित्यरूपिणे स्वधा। ततो गायत्रीं पठित्वा ३०
मधुवाता ऋतायते इति पठेत्। अपोशानं दत्वा कृतसंकल्पसिद्धिरस्तु। अत्र प्रेतैकोद्दिष्टसङ्घात्वात्पितृसंहिताजपनिषेध इति केचि
त्

तान्स्नानज्ञात्वा विकिरः कार्यः। आचमनं। पुनरपोशानं दत्वा मधुमंत्रजपः। तृप्ताः स्थेति पार्वणे स्वदितमित्येकोद्दिष्टे। ततः पिंडदा
नं। तत्र एकोद्दिष्टे न रेखाकरणं नावाहनं। पार्वणे तु सर्वं भवति। दक्षिणाग्रं सम्मूलं कुशमास्तीर्यत दक्षिणतः पंक्तिरूपेण कुशत्रयं पि
त्रादीनां पिंडदानार्थं दक्षिणाग्रमेव समास्तीर्य अपहते ति पिंजूल्या रेखां कृत्वा एत पितर इति नियम्य तेत्यं तेन पितृनावाहयेत्। अथ
वा पूर्वतः प्रेतस्य पिंडार्थं कुशमास्तीर्यत त्रिविभ्रमे पार्वणार्थो। ततः पात्रे जलमादाय अमुकगोत्रामुकप्रेत अवनेनिक्ष्वइत्यवनेज्य सव्ये
नाचम्य अपसव्यं कृत्वा पात्रांतरे जलमादाय अमुकगोत्र प्रेत पितः अमुकशर्मन् वरुणरूप अवनेनिक्ष्व ये च। उदकोपः। अमुक
गोत्र प्रेत पितामह अमुकशर्मन् प्रजापतिरूप अवने। उदकोपः। अमुकगोत्र प्रेत प्रपितामह अमुकशर्मन् अग्निरूप अवनेनिक्ष्व
ये। ततः प्रेतपिंडं दीर्घं लोष्ठकाकारमादाय अमुकगोत्रामुकप्रेत एष ते पिंडः। ततः सव्येनाचम्य अपसव्यं कृत्वा अमुकगोत्र प्रेत पि
तः अमुकशर्मन् वरुणरूप एष ते पिंडो ये च। इदं प्रेतपित्रे न ममेत्येवं यथा दैवतं त्यागः। उदकोपः। अमुकगोत्र प्रेत पितामह अमुकश
र्मन् प्रजापतिरूप एष ते पिंडो ये च। उदकोपः। अमुकगोत्र प्रेत प्रपितामह अमुकशर्मन् अग्निरूप एष ते पिंडो ये च। नेदानीं पित्रा
दिपिंडेषु प्रत्यवनेजनं। प्रेतपिंडे तु प्रत्यवनेजनं कर्त्तव्यं। अमुकगोत्रामुकप्रेत अवनेनिक्ष्व। नमात्र पितरो मादयध्वमित्यनेनावृत्तिः।
तूष्णीं सूत्रतंतुदानं। वासो यं तउपतिष्ठतामिति वा। गंधो यं ते। पुष्पमिदं ते। धूपो यं ते। दीपो यं ते। अर्घो यं ते। अमुकगोत्रामुकप्रेत ते ने
वेद्यमिदं ते ठप। पिंडस्यार्चनविधेः परिपूर्णं। अनेन पिंडदानेन अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिः। पुण्यलोकप्राप्तिः। स

३१ व्यं आचमनं तूष्णीं सुसंप्रोक्षितमित्यादि अमुकगोत्रस्यामुकप्रेतस्य दत्तं श्राद्धं चोपतिष्ठतां। पिंडोपरि पवित्रं निधाय तूष्णीं जल
धारा कार्या। अस्यैकोद्दिष्टश्राद्धस्य कृतप्रतिष्ठासिध्यर्थं दास्यमानां दक्षिणां सुखवासं च अमुकगोत्रामुकप्रेततेउपतिष्ठतां। अ
द्य पूर्वोच्चरित एवं ० तिथौ अस्य प्रेतैकोद्दिष्टकृतस्य विधेः परिपूर्णा अनेनैकोद्दिष्टश्राद्धेन अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्ववि
मुक्तिः पिंडसंयोजनयोग्यतावाप्तिः। ततः अभिरम्यतां इति विसर्गः। ततः आचम्य समाचारात् सुसंप्रोक्षितमित्यादि। अद्येत्यादि
तिथौ अपसव्यं अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थं अमुकगोत्राणां प्रेतपितृपितामहप्रपितामहानां अमुकामुकामु
कशर्मणां वसुरुद्रादित्यरूपाणां पिंडैः सह पिंडसंयोजनमहं करिष्ये। कुरु इति विप्रैरुक्ते। सुवर्णादिशलाकया कुशेन च पिंडं त्रे
धा कृत्वा आद्यं भागमादाय ये समाना इति मंत्रद्वयं पठित्वा अमुकगोत्रस्यामुकप्रेतस्य पिंडस्य प्रथमांशः अमुकगोत्रप्रेतस्य पि
तुः अमुकशर्मणो वरुणात्मनः पिंडेन सह संयुज्यतां। संयुतास्म इति प्रतिवचनमिति केचित्। संयुनज्मि इति वा। ततो दधिमधुभ्यां
मिश्री कुर्यात्। अनेन पिंडसंयोजनेन अमुकगोत्रस्यामुकप्रेतस्य वसुलोकप्राप्तिः। पिंडदाने वरुणादीनां देवतात्वात् वरुणलोक
प्राप्तिरिति केचित्। ततः पिंडस्य द्वितीयांशमादाय ये समाना इति मंत्रद्वयं पठित्वा अमुकगोत्रस्यामुकप्रेतस्य पिंडस्य द्वितीयांशः अमु
कगोत्रप्रेतपितामहस्य अमुकशर्मणः प्रजापत्यात्मनः पिंडेन सह संयुज्यतां। मिश्रणं पूर्ववत्। अनेनेत्याद्युक्त्वा रुद्रलोकप्राप्तिः। ३१
प्रजापतिलोकप्राप्तिः इति वा। ततः पिंडस्य तृतीयांशमादाय ये समाना इति मंत्रद्वयं पठित्वा अमुकगोत्रस्यामुकप्रेतस्य पिंडस्य तृ

।।।

तीयांशः। अमुकगोत्रप्रेतप्रपितामहस्य अमुकशर्मणः अग्न्यात्मनः पिंडेन सह संयुज्यतां। दधिमधुभ्यां मिश्रणं। अनेन पिंडसंयो
जनेन अमुकगोत्रस्यामुकप्रेतस्य आदित्यलोकप्राप्तिः अग्निलोकप्राप्तिरिति वा। पिंडसंयोजनांते निश्वासधेनुसंकल्पः। अद्ये
त्यादि मासे पक्षे तिथौ अमुकगोत्रस्यामुकशर्मणो विच्छिन्नसंतोषार्थं निश्वासधेनुसंज्ञकां गां रुद्रदैवतां कस्मैचिद्ब्राह्मणाय त
त्प्रियद्रव्यं वा अहं दास्ये। अनेन धेनुदानेन अमुकशर्मणो निश्वासशांतिरस्तु। ततो मोक्षधेनुसंकल्पः। अमुकगोत्रस्यास्मत्पि
तुरमुकशर्मणो मोक्षावाप्तये मोक्षधेनुसंज्ञकां गां रुद्रदैवतामित्यादि। अनेन मोक्षधेनुदानेनास्य पितुर्मोक्षावाप्तिरस्तु। ततः पिं
डेषु प्रत्यवनेजनं। अमुकगोत्र तत्पितः अमुकशर्मन् वरुणरूप अवने०। तत्पितामह अमुकश० प्रजापतिरूप अवने०। तत्प्रपिता
मह अमु० अग्निरूप अव०। ततोऽत्र पितर इत्यादि। एतद्व इति सूत्रदानं। गंधादीनां निक्षेपः। एष धूपः। एष दीपः। एष अर्घः। नैवेद्यं य
था०। नैवेद्यं अमुकगोत्रेभ्यः तत्पितृपितामहप्रपितामहेभ्यः अमुकामुकामुकशर्मभ्यः वरुणप्रजापत्यग्निरूपेभ्यो यथायथा विभा
गं वः स्वधा। पिंडानामर्चनविधिरित्यादि प्रस्तुतिवत्। आचमनं। सुसंप्रोक्षितमित्यादि। अपसव्यं। अमुकगोत्रस्य तत्पितुरमुकशर्म
णो वस्वात्मनः दत्तमिदं श्राद्धमक्षय्यमस्तु। तत्पितामहस्यामुकशर्मणो रुद्रात्मनः। तत्प्रपितामहस्यामुकशर्मणो आदित्यात्म
नः दत्तमिदं०। येषां०। अघोराः०। पिंडोपरि पवित्राणि प्रक्षिप्य गोत्रेभ्यः तत्पितृभ्यो वस्वात्मभ्य अमुकशर्मभ्यः स्वधोच्यतां। एवं त
त्पितामहेभ्यः अमुकशर्मभ्यो रुद्रात्मभ्य०। तत्प्रपितामहेभ्य अमुकशर्मभ्य आदित्यात्मभ्यः०। ऊर्जं वहंती०। विश्वेदेवा०। पिंडपा

ति
३२ पिं त्राणांचालनं।दक्षिणासंकल्पः।पूर्ववत्।अद्यपूर्वो०तिथौअमुकगोत्रस्यामुकशर्मणःअमुकगोत्राणांतत्पितृपितामहप्रपि
तामहानांअमुकामुकामुकशर्मणांसपिंडीकरणनिमित्तस्यपार्वणैकोद्दिष्टरूपस्यविधेर्यन्न्यूनमतिरिक्तंतत्सर्वंश्रीविष्णोःप्र
सादात्परिपूर्णमस्तु।वाजेवाजे०।आमावाजस्य०।आसीमांतमनुव्रज्यवामदेव्यंगीत्वागृहंप्रविशेत्।इतिसपिंडीकरणं॥अथ
त्रयोदशदिनकृत्यं॥तत्रसर्वमाचारप्राप्तमुच्यते।प्रातःस्नानसंध्यादिकंविधायदेवंविष्णुंपूजयेत्।तत्रदेशकालौसंकीर्त्यश्रवण
देवतानांपूजनप्रारंभांगंश्रीविष्णोःपूजनमहंकरिष्येइतिसंकल्प्ययथावत्पूजांविधायश्रीविष्णुंप्रणम्यपूजांपरिसमाप्यपुन
32 राचम्यप्राणानायम्यगायत्र्यादिमंत्रैर्जलमभिमंत्र्यतेनोदकेनपूजोपहारंप्रोक्षयेत्।श्रवणादिदेवानांपूजोपहारद्रव्याणांपूजोप
हाराणांपवित्रतास्तु।देशकाल०संपदस्तु।अद्याद्यमासेपक्षेतिथौ।अपसव्यंअमुकगोत्रस्यामुकशर्मणःकृतौर्ध्वदैहिककर्मसाद्गु
ण्यार्थंश्रवणादिदेवताप्रीतयेश्रवणादीनांपूजामहंकरिष्येइतिसंकल्प्यवस्त्रोपरितंडुलैरष्टदलंकृत्वाकार्णिकायांयथावि
धिनाकलशंसंस्थाप्यश्रवणादीन्देवानस्मिन्कलशेआवाहयामिइत्यावाह्यप्रतिष्ठामंत्रौपठित्वाअस्मिन्कलशेश्रवणाद्या
देवाःसुप्रतिष्ठितावरदाभवंतुइतिप्रतिष्ठांकृत्वापूजांकुर्यात्।श्रवणादिदेवताभ्यआसनंपाद्यमित्यादि।एवंपूजांपरिसमाप्य
वैष्णवंश्राद्धंपूर्ववत्कुर्यात्।तत्रदास्यमानदानांगत्वेनवैष्णवंश्राद्धमहंकरिष्येइतिसंकल्प्यश्राद्धंकृत्वातद्दत्तेपूर्वसंकल्पितानि ३२
दानान्यत्रवादद्यात्।दानांतेसुतासोमधुमत्तमाइतिकलशस्थान्देवान्विसृज्यतंकलशंशिरसिधृत्वाबहिर्गत्वाअश्वक्रांते

कलशं निनयेत्॥ यद्वाल्येयच्च कौमारे वार्द्धके वापि यत्कृतं। तत्सर्वं नाशमायातु तर्पणं देवर्षिपितृकं॥१॥ इमं मे समयं पूर्णं तारयस्व भवार्णवात्। अन्तरेण गन्तुमिच्छामि तद्विष्णोः परमं पदं॥२॥ अथाहूय द्विजवरं यजमानः स्वयं वदेत्। ब्रूहि ब्राह्मणतं मंत्रं स्मरणं येन तद्भवेत्॥३॥ ममशीर्षात्तश्रवणिकामुत्तारयस्व सांप्रतं उत्तारयति मंत्रेण ब्राह्मणो वर्द्धनीं ततः॥४॥ अमुष्य शिरसो देवि उत्तीर्या त्वं हरुहर्दुमं। कटुकं निम्बवृक्षं च ततो मधुरमारुह॥५॥ अथ गच्छ महादेवि देवलोकं सनातनं। ममापि देवलोको स्तु त्वत्प्रसादात्सुरेश्वरि॥६॥ ततस्तं कलशं पृष्ठभागे निनीय पृष्ठमनवलोकं स्वस्थानमागत्य आचम्य परिपूर्णतां प्रार्थयेत्। अद्य पूर्णतिथौ श्रवणादीनां पूजनं कृतस्य विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं श्रीविष्णोः प्रसादात्सन्निहित ब्राह्मणानां प्रसादात्परिपूर्णमस्तु॥ इति श्रवणिकापूजनविधिः॥ अथ पाथेयश्राद्धं॥ तच्च त्रयोदशो हि स्नात्वा पार्वणश्राद्धवद्द्विजान् दर्भं च दत्वा निधाय अक्रोधनैरित्यादि पाकप्रोक्षणांतं प्रकृतिवत्। देशकाल॰ अद्येत्यादि तिथौ अपसव्यं अमुकगोत्रस्यामुकशर्मणः मनुष्यलोकात्पितृलोकगमने सुखावाप्त्यर्थं अमुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानां वसुरुद्रादित्यस्वरूपाणां पाथेयश्राद्धं वैश्वदेवपूर्वकमर्घ्यपिंडसहितं युष्मदनुज्ञया अहं करिष्ये इति संकल्प्य श्राद्धं पार्वणवत्कुर्यात्। इदं पक्वान्नेन असंभवे आमेन वा कार्यं। आमश्राद्धविशेषास्त्वग्रे वदिष्यते॥ इति पाथेयश्राद्धं॥ ततः कर्त्ता अभ्यंगस्नानं कुर्यात्। स्नात्वा शुद्धे धौते वाससी परिधाय आसने उपविश्य देशकालौ स्मृत्वा सपरिवारस्य मे सर्वारिष्टोपशांतये देहे मायुरारोग्यसिध्यर्थं गणे

३३ श पूजनपूर्वकं स्वस्तिवाचनमहं करिष्ये इति संकल्प्य गणपतिं संपूज्य यथाशास्त्रं कलशस्थापनपूर्वकं स्वस्त्ययनं वाचयित्वा
आशिषो गृहीत्वा बंधुभिः सह भुंजीत। इत ऊर्ध्वं श्रीखंडधारणसुवस्त्रधारणतांबूलभक्षणादि कुर्यात्॥ इति त्रयोदशदिनकृ
त्यं॥ अथ मातृमरणे तस्या और्ध्वदैहिके विशेषः। सर्वत्रावनेजनपिंडदानादिषु स्त्रीलिंगो भवति। अमुकगोत्रां अमुकिप्रेतां त हेन ३
र्पयामीति तर्पणे। अमुकगोत्रे अमुकिप्रेते एष ते सतिलतोयांजलिरुपतिष्ठतामिति वा यथाचारं। अमुकगोत्रायाः अमुकि
प्रेतायाः प्रेतत्वविमुक्त्यर्थमिति सर्वत्रोल्लेखः। सपिंडीकरणे तु अमुकगोत्रायाः अमुकिप्रेतायाः प्रेतत्वविमुक्त्यर्थं अमुकगोत्रा
णां प्रेताभर्तृमातृपितामहीप्रपितामहीनां अमुकीऽदेविदानां वसुरुद्रादित्यरूपाणां सपिंडीकरणाख्यं श्राद्धं पार्वणैकोद्दि
ष्टरूपं युष्मदनुज्ञया अहं करिष्ये इति संकल्प्य। आसनदाने अमुकगोत्रायै प्रेताभर्तृमात्रे अमुकीदेविदायै वसुरूपायै इदमा
सनं स्वधा। हस्त०। एवं प्रेताभर्तृपितामह्यै अमुकीदेविदायै रुद्ररूपायै इदमासनं स्वधा। हस्त०। एवं प्रेताभर्तृप्रपितामह्यै आदि
त्यरूपायै इति। आवाहने अमुकगोत्राः प्रेताभर्तृमातृपितामहीप्रपितामह्यः अमुकीऽदेविदाः वसुरुद्रादित्यरूपाः आवाह
यिष्ये इति। अर्घसंयोजनं तु अमुकगोत्रायाः अमुकिप्रेतायाः प्रेतत्वविमुक्त्यर्थं अमुकगोत्राणां प्रेताभर्तृमातृपितामहीप्र
पितामहीनां अमुकिऽदेविदानां वसुरुद्रादित्यरूपाणां अर्घैः सह अर्घसंयोजनमहं करिष्ये इति संकल्प्य। अमुकगोत्रायाः अ ३३
मुकिप्रेतायाः अर्घस्य प्रथमांशः अमुकगोत्रे प्रेताभर्तृमातुः अमुकीदेविदायाः वसुरूपायाः अर्घेण सह संयुज्यतां। अमु

कगोत्रायाः अमुकिप्रेतायाः अर्घस्यद्वितीयांशः अमुकगोत्रे प्रेताभर्तृपितामह्याः अमुकीदेविदायाः रुद्ररूपाया अर्घेणसहसंयुज्य
तां। अमुकगोत्रायाः अमुकिप्रेतायाः अर्घस्यतृतीयांशः अमुकगोत्रे प्रेताभर्तृप्रपितामह्याः अमुकीदेविदायाः आदित्यरूपायाः अ
र्घेणसहसंयुज्यतां। एवंपिंडसंयोजनेपि। पिंडस्यप्रथमांशः। द्वितीयांशः। तृतीयांशः इत्येवं। वरुणरूपायाः। प्रजापतिरूपायाः। अग्निरू
पायाः इतिविशेषः। पिंडसंयोजनोत्तरं प्रेतशब्दनिषेधादक्षय्योदकदाने अमुकगोत्रायाः तद्भर्तृमातुः अमुकीदेविदायाइति। स्वधावा
चनेतद्भर्तृमातृभ्यइति। पुनः एकाया अद्य० तिथौ अमुकगोत्रायाः अमुकीदेविदायाः अमुकगोत्राणांतद्भर्तृमातृपितामहीप्रपिता
महीनांसपिंडीकरणं एकोद्दिष्टपार्वणविधिकृतस्यविधेरित्यादिदशाहादिविधौ विशेषोनिर्णेयइष्टव्यः। इतिमातृविषयेविशेषः। अ
थसहगमनविधिः। भर्त्तुमरणसमये आत्मनः प्राणान्संकल्पयेत्। देशकालौसंकीर्त्य आत्मनोमनुष्यानेकजन्मोपात्तसर्वपापक्ष
यपूर्वकरोममिताब्दसहस्रावधिभर्तृसाहित्येनस्वर्गवाससमातृपितृभर्तृकुलोद्धारकामा श्रीलक्ष्मीनारायणप्रीतये भर्त्रनुगमनंक
रिष्येइतिसंकल्प्य इदंवक्ति। देवैः संपादितोमह्यंपतिस्त्वंसर्वदेवतां। त्वयासहगमिष्यामि भर्त्तात्वंचान्यजन्मनि। इतिसंकल्प्य। ततःस्ना
नं। शक्त्यातिलधेन्वादीनांदानं। कुंकुमांजनादिभिः स्वात्मनमलंकृत्य पायसभोजनमत्रकेचिदाहुः। ततोबंधून्समस्तान्प्रणम्यवि
सृजेत्। हृष्टाभर्तृगमनमानसास्वगृहमद्रक्षैराशीर्वादपरावर्द्धापयेत्। अग्नेयुंक्ष्वेतिवडवारोहणं। अथवा [illegible] श्मशानंनीयमा
नंतुभर्त्तारमुपयातिया। पदेपदेयज्ञफलंलभतेनात्रसंशयइतिवाक्यात्पद्भ्यामेवगमनं। तीर्थेगत्वास्नानं। देशकालौसंकीर्त्यभ

ऽसहगमनार्थंस्नानमहंकरिष्ये। इतिसंकल्प्यस्नात्वावस्त्रपरिधानं अलंकरणं। स्वयंप्रतिनिधिनावासर्वपिंडदानमितिदेवः। ह
रिद्राकुंकुमांजनकंचुक्यादियुतपंचशूर्पीणांलक्ष्मीरोनोयणप्रीतयेदानमितिमहूपकृतो। अग्नेरर्घ्यदानमंत्रः। विविधुफलैरर्घ्यो
देयः। चितिस्थोभगवान्विष्णुरग्निरूपीसनातनः। पतिलोकप्रापणार्थंगृहाणार्घ्यंनमोस्तुते। अथस्तुतिः। त्वंब्रह्मात्वंचवैविष्णुस्त्वं
रुद्रस्त्वंप्रजापतिः। त्वंसूर्योवसवश्चाष्टौपरमात्मात्वमेवहित्वमेवशरणंविष्णोशरणंतुपतिर्ममा। स्वर्गेवानरकेत्वंहियत्रयत्रगमि
ष्यसि। तत्रतत्रसहंहृष्टेत्वयामेष्यामिमाशुभा। ब्रह्महत्यादिभिःपापैःस्त्वांमोक्ष्यामियमालया। अहंब्रह्माच्युहंविष्णुरहंवैसूर्यादि
कपतिः। आदित्यचंद्रावनिलोनलश्चद्यौर्भूमिरापोथअहर्निशाच। एतेचसर्वेममसाहसेनतुष्यंतुतेदेववराश्चसर्वे। ततः शिलांसं
पूज्यतामारुह्यफलपुष्पांजलिंगृहीत्वात्रिरग्निंप्रदक्षिणीकृत्यप्रार्थयेत। त्वमग्नेसर्वभूतानामंतश्चरसिसाक्षिवत्। त्वमेवदेवजा
नीषेनविदुर्यानिमानवाः। अनुगच्छामिभर्तारंवैधव्यभयपीडिता। सत्यमार्गप्रदानेननयमांभर्तुरंतिकं। इदंशरीरंसकलंमदीयंद
ग्ध्वाकृशानोकुरुदिव्यमाशु। तथाचभर्तुःकुरुदिव्यदेहंभर्तुःसमीपंभगवन्व्रजामि। किंमयानकृतंसाधुभवेद्यदिचतेनघा। इदं
शरीरमालिंग्यप्रविशामिहुताशनमिति। ततस्तृणकुटीप्रविश्यश्रोतंस्मार्त्तंवोकिंवाग्निमादायस्वयमेवकुटीप्रज्वालयेत्।
तस्याःप्राणोत्क्रमणोत्तरंपुत्रादिरधिकारीद्वयोरपिदाहंकुर्यात्। कुटीप्रवेशात्पूर्वमेवश्रोतपात्राणांस्मार्त्तपात्राणांचयजमा 
नस्येवशरीरेपूर्वोक्तप्रकारेणप्रतिपत्तिःकार्या। आज्याहुतिश्च॥ इतिसंक्षिप्तसहगमनविधिः॥ दाहोत्तरंद्वयोरुदकदानंपृथक्।

तत्तु पूर्वोक्तप्रकारेण। तिथ्येकैक एवावयवपिंडः। अमुकगोत्रयोः अमुकी अमुकप्रेतयोः अद्य मद्दिननिमित्तं शिरोवयवनिः
पत्त्ये पिंडदानमहं करिष्ये। अमुकगोत्रौ अमुकी अमुकप्रेतौ अवनेनिज्याथां। अमुकगोत्रयोः अमुकी अमुकप्रेतयोः शिरोवय
यनिःपत्त्ये अमुकगोत्रौ अमुकी अमुकप्रेतौ तृप्येतां। अस्थ्नां विशेषानवगमादेकत्रास्थिसंचयनं। तिथिभेदे पृथक् पिंडदानं।
तत्र प्रागुक्तवत्प्रयोगः। नवश्राद्धस्थानीयं महैकोद्दिष्टमपि पृथक्। सपिंडीकरणं च। पृथग् वृषोत्सर्ग इत्यस्मद्देशीयानामाचारः।
सपिंडीकरणे विशेषोऽभिधीयते॥ तत्र पूर्वं यथाविधिना पितुः सपिंडीकरणं कृत्वा पश्चान्मातुः सपिंडीकरणं पितृपितामहप्रपिता
महानां पिंडैः सह सपिंडीकरणं कर्त्तव्यमित्येकः पक्षः। तत्रैवं प्रयोगः। अमुकगोत्रायाः अमुकि प्रेतायाः प्रेतत्वविमुक्त्यर्थं अमु
कगोत्राणां प्रेताभर्तृपितृपितामहानां पिंडैः सह सपिंडीकरणं पार्वणैकोद्दिष्टविधिना अहं करिष्ये इति संकल्प्य। अमुकगोत्राय
प्रेताभर्त्रे अमुकशर्मणे इदमासनं स्वधा। एवं प्रेताभर्तृपित्रे। प्रेताभर्तृपितामहाय। अर्घसंयोजने तु अमुकगोत्रायाः अमुकि प्रे
तायाः प्रेतत्वविमुक्त्यर्थं अमुकगोत्राणां प्रेताभर्तृपितृपितामहानां। वसुरुद्रादित्यरूपाणां अर्घैः सह अर्घसंयोजनमहं करिष्ये
इत्युक्त्वार्घसंयोजनं कुर्यात्। अमुकगोत्रायाः अमुकि प्रेतायाः अर्घस्य प्रथमांशः अमुकगोत्रप्रेताभर्तुः अमुकशर्मणो वस्वा
त्मनः अर्घेण सह संयुज्यतां। एवं प्रेताभर्तृपितुः अमुकशर्मणो रुद्रात्मन इति। प्रेताभर्तृपितामहस्य अमुकशर्मणः आदित्यात्म
नः अर्घेणेति। तेषामर्घदाने तु अमुकगोत्रप्रेताभर्तः अमुकशर्मन्। भर्तृपितः। भर्तृपितामह। एवमवनेजनपिंडदानादिषु। पिं

३५ उसंयोजने ऽर्घसंयोजनवत्॥ पिंडस्य प्रथमांशः॥ द्वितीयांशः॥ तृतीयांश इति ज्ञेयां॥ वरुणादीनांउच्चारस्तत्र॥ अमुकगोत्रस्य तद्भर्तुः
अमुकशर्मणो दत्तमिदं॰ तद्भर्तुः पितुः॥ तद्भर्तुः पितामहस्य॥ अमुकगोत्रेभ्यस्तद्भर्तृभ्यः॰ तद्भर्तृपितृभ्यः॥ तद्भर्तृपितामहेभ्यः॰।
पुनः षष्ठ्यां अद्य॰ तिथौ अमुकगोत्रायाः अमुकीदेविदायाः अमुकगोत्राणां तद्भर्तृपितृपितामहानां सपिंडीकरणांगस्य
पार्वणैकोद्दिष्टात्मकस्य विधेर्यन्यून॰॥ अयं सपिंडीकरणप्रकारः पृथकु पृथकु पतिवर्गेण सह सपिंडीकरणो ज्ञेयः॥ अथ प
35 क्षांतरेण सपिंडीकरणप्रकारः॥ अस्मिन्पक्षे वैश्वदेविकश्राद्धार्थमेको द्वौ वा विप्रौ॥ भर्तुः स्थाने एकं तस्याश्च स्थाने एकं भर्तुः
पित्रादीनां च त्रीनेवं समुदायेन षट्सप्त वा विप्रानुपवेश्य श्राद्धमारभेत॥ तत्र विश्वेषां देवानां भर्तृपित्रादीनां च प्रकृतिवत् प्रे
तयोस्तु गतोसि दिव्यं लोकं त्वमित्यादि तत्र प्रेतशब्दवति मंत्रे स्त्रीलिंगे ऊहो न भवतीति केचिदाहुः॥ एवमेकोद्दिष्टद्वयोपक्रमेण
पूर्वं पुरुषस्य पश्चात्स्त्रियाः संकल्पे तु॥ अमुकगोत्रायाः अमुकिप्रेतायाः प्रेतत्वविमुक्त्यर्थं अमुकगोत्रस्यामुकप्रेतस्य पिंडेन
सह सपिंडीकरणे॥ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थं अमुकगोत्राणां प्रेतपितृपितामहप्रपितामहानां वसुरुद्रादि
त्यरूपाणां पिंडैः सह सपिंडीकरणं पार्वणैकोद्दिष्टद्वयसहितं श्राद्धमहं करिष्य इति॥ अमुकगोत्राय अमुकप्रेताय आसनमि
दं ते उपतिष्ठतां॥ अमुकगोत्रायै अमुकिप्रेतायै आसनमिदं ते उपतिष्ठतां॥ विश्वेषां देवानामेकं प्रेतयोर्द्वयं पितामहादीनां त्र ३५
यमित्येवं षडर्घपात्राणि यासाद्य यथावज्जलेनापूर्य वैश्वदेविकपात्रे यवान्प्रेतयोः पात्रद्वये तिलान्हुवता मंत्रेण ब्राह्मिण्य पार्व

णां पितामहादीनां पात्रेषु तिलान्प्रक्षिपेत्॥ ततो विश्वेभ्यो देवेभ्योऽर्घं दत्वा प्रेतार्घपात्रात्सशेषं प्रेतायाऽर्घं दत्वा प्रेतायाश्चार्घं
सशेषं तस्यै दत्वा सव्येनाचम्य सुसंप्रोक्षितमित्यादि कृत्वा अद्येत्यादि तिथौ अपसव्यं अमुकगोत्रायाः अमुकि प्रेतायाः प्रेत
त्वविमुक्त्यर्थं अमुकगोत्रस्यामुकप्रेतस्यार्घेण सहार्घसंयोजनं अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्यर्थं अमुकगोत्रा
णां प्रेतपितृपितामहप्रपितामहानां अमुकामुकशर्मणां वसुरुद्रादित्यस्वरूपाणां अर्घैः सह अर्घसंयोजनमहं करिष्ये। अमुकगोत्रायाः अमुकि
प्रेतायाः अर्घः अमुकगोत्रस्यामुकप्रेतस्यार्घेण सह संयुज्यतामित्युक्त्वा प्रेतपात्रे निःशेषमासिंचेत्॥ ततः प्रेतार्घपात्रगतमु
दकं तत्पित्रादिपात्रेषु पूर्ववत्संयोजनीयं। एवं भर्त्रे तत्पत्न्यै प्रेतपित्रादिभ्यश्चेति पंच पिंडान्दत्वा प्रत्यवनेजनादि प्रेततंत्रं कृत्वा
समाप्य पत्नीपिंडं संपूर्णं भर्तृपिंडेन सह संयोजयेत्॥ अमुकगोत्रायाः अमुकि प्रेतायाः पिंडः अमुकगोत्रस्यामुकप्रेतस्य पिं
डेन सह संयुज्यतां। ततः संयोजितं भर्तृपिंडं त्रेधा विभज्य भागत्रयं प्रेतपित्रादीनां पिंडेषु पूर्ववत्संयोजयेत्॥ सर्वमन्यत्पूर्व
वत्॥ न च पितृभावापन्नेनैव सह सपिंडनं न प्रेतेनेति नियमः। पापिष्ठमपि शुद्धेनेति पूर्वं कथा कथात्॥ यदि मृतस्य भिन्नमातृका वै
अनेके पुत्राः स्युस्तदा सर्वज्येष्ठ एव पितुरौर्ध्वदैहिकं कुर्यात्। अन्यथा रूढायास्तु कनीयान पिसा हात्पुत्र एव सर्वं प्रथय कुर्यात्।
न सपत्नीपुत्रो ज्येष्ठ एव। तस्मिंस्तन्निरूपितपुत्रत्वाभावात्॥ दाहस्त्वेकस्यामेव। चेतो। सपिंडनं तु ज्येष्ठेन पितुरेव केवलं तत्पित्रा
दिभिः सह कर्तव्यं। कनिष्ठेन तु स्वमातुः पितृसपिंडनदिन एव पितुः सपिंडीकरणानंतरं सपिंडीकरणं कर्तव्यं स्वपित्रादिभिः

३८ सहात्रमातुरेकोद्दिष्टंपित्रादीनांपार्वणमेव।एवंबहूनामपिस्त्रीणांअन्वारोहणेसर्वंज्ञेयं।तत्रसपुत्रायांपुत्रएवपृथकु
सापिंडनंकुर्यात्।अपुत्रायास्तुज्येष्ठःकुर्यात्।तत्रतावत्येकोद्दिष्टानिसर्वासांविवाहक्रमेणभर्तृपिंडेनसहसंयोजनं॥इतिश्रु
त्यश्रीविश्वामात्मजशिवरामविरचितेश्राद्धचिंतामणौमरणावस्थामारभ्यसपिंडीकरणांतकृत्यप्रयोगप्रकाशःसमाप्तः॥
॥अथविधानानि॥तत्ररजस्वलामरणेअद्येत्यादिअमुकगोत्रायाअमुकस्याःप्रेतायाइतिवारजस्वलामरणप्रत्यवा
36 यपरिहारार्थंऔर्ध्वदेहिकयोग्यत्वार्थंचचांद्रायणत्रयंप्रायश्चित्तपूर्वकंशूर्पेणाष्टोत्तरशतस्नानानिकारयिष्येइतिसं
कल्प्यब्राह्मणवचनेनप्रत्याम्नायद्वाराचांद्रायणत्रयंकृत्वायवपिष्टेनप्रेतमनुलिप्यस्वयंस्नात्वाशूर्पोदकेनशतवारंस्ना
पयेत्।ततःप्रेतंप्रक्षाल्यभस्मगोमयमृत्तिकाकुशोदकपंचगव्यशुद्धोदकैःस्नापयेत्।उपास्मैगायतानरइत्यादिपावमा
नीभिःसस्यमृष्टिरित्यादित्र्यृचेनआपोहिष्ठेत्यादितिसृभिःकयानश्चित्रइत्यादितिसंस्नाप्यपूर्ववस्त्रंपरित्यज्यवस्त्रांतरावृतां
कृत्वाविधिनादहेत्।यद्वा।रजस्वलायाःसूतिकायाश्चमरणानंतरंमलंप्रक्षाल्यस्नापयित्वाकाष्ठवद्दग्ध्वाअस्थीनिवि
धिनादहेत्।इतिरजस्वलामरणेदाहविधिः॥अथसूतिकामरणेदाहविधिः॥अद्येत्यादिअमुकगोत्रायाअमुकिप्रेतायाः
सूतिकामरणनिमित्तप्रत्यवायपरिहारार्थंचांद्रायणत्रयप्रायश्चित्तपूर्वकंशूर्पेणाष्टोत्तरशतस्नानानिकारयिष्येइतिसं ३८
कल्प्यप्रायश्चित्तंब्राह्मणवचनात्कृत्वापूर्ववत्सुतशूर्पैःस्नापयित्वाकुंभेजलमादायपंचगव्यंतत्रहिरण्वाआपोहिष्ठीयाभिर्वा

मस्त्वा दिभिः कयानश्चित्र इत्यादितिसृभिरेतोन्विंद्रमित्यादितिसृभिः अमित्राय प्रार्यम्णे यदाकदाचमीढुषे घृतवती भुवनाना
इत्यादिवारुणीभिः पुण्यर्ग्भिर्यथाभिमंत्र्य पूर्वोक्तमंत्रैः संस्नाप्य वस्त्रांतरावृतां कृत्वा विधिना दहेत् जननाशौचमध्ये मरणे दिनवि
शेषेण प्रायश्चित्तविशेषो निर्णये द्रष्टव्यः॥ इति सूतिकामरणे दाहविधिः॥ सगर्भामरणे प्येवमेव प्रायश्चित्तादि सर्वं भवति। तत्रो
दरस्थं गर्भं निःकाश्य प्रायश्चित्ताचरणपूर्वकं शतशूर्पैः स्नापनादियुक्तं वक्ष्ये तथैव दाहः। तस्याः शुद्ध्यर्थं त्रयस्त्रिंशत्कृच्छ्राणि
प्रायश्चित्तं अद्येत्यादि अमुकगोत्रायाः अमुकिप्रेतायाः सगर्भामरणजन्यप्रत्यवायपरिहारार्थं त्रयस्त्रिंशत्कृच्छ्राणि अमुकप्र
त्याम्नायेनाहमाचरिष्ये इति संकल्प्य शूर्पैः स्नापनादियुक्तवत्॥ इति सगर्भामरणे दाहविधिः॥ अथ पंचकमृतस्य दाहविधिः॥ आ
चम्य तत्कर्णी प्राणानायम्य अद्येत्यादितिथौ अपसव्यं अमुकगोत्रस्यामुकप्रेतस्य धनिष्ठादिपंचकमरणजनितवंशारिष्टनि
रासार्थं पंचकमरणविधिं करिष्ये इति संकल्प्य कुशमयपुत्तलकपंचककरणं। ऊर्णासूत्रेणावेष्टनं। यवपिष्टेनानुलेपनं। ततो
दक्षिणस्कंधस्थं पुत्तलकपंचकं संन्यस्य नामनिर्देशं कुर्यात्। प्रेतवाहः। प्रेतसखः। प्रेतपः। प्रेतभूमिपः। प्रेतहर्त्ता। ततो मंत्रैरभिमंत्र
णं। मंत्राश्च। इदं वसो सुतमंधः। यदाकदाचमीढुषे। ईशानइमा भुवनानि ईयसे। अमित्वा शूर नोनुमो। शुक्रं ते अन्यत्। ततः पुष्पा
द्यैः प्रतिमा अलंकृत्य दाहसमये प्रेतोपरि न्यसेत्। प्रथमां शिरसि। द्वितीयां नेत्रयोः। तृतीयां कुक्षौ। चतुर्थीं नाभौ। पंचमीं पादयोः।
ततस्तूष्णीं माज्यं संस्कृत्य तदुपरि ताभ्यो नाममंत्रैर्घृताहुतीर्जुहुयात्। प्रेतवाहाय। प्रेतसखाय। प्रेतपाय। प्रेतभूमिपाय। प्रेतहर्त्रे। स्वा

स्वाय

३७ हांताः पंचाज्याहुतयः। ततोजलपात्रेणपरितोजलधारां दत्वाप्रेतस्यमुखेपंचरत्नंनिक्षिप्य नाकेसुपर्णमितित्र्यंबकमितिमंत्रा
37 वृतिमासुप्रत्येकमाहुतीर्जुहुयात्। ततस्तद्दग्नौ आज्याहुतित्रयंजुहुयात्। वहवपांजातवेदइतिप्रथमा। इदंजातवेदसेनमम।
जातवेदोवपयागच्छदेवान्इतिद्वितीया। त्यागःपूर्ववत्। यत्कुसीदमप्रदत्तमितितृतीया। इदमग्नयेनमम। ततोविधिनाप्रेतंदहेत्।
॥इतिपंचकमृतस्यदाहविधिः॥ अथपंचकमृतस्यशांतिः। साचएकादशेद्वादशेवाहनिकर्त्तव्या। तीर्थेगत्वास्नात्वाअ
हतेवाससीपरिधायसुपीठेप्राङ्मुखउपविश्यआचम्यप्राणानायम्यअद्येत्यादितिथ्यौअपसव्यंअमुकगोत्रस्यामुकप्रेतस्य
धनिष्ठादिपंचकमरणसूचितवंशारिष्टनिरासार्थंयथाशक्त्यातच्छांतिमहंकरिष्यइतिसंकल्प्यआचार्यंवृणुयात्। अमुकगोत्रंअमु
कप्रवरंसामवेदस्यकौथुमीशाखाध्यायिनंअमुकशर्माणंपंचकमरणजन्यदोषनिरासार्थंशांतिकर्मणाहंयक्ष्येतत्रत्वामहं
माचार्यंवृणे। एवंत्वामहंब्रह्माणंवृणे। त्वामहमृत्विजंवृणइतिसर्वान्वृत्वापाद्यादिभिःसंपूज्यसमाचारात्स्वपादौप्रक्षाल्याचम्य
प्राणानायम्यगायत्र्यादिभिर्मंत्रैर्जलमभिमंत्र्यतेनोदकेनस्वलिकूपूजोपहारसंप्रोक्ष्यस्वलिकूपूजोपहाराणांपवित्रतास्तु।
देशकाल० अद्येत्यादितिथ्यौवृतानांब्राह्मणानामासनादिभिःपूजनमहंक०। आचार्यायेदमासनं। ब्रह्मणेइदमासनं। ऋत्वि
ग्भ्यइमान्यासनानिसंप्रददेनमम। ततश्चंदनादिभिःसंपूज्ययथादत्तंगंधाद्यर्चनंवृतेभ्योब्राह्मणेभ्योहंसंप्रददेनमम। अत्रगंध ३७
पुष्प०प्रदानं। इदंवो० अस्यवरणश्राद्धसांगतासिध्यर्थंदास्यमानोदक्षिणांवृतेभ्यो०। वरणश्राद्धकृतस्यविधे०। फलहस्तःप्रा
१अस्यवरणश्राद्धस्यार्चनविधे०। आचमनं। दास्यमानंतृप्तिपर्यंतंभोजनंवृतेभ्यो०संप्रदास्ये। सुसंप्रो०। अपसव्यं। अमुकगोत्रस्यामु
कप्रेतस्यपंचकमरणजन्यदोषनिवृत्तिः 

र्घयेत्॥ अस्य यागस्य॰ ततआचार्यस्थंडिले पंचभूसंस्कारान् कृत्वा वरदनामानमग्निं प्रतिष्ठापयामि इत्यग्निं संस्थाप्य समिधं हु
त्वा भूजपपरिसमूहने कृत्वा ब्रह्माणं यथाविधिना उपवेश्य आगत्य पात्रासादनं घृतवत्कुर्यात्॥ होमार्थं तिलयवव्रीह्याद्याघारासाद्यग्ना
यत्र्याभिमंत्रितोदकेनासादनक्रमेण संप्रोक्ष्य सजलां चरुस्थालीमग्नावधिश्रयेत्॥ पश्चाद्दर्भैः खंडस्तरणं॥ तत्रोलूखलमुसला
द्यासाद्य निर्वापं कुर्यात्॥ वसुभ्यस्त्वा जुष्टं निर्वपामि॥ वरुणाय त्वा॰ अजैकपदे त्वा॰ अहिर्बुध्न्याय त्वा॰ पूष्णे त्वा॰ अश्विनूलीमित्यादि॥
स्य पवित्रायां स्थाल्यां तंडुलानावपः॥ ततः स्थंडिलादैशान्यां दिशि स्थंडिलांतरे वस्त्रमास्तीर्य तदुपर्यष्टदले श्वेततुरत्रं कृत्वा उदकुंभं संस्थ
तयान हृत्त्रं पंचकं स्थापयेत्॥ धनिष्ठां स्थापयामि॥ शतभिषजं॰ पूर्वाभाद्रपदं स्था॰ उत्तराभाद्रपदं स्था॰ रेवतीं स्था॰॥ ततो यथावि
धिना उदकुंभसंस्थितया पंचकलशान् संस्थाप्य तेषु प्रत्येकमश्युत्तारणपूर्वकं मूर्तीः संन्यस्य तासु देवानावाहयेत्॥ इदं वसो सुतमं
ध इति मंत्रांते वसव इहागच्छत इह तिष्ठत इति वसूनावाह्य द्वितीयकलशे यदाकदा च मीढुष इति वरुण इहागच्छ इह तिष्ठ इति वरुणं
तृतीयकलशे ईशान इमा भुवनानि ईयसे इति अजैकपत् इहागच्छ इह तिष्ठ॥ चतुर्थकलशे अभिलाभ्यश्र नोनुम इति अहिर्बुध्न इ
हागच्छ इह तिष्ठ॥ पंचमकलशे शुक्रं ते अन्यद्यजतं ते इति पूषन्निहागच्छ इह तिष्ठ॥ एवं वस्वादीनावाह्य प्रतिष्ठामंत्रेणोपस्थित्वा अद्य मा
समस्तपुण्यकालावयवयोगेषु एवं॰ तिथौ कलशस्थप्रतिमासु वसुवरुणाजएकपादहिर्बुध्न्यपूषणः सुप्रतिष्ठिता वरदा भव
तु॥ ततः स्वस्वमंत्रेण वस्वादीनां सर्वोपचारैः पूजयेत्॥ ततो वस्वादीमंत्राणां जपः॥ जपनिवेदनं॥ अनेन जपेन वसवः प्रीयंतां॥ वरुणः

३८ प्रीयतां। अजैकपात्प्रीयतां। अहिर्बुध्न्यः प्रीयतां। पूषा प्रीयतां। ततः श्रृताभिघारणाद्याज्यभागांतं प्रकृतिवत्। ततः प्रधानहोमश्चतुर्गृ
हीतेन प्रकृतिवत्। वसुभ्यः स्वाहा। इदं वसुभ्यो न मम। वरुणाय स्वाहा। इदं वरुणाय न मम। अजैकपदे स्वाहा। इदमजैकपदे न मम।
अहिर्बुध्न्याय स्वाहा। इदमहिर्बुध्न्याय न मम। पूष्णे स्वाहा। इदं पूष्णे न मम। ततो वस्वादीनां मंत्रैरेकैकस्याष्टावष्टावाज्याहुतयो हो
तव्याः। ततो दधिमध्वाज्यलिप्ताः एकैकस्याष्टावष्टौ स्वस्वमंत्रेण समिधो होतव्याः। ततस्तिलादिभिरेकैकस्याष्टोत्तरसहस्रमष्टोत्तर
38 शतमष्टाविंशतिं वा यथाशक्त्या होमः। ततः शांत्यर्थं यमादिनाममंत्रैर्होमः। यमाय स्वाहा। धर्मराजाय०। मृत्यवे०। अंतकाय०। वैव
स्वताय०। कालाय०। सर्वभूतक्षयाय०। औदुंबराय०। दध्नाय०। नीलाय०। परमेष्ठिने०। वृकोदराय०। चित्राय०। चित्रगुप्ताय०। एतैश्चतुर्दश
नामभिः शक्त्या होमः। होमांते वस्वादीन्संपूज्य नमस्कुर्यात्। ततो व्याहृतिचतुष्टयं हुत्वा स्विष्टकृद्धोमः। ततः पूर्णाहुतिः। ततः कल
शोदकैरभिषेकः। सुसंप्रोक्षितमस्त्वित्यादि। ब्राह्मणभोजनसंकल्पः। कृतस्यास्य शांतिकर्मणः सांगतासिध्यर्थं ब्राह्मणान्भो
जनेनाहं तर्पयिष्ये। ततः कांस्यपात्रस्थसर्षपतैले सुखं वीक्ष्य सहिरण्यं ब्राह्मणाय दद्यात्। इदं सोयं कांस्यपात्रं सतैलं सहिर
ण्यं अमुकगोत्रस्यामुकप्रेतस्य पंचकमरणजन्यदोषपरिहारार्थं तुभ्यमहं संप्रददे न मम। दक्षिणां च दद्यात्। माषमुद्गयव
व्रीहिप्रियंग्वादिधान्यानि प्रजापतिदैवतानि अमुकगोत्रस्यामुकप्रेतस्य पंचकमरणाद्युत्क्राब्रह्मविष्णुमहेशेंद्रवरुणप्री ३८
तये ब्राह्मणेभ्योहं संप्रददे न मम। एवं तिलदानसंकल्पः। गोदानस्य। सुवर्णस्य च। ततः कलशानां दानं। इमं कलशं सजलं स

वस्त्रं सहिरण्यं सफलं अमुकगोत्रस्यामुकप्रेतस्य पंचकमरणजन्यदोषपरिहारार्थं अमुकगोत्रायामुकशर्मणे तुभ्यमहं
संप्रददे न मम। अनेन कलशदानेन वसवः प्रीयंतां। एवं वरुणः प्रीयतां। अजैकपात्प्रीयतां। अहिर्बुध्न्यः प्रीयतां। पूषा प्रीयतां।
ततो व्याहृतित्रयहोमादिस्विष्टकृत्स्वाहांतं शेषं समाप्य वामदेव्यं गायेत्। अद्य पू० तिथौ अमुकगोत्रस्यामुकप्रेतस्य पंच
कमरणजन्यदोषपरिहारार्थं कृतस्य शांतिकर्मणो विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं श्रीविष्णोः प्रसादात्परिपूर्णमस्तु। अनेन
कर्मणा कृतेन अमुकगोत्रस्यामुकप्रेतस्य पंचकमरणसूचितवंशारिष्टनिवृत्तिः एकादशाहिककर्मकरणयोग्यतावा
प्तिः॥ इति पंचकविधानं समाप्तं॥ अथ उत्सन्नाग्नेर्दाहार्थं प्रेताधानप्रयोगः॥ तत्रादावुत्सन्नाग्नेस्तद्दोषपरिहारार्थं प्राय
श्चित्तं शक्त्या कार्यं। ततः सर्वं कर्मापसव्येन दक्षिणामुखेन कार्यं। प्रेतस्य स्वाम्यासने स्थापनं। अग्न्यागारकरणं। गार्हपत्यादि
स्वरूपत्रये सकृत्सकृत्संस्काराः। गार्हपत्यस्य पश्चादरणीसन्न्यासे स्याग्नये जुहुतो मांसकामाः संकल्पयंते यजमानमांसं आ
यंतु ते हविषे सादनाय ते स्वर्गं लोकमिमं प्रेतं नयंतु। इति मंत्रेण मथित्वा तूष्णीं गार्हपत्यस्थापनं। ततो गार्हपत्यादाहवनी
यमुद्धृत्य आज्यं संस्कुर्यात्। आज्यस्थाल्यामाज्यप्रक्षेपः। गार्हपत्येऽधिश्रयणं। स्रुक्स्रुवोः संमार्गः। आज्योद्वासनं। पवित्रा
भ्यामुत्पवनं। अवेक्षणं। स्रुचि द्वादशगृहीतं गृहीत्वा आहवनीये तूष्णीं जुहुयात्। ततो गार्हपत्याद्दक्षिणाग्निमुद्धृत्योखाधि
श्रयणादि दाहांतं कुर्यात्। एवं पत्न्याः पश्चान्मरणेऽपि ज्ञेयं। उत्सन्नाग्नेररणिसद्भावे एवं॥ इति प्रेताधानप्रयोगः॥ अथाग्नेस

३९ मारूढेयजमानेमृतेकृत्यं।प्रेतस्यपाणिनाअरण्योःस्पर्शंकृत्वाउपावरोहणमंत्रंपठेयुः।उपावरोहजातवेदद्रूसंप्रेतंस्वर्गा
यलोकायनय।आयुःप्रजांरयिमस्मासुधेहि।प्रेताहुतिंचास्यजुषस्वस्वाहा।इतिमंत्रंपठित्वाग्निंमथित्वातूष्णीमाहवनीयमु
द्धृत्याज्यंपूर्ववत्संस्कृत्यप्राग्गृहीतंतूष्णीमाहवनीयेहुत्वोपाधिश्रयणादिकुर्यात्।।अथाग्निषुशांतेष्वरण्योर्नाशेसत्यामितो
मरणेन्येअरणीआनीयतयोरुपरिप्रेतहस्तंनिधायअयंतेयोनिरितिसमारोपमंत्रंपठित्वाअग्निंमथित्वामृताधानंकृत्वोपा
39 धिश्रयणादिकुर्यात्।।सर्वेषांसंतापजाग्नीनांनाशेगार्हपत्यंमथित्वाआहवनीयदक्षिणाग्नीविहृत्यप्रायश्चित्तंहुत्वापुनरुपा
धिश्रयणंकुर्यात्।अत्रानादिष्टंप्रायश्चित्तमपसव्येनहोतव्यं।एकस्यगार्हपत्यस्यनाशेतंमथित्वानादिष्टंहुत्वोपांपूर्ववदधि
श्रित्योत्पादयेत्।आहवनीयदक्षिणाग्न्योरेकैकस्यनाशेद्वयोर्वानाशेअनादिष्टहोमार्थमुद्धृत्यतद्धुत्वापुनरुद्धरेत्।नपुनरुपा
धिश्रित्यसंतापेनोपशांतमुत्पादयेत्।।वर्षादिनाचिताग्निशमनेविहितारणिपात्रादिकाष्ठेनार्द्धदग्धेनमंथनं।ततोदाहः।त
दलाभेन्येनकाष्ठेनदग्धशेषेणमंथनंकृत्वाशेषस्यदाहःकार्यः।अथवाशेषस्याप्सुप्रक्षेपः।अथवालौकिकेग्नौभूर्भुवःस्वःस्वा
हेतिस्रुवेणस्रुचावाघृताहुतिंहुत्वातेनलौकिकाग्निनादाहः।।इतिआहिताग्नेर्दाहोपयुक्तकृत्यप्रयोगः।।अथप्रोषितमृतस्यकृ
त्यप्रयोगः।।तत्रविदेशेमरणेश्रवणानंतरंमृतशरीरस्यास्थ्नांवाअग्निभिर्विधदाहपर्यंतंप्रतिदिनंगृहेसायंप्रातर्होमःपुत्रादिनाका ३९
र्यः।।अथमृताग्निहोत्रस्यप्रयोगः।तत्रापसव्येनदक्षिणामुखेनसर्वंकर्तव्यं।स्रुक्स्रुवसंस्कारात्आहवनीयखरएव।आहव

नीयस्योद्धरणं। न दक्षिणाग्नेः। न कूर्चस्थापनं। आहवनीयस्यैव पूर्ववत् आरभ्य दक्षिणसंस्थं परिस्तरणं। तत्र पूर्वापरदिशोर्द
क्षिणाग्राणि दर्भास्तरणानि। दक्षिणोत्तरयोः प्रागग्राण्येव। आहवनीयस्यैवाग्रदक्षिणं पर्युक्षणं। निवान्यवत्सा मेध्या वै इति प्रैषः।
तस्या दोहनं। गार्हपत्यादुल्मुकं भस्म दक्षिणतो निरूह्य पूर्वेणाहवनीयं दुग्धमाहृत्य तस्मिन्नुल्मुके भस्मन्यधिश्रयेत्। अवज्योतनासे
कौ न भवतः। भूमिसंय[illegible]नमेव दक्षिणतो हृत्वा दक्षिणत एव सकृदुद्वासनं न त्रिः। स्रुक्स्रुव प्रतपनं। पाणिना संमार्गः। पुनः प्र
तपनं। नोन्नेष्यामीति प्रैषः। सकृदुन्नयनं। अधोमुखेन स्रुवेण स्रुचि प्रदेयः। स्रुग्दंडस्याधःप्रदेशे समिधं धारयन् दक्षिणतो
गार्हपत्यादाहवनीयं प्रतिहरति। आहवनीयसमीपे उत्तरतो दक्षिणामुख उपविश्य आहवनीये तूष्णीं दक्षिणाग्रां समिध
माधाय पितृतीर्थेनान्नयुक्तया स्रुचा तूष्णीं सकृदेव सर्वं पयः समिधि उपरि प्रक्षिपति। अत ऊर्ध्वं प्रकंप्येत्यादिकमपि न भवति।
समाप्तमेतत्कर्म। एवं मृतशरीरस्यास्थ्नां वा आगमनपर्यंतं सायंप्रातः होमः पुत्रादिभिः कर्त्तव्यः। देशांतरे मृतस्य शरीरं
तैलद्रोण्यामवधाय शकटेनाहरंति। अतिदूरदेशे चेन्निर्मथ्येन वा दग्ध्वा कृष्णाजिनेस्थीन्युपनह्याहतेन वाससा बद्ध्वा दी
र्घवंशे प्रबध्याऽनिदधानाः प्रयतामन्मयभाजना आहरंति। तानि च ग्राममर्यादायां स्थापयंति शरीरमस्थीनि वा। ततः
शरीरे आगते गृहादग्नीन् यात्राणि च सीमायां स्थापितशरीरस्य समीपे अस्थिसमीपे वा नीत्वा विदेशमरणनिमित्तं पाप
क्षयमष्टौ कृच्छ्रान् वास्मृत्युक्तमपि प्रायश्चित्तं पर्युषितत्वदोषनिवृत्त्यर्थं कृच्छ्रत्रयं च पुत्रादिभिर्दाहाद्यधिकारप्राप्त्यर्थं पू
र्वकं कर्त्तव्यं। ततः संतापज्ञानाग्नीनुत्पाद्य उत्क्रांति श्राद्धादि पूर्ववद्दाहं कुर्यात्। अस्थिदाहे तु आहृतान्यस्थीनि कृष्णाजि

८० नस्योपरि पुरुषाकारेण स्थापयित्वा मेषरोमभिस्तान्याच्छाद्य गव्येनाज्येनास्थीन्यभ्यज्य प्रायश्चित्तपूर्वकमग्निविहरणा
दि स्नानांतः पूर्ववद्दाहः कार्यः ।। स्त्रियाश्च विदेशमरणे विशेषो निर्णये द्रष्टव्यः ।। इति घोषितमृतस्य कृत्यप्रयोगः ।। अथ प
र्णनरदाहप्रयोगः ।। तीर्थादौ गत्वा स्नानादिकं कृत्वा विष्णुं संपूज्य विदेशमरणजन्यदोषपरिहारार्थमष्टौ कृच्छ्रान् प्रायश्चि
त्तत्वेन कुर्यात् । देशकालौ संकीर्त्य अमुकस्य विदेशमरणजन्यप्रत्यवायपरिहारार्थं अष्टौ कृच्छ्रान् अमुकप्रत्याम्नायेना
40 हमाचरिष्ये इति संकल्प्य । तदानीमेव ब्राह्मणेभ्यो यथाशक्त्यनुसारेण प्रत्याम्नायद्रव्यं दद्यात् । असंभवे संकल्पमात्रं कृ
त्वान्यत्कुर्यात् । पुनर्देशकालौ संकीर्त्य अमुकस्य देशांतरमृतस्य वैधदाहार्थं पर्णवृंतादिभिर्नराकृतिमहं करिष्ये इति संक
ल्पं कुर्यात् । ततः शुद्धायां भूमौ कृष्णमृगचर्मास्तीर्य तदुपर्येकं शरं दक्षिणोत्तरायतं निधाय तदुपरि पलाशवृंतानि न्यसेत् ।
शिरसि चत्वारिंशत् ४० ग्रीवायां दश १० बाह्वोः प्रत्येकं पंचाशत् १०० करांगुलीषु सर्वासु दश १० उरसि विंशतिः २० जठरे त्रिंशत्
३० शिश्ने चत्वारि ४ अंडयोस्त्रयस्त्रयः ६ ऊर्वोः प्रत्येकं पंचाशत् १०० जंघातः पादतलांतं यावत्तयोः प्रत्येकं पंचदश ३० सर्वासु
पादांगुलीषु दश १० एवं षष्ठ्याधिकशतत्रयमितैः पर्णवृंतैः शरीरं निर्माय ऊर्णासूत्रेण शरेण सह संवेष्ट्य बध्वा जलोडितयव
पिष्टेनानुलिंपेत् । तदुपरि शुद्धां मृदमालिंपेत् । ततः शक्तौ सत्यां वक्ष्यमाणान्यपि कार्याणि । शिरसि नालिकेरं वर्तुलं तुंबं वा ।
ललाटे कदलीपत्रं दंतेषु दाडिमीबीजं । कर्णे कंकणं तालपत्रं वा । नेत्रयोः कपर्दौ । नेत्रकोणे सिंदूरं । नासिकायां तिलपुष्पं । ना ८०
भौ कमलं । आम्रफलं वा स्तनयोर्गुडद्वयं । वाते मनःशिला । पित्ते हरितालं । कफे समुद्रफेनं । रुधिरं मधु । पुरीषं गोमयं । मूत्रे गो

मूत्रं।रेतसि पादं।वृषणयोर्वृंताकद्वयं।शिश्ने गृंजनं।केशेषु वनसूकरजटा।लोमसु ऊर्णा।मांसस्थाने यवपिष्टेन लेपनं।
ततः पंचगव्येन पंचामृतेन च स्वस्वमंत्रेण च प्रोक्षणं।गायत्र्या गोमूत्रेण।गावश्चिद्घ्वा समन्यव इति गोमयेन।आप्यायस्वे
ति गोक्षीरेण।दधिक्राव्णो इति गोदध्ना।घृतवती इति गोघृतेन।ततः पयो दधि घृतैः पूर्वोक्तमंत्रैरेव पुनः प्रोक्षणं।सपूर्व्येति
मधुना।स्वं संमित्रो अर्यमेति शर्करया।ततः आपो हि ष्ठेत्यादि तिसृभिः पवित्रं ते इत्यादि तिसृभिः इमं मे वरुण इति मंत्रैः कुशो
दकेन प्रोक्षणं।ततो वस्त्रं परिधाप्य यज्ञोपवीतद्वयं मंत्रेण परिधापयेत्।ततो गंधपुष्पादिभिस्तं भूषयित्वा मंत्रेण प्राणप्रवे
शं भावयेत्।प्राणा शिशुर्महीनामिति सूक्तं पठित्वा।यत्ते यमं वैवस्वतं मनो जगाम दूरगा स्तन्म आवर्त्तया पुनर्जीवातवे नम
र्त्तवे यो अरिष्टतातये येनाहा।जिमजयद्धिवच्च येन श्येनः शकुनः सुपर्ण्येयदाहुश्च सुरदितावनंतः सोमान्द्रो मयितद् च
धातु।इति सूक्तं जपेत्।अयं स देवदत्त इति तमभिमृश्य उत्पन्ना ग्निश्चेन्मृताधानवदग्निं स्मार्त्तं श्रौतं चोत्पाद्य अयमस्या
वसथ्याग्निरयमस्य श्रौतोऽग्निरिति विदेत्।ततो वैतरण्यादि दद्यात्।ततः समाचारात्तस्य नाभिदेशे घृतदीपमर्धं दीकालाव
स्थायिनं संन्यस्य दीपस्य नाशे तस्य प्राणस्योत्क्रांतिरिति वृद्धाचारः।तत उत्क्रांतिश्राद्धादि सर्वं पूर्ववत्।पालाशवृंताभावे
कुशैः प्रतिमां कुर्यात्।।इति पर्णनरदाहप्रयोगः।।अथ स्मृत्यर्थसारनारायणभट्टाद्यनुसारी नारायणबलिप्रयोगः।।
यद्यपि अयं स्वशाखायां नोक्तस्तथापि दुर्मृतोद्देशेनावश्यमनुष्ठेय बाह्यत्राम्नातं स्वशाखायामित्यादिवाक्यात्परशा
खोक्तोऽप्याह्यः।तत्रापि कर्त्तव्यता कलापहोमादिकं तु स्वशाखीयमेव कस्यांचित् शुक्लैकादश्यां पंचम्यां श्रवणे वा नदीम

आसनानां वरणं वरणं च कृत्वा पंचभूसंस्कारान् कृत्वा अग्निं स्था
पनं सत्येषस्थापनं च ततो विष्णुतर्पणं।

४१

न्यद्वा तीर्थं गत्वा स्नानादि कृत्वा आचम्य प्राणा(णा)नायम्य अद्येत्यादि तिथौ अमुकगोत्रस्यामुकस्य आत्महत्यापापखंडितो द्विजनि
तपापोपशमनद्वारा ऊर्ध्वदैहिके संप्रदानत्वयोग्यतासिद्ध्यर्थं नारायणबलिं करिष्य इति संकल्प्य व्रीहिषु यवेषु वा यथा
विधिना कलशं पंचकं संन्यस्य सर्वौषधितिलगंधादि प्रत्येकं प्रक्षिप्य वस्त्रेणावेष्ट्य पुष्पाणि पंचरत्नानि च प्रक्षिप्य तदु
परि ताम्रपात्रे ब्रह्मविष्णुशिवयमतत्पुरुषाणां पंचमूर्तीः स्थापयेत्। तासु ब्रह्मादीनावाहयेत्। ब्रह्मजज्ञानमिति ब्रह्मा
णं। इदं विष्णुरिति विष्णुं। आ वो राजेति रुद्रं। नाके सुपर्णमिति यमं। सेतु सामन्ना तत्पुरुषं। ततः प्रतिष्ठा। स्वस्वमंत्रैः प्रत्येकं षोड
शोपचारैः पूजनं। स्वस्वसूक्तजपः। तत्र ब्रह्मसूक्तसामानि। सोमं राजानं वरुणं। ब्रह्म। आ रुद्रा। हुवेद्रु हाउयि। हाउ अस्य रता इति
द्वादशसामे। विष्णुः। इत्यादि पुरुषसूक्तं विष्णोः। रुद्रस्य आ वो राजेत्यादि रुद्रसूक्तं अग्ने मृड इति द्वे। नाके सुपर्णमिति यमस्य। से
तु साम तत्पुरुषस्य। अनेन सूक्तजपेन ब्रह्मविष्णुरुद्रयमतत्पुरुषाः प्रीयंतामिति जपसंकल्पः। ततः स्थंडिले पंच भूसंस्का
रान् विधायाग्निं संस्थाप्य भूजपपरिसमूहने कृत्वा ब्रह्माणमुपवेश्य पात्रासादनादिकं प्रकृतिवत्कृत्वा संप्रोक्ष्य वैष्ण
वं चरुं श्रपयेत्। विष्णवे त्वा जुष्टं निर्वपामीति निर्वापः। अत्र होमस्य भूयस्त्वाद्द्विगुणं चरुं निर्वपेत्। अतः परं वा कलशस्था
पनादि। ततः श्रृतं अभिघार्याज्यभागांते चरुणा षोडशाहुतयो होतव्याः। तत्र मंत्राः। होमः प्रकृतिवच्चतुर्गृहीतेन। इदं विष्णुः १। ४१
त्रीणि पदा विचक्रमे २। विष्णोः कर्माणि ३। तद्विष्णोः परमं पदं ४। तद्विप्रासो ५। अतो देवा ६। सहस्रशीर्षा ७। त्रिपादूर्ध्व ८ पुरु
ष एवेदं ९। तावानस्य १०। ततो विराडजायत ११। सोमः पवते जनिता १२। किमित्ते विष्णो १३। प्र तत्ते अद्य १४। वषट्ते विष्णवास आ १५।

41

पृथक्छ्रयस्यसशब्दा।सर्वत्रइदंविस्नवेनमइतित्यागः।ततइदंविस्नुरितिमंत्रेण।अष्टोत्तरसहस्रंशतंवातिलादिद्रव्येणहो
मः।ततआवापहोमादितंत्रंसमाप्यअर्चितकलशस्थदेवसमीपेप्रेतोद्देशेनदशपिंडानदद्यात्।पृथक्संपादितं
दनादिद्रव्येणपिंडदानंवक्ष्यमाणंबलिदानंचायथा।।पिंडद्रव्यमानीयअभिमंत्रितोदकेनपिंडद्रव्यंसंप्रोक्ष्यपिंडद्रव्यो
पहारणमित्याद्युक्त्वादेशकालौसंकीर्त्यअमुकविस्नुरूपप्रेतोद्देशेनपिंडदानमहंकरिष्येइतिसंकल्प्यअपसव्यंकृ
त्वादक्षिणाग्रान्दर्भानास्तीर्यमधुघृततिलयुतंपिंडमादायअमुकगोत्रायामुकप्रेतायविस्नुरूपिणेअयंपिंडउप
तिष्ठतामित्येवंदशपिंडानदद्यात्।ततोआरयामूत्रयायमा।इतिसाम्ना।यन्मेयमंवैवस्वतमिति डानभिमंत्र्यकुशैःश्रो
त्रोदकेनपुरुषसूक्तेनचपिंडोपरिधारांदत्वापिंडोपरिगंधादीन्निक्षिप्यआशुःशिशानोऽष्टाहोममन्त्रैःप्रत्यृचंअमुकगोत्रंअ
मुकप्रेतंनारायणरूपंतर्पयामिइतितर्पयेत्।ततःकलशसमीपेपुरुषाहारमितमन्नंब्रह्मणेविस्नवेशिवाय यमायसकिंक
रायप्रत्येकंबलिमुपनीयकुशादिनास्पृष्ट्वा।ब्रह्मविस्नुमहादेवायमश्चैवसकिंकरः।बलिंगृह्णीतादु... प्रेतस्यचस्तुभां
गतिं।।इतिप्रार्थ्यविस्नादिभ्यइदंबलिंसमर्पयामिइतिबलिंदद्यात्।ततःप्रतिदैवतंत्रिविधंफलंसमर्प्यशर्करामधुगुडसर्पी
षिनिवेदयेत्।ततोदत्तान्पिंडानप्सुप्रक्षिप्यविस्नुंयस्यस्मृत्येतिप्रणमेत्।ततस्तस्यांरात्रौजागरणं।तस्यामेवप्रदोषेअ
युग्मानअयुग्मानपंचसप्तनववाब्राह्मणानामंत्रयेत्।सव्येनयवहस्तोदक्षिणंजान्वालभ्यश्रकरिष्यमाणेब्रह्मादी
नांश्राद्धेयूयंनिमंत्रितास्थइति।तस्यामुपोषितःश्वोभूतेमध्याह्नेकलशस्थान्विह्नवादीनभ्यर्च्यदेशकालौसंकीर्त्यनारा

४२ यणाबलौ विहितं श्राद्धपंचकं एकोद्दिष्टविधिना करिष्ये इति संकल्प्य पूर्ववदेकोद्दिष्टविधिना श्राद्धानि कुर्यात्॥ ब्रह्मन् एष ते
पिंड इत्येवं विष्णुरुद्रयमानां च चतुरः पिंडान्दत्वा अमुकगोत्रामुकप्रेत विष्णुरूप एष ते पिंड इति पंचमं पिंडं दद्यात्॥ ततो विप्रा
नाचांतान्दक्षिणाभिस्तोषयित्वा तन्मध्ये चैकं गुणवंतं ब्राह्मणं प्रेतस्याभोजितं प्रेतबुध्या संस्मरन्भूमिहिरण्यादिना अति
शयेन संतोष्य अन्यस्थाने तिलदर्भतुलसीयुतशंखोदकधारां ब्राह्मणानां हस्तोपरि इति विशेषः॥ ततस्तैः पवित्रपाणि
42 भिर्ब्राह्मणैः अमुकगोत्रायामुकप्रेताय विष्णुरूपिणे इदं तिलोदकमुपतिष्ठतामिति प्रत्येकं देयं॥ ततः पूर्वदिवसस्थापितक
लशेषु आवाहितान्देवान्प्रणम्य सुतासोमधुमत्तमेतितान्विसर्ज्य पतान्कलशान्सप्रतिमान्ब्राह्मणेभ्यो दत्वा ब्राह्मणा
न्विसर्ज्य स्वयं स्नायात्॥ ततः स्वजनैः सह गुडशर्करापायसादिकमन्नं भुंजीत॥ इति नारायणबलिप्रयोगः॥ अथ जीवच्छ्राद्धे ज
लधेनोर्दानविधानादादौ जलधेनुदानप्रयोगः॥ गोमयोपलिप्ते शुद्धे देशे कुशविष्टरमास्तीर्य तदुपरि यथालक्षणलक्षितं कुं
भं वस्त्रसंयुक्तं द्वितीयं च संस्थाप्य कृतोपवासः सितवस्त्रद्वयवान् शुद्धासन उपविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य
अशेषाघौघनिवृत्त्यर्थं श्रीविष्णुप्रीतये जीवच्छ्राद्धांगत्वेन विहितं जलधेनुदानमहं करिष्ये इति संकल्प्य गोविंदं सर्वोपचा
रैः संपूज्य उदङ्मुखं ब्राह्मणमुपवेश्य पाद्यादिभिस्तं संपूज्य धेनुं सवत्सां पूजयेत्॥ धेनो त्वं पृथिवीरूपा केशवस्य सदा प्रिया।
सर्वपापहरा नित्यमतः शांतिं प्रयच्छ मे॥ इति पूजामंत्रः॥ संपूज्य प्रार्थयेत्॥ या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता। धेनुरूपे ४२
ण सा देवी मम पापं व्यपोहतु। देहस्था या च रुद्राणी शंकरस्य सदा प्रिया। धेनुरूपेण०। विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च वि

भावसोः सोमशक्रार्कशक्तिर्याधेनुरूपास्तु सा श्रियै। चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च। या लक्ष्मीर्या लोकपालानां सा
धेनुर्वरदास्तु मे। स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां तथा। सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे। एवं संप्रार्थ्य ब्रा
ह्मणाय स्नात्वा कुशोदकमादाय अद्येत्यादि तिथौ इमां जलधेनुं सवत्सां सुवर्णशृङ्गीं रूप्यखुरां ताम्रपृष्ठीं कांस्यदोहनां पं
चरत्नगर्भां पार्श्वद्वये सप्तग्राम्यधान्यसमन्वितां कण्ठे सितवस्त्रयुगावृतां दूर्वापञ्चपल्लवशोभितमुखां कुष्ठादिप्राणवतीं
प्रियंगुपत्रकर्णां सोपवीतां सच्छत्रां सोपानत्कां कुशविष्टरसंस्थितां चतुर्दिक्षु निहिततिलपात्रचतुष्टयवतीं घृतमधुदधि
मत्स्यात्रमुखीं विष्णुदैवतां गन्धपुष्पाद्यर्चितां श्रीपरमेश्वरप्रीतिकामो जीवच्छ्राद्धदक्षिणात्वेन विहितां अमुकगोत्राय अमुक
शर्मणे अमुकगोत्रोऽहं अमुकशर्मा तुभ्यमहं संप्रददे जलधेनुमिमां तुभ्यं ददामि द्विजसत्तम। जलशायी जगद्योनिः प्रीयतां
मम केशव न मम इत्युक्त्वा दद्यात्। एतज्जलधेनुदानप्रतिष्ठासिद्ध्यर्थमिमां दक्षिणां तुभ्यमहं संप्रददे न मम। ततस्तं ब्राह्मणं
सविनयं प्रणम्य। जलधेनुदानकृतस्य विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं श्रीपरमेश्वरानुग्रहात्परिपूर्णमस्तु। तद्दिने अपक्वान्ना
शिना स्थेयमन्यत्र जलधेनुदाने। अत्र तु वक्ष्यमाणं ज्ञेयं॥ इति जलधेनुदानप्रयोगः॥ अथ जीवच्छ्राद्धप्रयोगः॥ पुण्यदेशका
ले धनश्रद्धाव्यवसाययोगे सति स्वस्यान्यस्य वा जीवच्छ्राद्धं कुर्यात्। तच्च पुत्राद्यौर्ध्वदैहिककर्त्तरि सत्यपि कार्यमिति केचि
त्। अन्ये तु तदभाव एव वदंति। तत्रादौ यथाशक्ति प्रायश्चित्तं ऋणधेनुपापधेनुवैतरण्यादि तिलपात्रदानदशदानानि का
र्याणि। कृष्णद्वादश्यां कृतोपवासस्त्रयोदश्यां कृतनित्यक्रियः शुद्धासने प्राङ्मुख उपविश्य आचम्य प्राणानायम्य देशका

४३ त्यो संकीर्त्यमम मास्यपि नुजन्मनिक्रोर्द्ध्वदेहिकफलसिद्ध्यर्थं जीवच्छ्राद्धं करिष्ये इति संकल्प्य शालग्रामे मूर्त्तौ वा जले दीपे वा कर्त्तारं
ओंकारं सर्वेश्वरं विष्णुं शक्त्या षोडशोपचारैः संपूज्य तदग्रे तिलाज्यजलधेनूः सोपस्कराः प्रपूज्य सदक्षिणाः सतिलाः पितृभ्यो
निवेदयेत्। सोमाय पितृमते स्वधा नमः इति उत्तरस्यां निवेदयेत्। अग्नये कव्यवाहनाय स्वधा नमः इति दक्षिणस्यां निवेद
येत्। यमायांगिरसे स्वधा नमः इति मध्यमां निवेदयेत्। एवं निवेद्य पार्वणश्राद्धवद् द्वौ दैवे पित्र्ये त्रय इति पंचविप्रान्निमंत्र्य पा
र्वणश्राद्धवच्चरणक्षालनादि कुर्यात्। पुरूरवार्द्रवसनामानो विश्वेदेवाः इति दैवे। पितृब्राह्मणानां चरणक्षालने वसूनां श्रा
43 द्धकर्मणि एतद्वः पाद्यमित्यादि। एवं रुद्राणां श्राद्धं०। आदित्यानां श्राद्धकर्मणीत्येवं पाद्यादिभिः संपूज्य पूर्वोदङ्मुखानुपवेश्य
श्राद्धमारभेत्। पार्वणवदुपवेश्य द्विबंधादि कृत्वा श्राद्धोपहारं संप्रोक्ष्य अद्येत्यादि तिथौ जीवच्छ्राद्धांगं वसुरुद्रादित्यानां श्रा
द्धमहं करिष्य इति संकल्प्य आसनावाहनादिना विश्वान्देवान् श्राद्धवत्संपूज्य पितृब्राह्मणान्प्रति क्रमेण वदेत्। वसुभ्यस्त्वाम
हं विप्रः भोजयामि। रुद्रेभ्यस्त्वामहं विप्र भोजयामि। आदित्येभ्यस्त्वामहं विप्र भोजयामि। इति तान्प्रत्युक्त्वा आवाहनादिना तानपि
पूजयेत्। आवाहने वसुरुद्रादित्यानावाहयिष्ये इति पृष्ट्वा आवाहयेत्यनुज्ञात उशंतस्त्वेत्यावाह्य अर्घपात्राण्यासाद्य पूरयित्वा
विश्वेभ्यो देवेभ्योऽर्घं दत्वा स्वधार्घ्या भवंतु इत्युक्त्वा वसुभ्यो नमः इति संपूज्य या दिव्या इति पठित्वा वसव एतद्वोऽर्घं स्वधा। रु
द्रेभ्यो नमः इति संपूज्य मंत्रांते रुद्राः एतद्वोऽर्घं स्वधा। एवं आदित्येभ्यो नमः इति पूजने आदित्याः एतद्वोऽर्घं इति। विश्वेषां देवाना ४३
मन्नसंकल्पः। प्रकृतेवेति। पित्र्ये तु रक्तलेत्यन्नं संप्रोक्ष्य पृथिवी तेत्यादि पठित्वा इदमन्नाद्युक्त्वा तृप्तिपर्यंतं भोजनं वसुभ्यः स्व

धाइदंवसुभ्योनमम।एवंरुद्रेभ्यःस्वधा आदित्येभ्यःस्वधेति अन्नसंकल्पंविधायतेषुत्तत्सुविकिरंदत्वाप्रत्यपोशनादि।ततो
दर्भानास्तीर्यतेषुरेखांकृत्वाएतपितरइत्यावाह्यावनेजनंकुर्यात्।वसवःअवनेनिग्ध्वं।रुद्राःअवने०।आदित्याःअवने०।पिंडदा
नेवसवएषवःपिंडः।रुद्राःएषवःपिंडः।आदित्याःएषवःपिंडः।प्रत्यवनेजनंचपूर्ववत्।अन्यत्सर्वंप्रकृतिवत्।अक्षय्यंवसूनांदत्तं
श्राद्धमक्षय्यमस्तु।एवंरुद्राणां०।आदित्यानांदत्तंश्राद्ध०।दक्षिणास्थानेउत्तरस्यांसोमोद्देश्यकांसोपस्करांजलधेनुंपूर्वोक्तविधि
नावसुस्थानीयब्राह्मणायदद्यात्।दक्षिणस्यामग्न्युद्देश्यकांरुद्रस्थानीयब्राह्मणायदद्यात्।मध्यमांयमोद्देश्यकांआदित्य
स्थानीयब्राह्मणायदद्यात्।विश्वेदेवब्राह्मणाभ्यांसदक्षिणंतिलपूरितंकांस्यपात्रंदेयं।ततःस्वस्तिभवंतोब्रुवंत्वितिजलंदत्वा
वाजेवाजेइतिविसर्जयेत्।एवंश्राद्धंपरिसमाप्यॐनमोनारायणायइतिअष्टाक्षरंमंत्रंस्वेच्छयनस्मरन्यथाशक्तिजपन्जागरणं
कुर्यात्।ततश्चतुर्दश्यांप्रातस्नानादिकंकृत्वायथाप्राप्तांसरिद्दूरांगत्वा।तत्रविप्रश्चेत्पूर्वेणग्रामद्वारेणउत्तरेणक्षत्रियः।पश्चि
मेनवैश्यःदक्षिणेनशूद्रः।गमनकालेयवान्वस्त्राणिलोहखंडानिच।जितंतेपुंडरीकाक्षजितंतेविश्वभावन।नमस्तेस्तुहृषीके
शमहापुरुषपूर्वजइतिपठन्विकिरन्गच्छेत्।नदीतीरंगत्वादक्षिणाभिमुखउपविश्यसत्कुशसमूहनादिसंस्कारसंस्कृतायां
भूमौस्मार्तंलौकिकंवावह्निंस्वयंज्वालयेत्।ततोदक्षिणोन्नतायतांचितिंचिनुयात्।प्रत्यक्षमरणवद्दाहंकृत्वाषट्पिंडादिस
र्वंकार्यं।जीवच्छ्राद्धेसर्वत्रप्रेतशब्दोनप्रयोज्यः।ततोयथाविधिनाआज्यंसंस्कृत्यप्रधानहोमस्थानेनिरग्निभूमौभूम्यैस्वाहा।
यमायस्वाहा।रुद्रायस्वाहाइतिआज्येनाहुतित्रयंहुत्वापंचाशत्कुशैःकृतांब्रह्मलोकगमनहेतुमात्मप्रतिकृतिंमन्त्रेणदा

४४ हृयेत्। तत्र अस्मात्त्वमिति मंत्रेणाग्निदानं। ततो मुद्गमिश्रं तिलमिश्रं च तंडुलचरुद्वयमन्यस्मिन्नग्नौ सपवित्रकं श्रपयेत्। तदग्नि
समीपे कर्पूत्रयं कृत्वा प्रत्येकं मधुक्षीरघृतोदकैः पूरयेत्। तदुपांते मुद्गपूरितानि त्रीणि शरावाणि। ॐ पृथिव्यै नमस्तुभ्यं। ॐ यमा
य नमस्तुभ्यं। ॐ रुद्राय श्मशानपतये नमस्तुभ्यं इति प्रत्येकं निवेदयेत्। ततो दीप्तं प्रतिकृतिदाहार्थमग्निं। ॐ क्रव्यादं त्वा हुतभु
55 ये भूम्यै नम इति पठन् क्षीराक्तजलकुंभेन निर्वापयेत्। ततः स्नात्वा नाभिमात्रे जले स्थित्वा यमादिभ्यः सप्त तिलजलांजलीन्द
द्यात्। तत्रायं प्रकारः। ॐ यमाय स्वधायै नमः। ॐ धर्मराजाय स्वधा नमः। ॐ मृत्यवे स्वधा नमः। ॐ अंतकाय स्वधा नमः। ॐ वैव
स्वताय स्वधा नमः। ॐ कालाय स्वधा नमः। ॐ सर्वप्राणहराय स्वधा नमः। ततः ॐ नमो रुद्राय श्मशानपतये नमः। इति मंत्रेणा
जोदकपूर्णं कुंभं भुवि विकिरेत्। ततो दक्षिणाग्रेषु दर्भेषु ॐ शुक्रवाहाय स्व[illegible]धा रुद्रो नम इति रुद्रस्मरन्नमुकगोत्रामुकेत
त्रेति तिलोदकमस्तु इति तिलोदकं दद्यात्। ततः पूर्वकृतचरुभ्यां पंच पंचापिंडान् प्रत्येकमित्येवं दश पिंडान् स्वोद्देशेन अनेन यव
पिंडविधिना दत्त्वा अर्घपुष्पधूपदीपबलीन् दत्त्वा प्रत्येकं प्रत्येकं सर्वेषां मद्दत्तेयास्त्विति ब्रूयात्। विप्रोः सौम्यं मुखं स्मरेत्। पिं ततो
डानामुष्णत्वनिवृत्ते एकैकं पिंडं जलपूर्णकुंभेन निधाय नाभिमात्रे जले प्रविश्य एकैकं जलमध्ये प्रक्षिपेत्। तत एकैकं जलपूर्णकुं
भं एकैकं च तिलांजलिमित्येवं पंचपंचाशत्कुंभाजलांजलयश्च देयाः। ततः स्नात्वा गृहे आगत्य द्वारोपांते पात्रद्वये क्षीरं जलं च विहि
पन्नाजीवात्र स्नाहि इति जलं निवेद्य। इदं दुग्धं पिब इति दुग्धं। निवेदयेत्तस्मिन्दिने। ततस्तस्मिन्नादिने आशौचं। ततो रात्रौ दक्षिणा ४४
ग्रेषु दर्भेषु उदङ्मुखः स्वपेत्। प्रातरमावास्यायां नद्यादौ गत्वा देशकालौ संकीर्त्य मम जीवच्छ्राद्धं करिष्य इति संकल्प्य आदौ वै

स्त्रवंश्राद्धंविष्णुतर्पणंगंकरिष्यइतिसंकल्प्यविष्णुतर्पणंकृत्वावृषोत्सर्गंकुर्यात्।तत्रअमुकगोत्रस्यामुकशर्मणोममर
णानंतरंप्रेतत्वनिवृत्त्यर्थंस्वगृह्योक्तविधिनावृषोत्सर्गाख्यंकर्माहंकरिष्यइतिसंकल्प्यवृषोत्सर्गंविधायस्वस्यैकोद्दिष्टश्राद्धंकु
र्यात्।तत्रअद्येत्यादिअमुकगोत्रस्यामुकशर्मणोममएकोद्दिष्टश्राद्धमहंकरिष्यइतिसंकल्प्यंकृत्वाप्रेतशब्दंविनाप्रेतैकोद्दि
ष्टधर्मकंश्राद्धंकुर्यात्।तत्रपिंडसमीपेघृतात्रमाषदधिभिःप्रत्येकंकर्षूत्रयंपूरयेत्।एकोद्दिष्टंसमाप्यमासिकश्राद्धानिषोडश
कृत्वासपिंडीकरणंअत्यहमृतवत्कुर्यात्।मासिकश्राद्धेषुअमुकगोत्रस्यामुकशर्मणःमरणानंतरंप्रेतत्वनिवृत्त्यर्थंषोडश
मासिकश्राद्धानिएकोद्दिष्टविधिनाएकतंत्रेणाहंकरिष्यइतिसंकल्प्यपूर्ववन्मासिकश्राद्धानिकृत्वासपिंडीकरणंकुर्यात्।
तत्रसंकल्पेविशेषः।अद्येत्यादिअमुकगोत्रस्यामुकशर्मणःममअमुकगोत्राणांअस्मत्पितृपितामहप्रपितामहानांअमुका
मुकामुकशर्मणांममरणानंतरंप्रेतत्वनिवृत्त्यर्थंवस्वादिलोकप्राप्त्यर्थंपार्वणैकोद्दिष्टरूपंसपिंडीकरणश्राद्धमहंकरि
ष्यइतिसंकल्प्यपूर्ववत्सपिंडीकरणंकुर्यात्।जीवच्छ्राद्धेप्रेतशब्दोच्चारणाभावः॥इतिश्राद्धचिंतामणौजीवच्छ्राद्धप्रयोगः॥॥
अथअन्यानिश्राद्धान्युच्यंते।तत्रमरणात्प्रस्यामारभ्यसपिंडीकरणांतानिश्राद्धानिसविधानान्युक्तानि।अतःपरंवक्ष्यंप्रतिमा
संक्रीयमाणंमासिकंप्रतिसंवत्सरंक्रीयमाणंसांवत्सरिकं।एतदुभयमपिद्विविधं।एकोद्दिष्टंपार्वणंच।तत्रपार्वणधर्मकस्य
मासिकस्यसांवत्सरिकस्यचवृद्धाचारदर्शनात्परंपरयाप्राप्तशिष्टाचाराच्चपार्वणोपक्रमेणैवात्रोच्यते।तत्रचमासिकश्राद्धेसां
वत्सरिकेचसर्वश्राद्धप्रकृतिभूतदर्शश्राद्धादिताधर्माभवंति।तच्चास्माभिःकृत्यचिंतामणौपार्वणप्रस्तावेसविस्तरतयानि

८५ त्पितं। श्राद्धप्रसंगादत्रापि तद्वक्तुमुचितं तस्मात्त्र संक्षेपेणोच्यते॥ तच्चापराह्णे भवति। पूर्वाह्णे तु द्रव्यं भूमौ वुत्पत्त्रा कुशानाहृत्य तिल
यवादीन् संपाद्य दक्षिणाप्रवणां दिग्गुणोपेतां भूमिं च कृत्वा श्राद्धोपयोगी पाकादि सामग्रीं संपाद्य स्नात्वा शुचिः श्राद्धमारभेत्। तत्र प्रा
ङ्मुखा वैश्वदेविका ब्राह्मणा युग्माः। उदङ्मुखा पितॄणां ब्राह्मणा अयुग्माः। विश्वेषां देवानां उदगग्राण्यासनानि। पैतृकाणि दक्षिणा
ग्राणि दक्षिणाग्रदर्भोपहितानि। दैविकाः प्राङ्मुखाः। पैतृका उदङ्मुखाः। दैविके कर्मणि उदङ्मुखो यज्ञोपवीती पातितदक्षिणजानुः
45 कर्त्ता स्यात्। पैतृके तु प्राचीनावीती दक्षिणाभिमुखः पातितवामजानुः स्यात्। देवतीर्थेन दैविकं कर्म कुर्यात्। पैतृकं पितृतीर्थेन। यवैर्दे
वान् परिचरेत्। तिलैः पितॄन्। सर्वत्र सोपग्रहः कर्म कुर्यात्। आचमनान्ते दर्भत्यागः सर्वत्र। दैविके ऋजवो दर्भाः। द्विगुणाः पैतृके। श्राद्धा
रंभेऽवसाने च पादशौचे तथार्चने। विकिरे पिंडदाने च कुर्याद् आचमनाकृती। तेषु प्रथममेव द्विः शेषाणि तु सकृत् सकृत्। आचांतः प्राक्कु
शांस्त्यक्त्वा पाणावन्यांस्तु धारयेत्। इति हेमाद्रिकृतवचनात्। अथ प्रयोगः। ॐ श्रोदिवसात् पूर्वेद्युः प्रदोषे यथावन्निमंत्रितानागता
न् प्रत्युत्थाय नामिवादनादिभिः सत्कृत्य स्वस्वमंडले दैविकान् पैतृकांश्च पादप्रक्षालनादार्थ। ॐ अक्रोधनैः शौचपरैः सततं ब्र
ह्मचारिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा। सर्वायास विनिर्मुक्तैः कामक्रोधविवर्जितैः। भवद्भिर्दैवकार्ये नः संपाद्यं च
प्रसीदत। संपादयिष्यामः। स्वागतं सुस्वागतं। तथा प्राप्नोतु भवान्। प्राप्तास्मः। दैवे क्षणः क्रियतां। करिष्यामि। दैवे कर्मणि एतद्वः पा
द्यो एतद्वो ऽर्घ्यो। इदमत्रा चंदनं च पुष्पं। अपसव्यं। तिलानादाय। अक्रोधनै०। भवद्भिः पितृकार्ये नः संपाद्यं च प्रसीदत। पित्रे क्षणः ८५
क्रियतां। करिष्यामि। पितृकर्मणि एतद्वः पाद्यमित्यादि मातामहानां चैवं। सव्यं। आचमनं। श्राद्धदेशे उपवेशयेत्। भूर्भुवः स्वः स

माध्यं समास्म हे। अपसव्यं। भूर्भुवः स्वः। स० सव्यं आचमनं। प्रसादं कृत्वा। श्राद्धं कारयिष्ये। कुरुष्व। अपसव्यं। कुशतिलप्रक्षेपण
दिग्बंधः। अग्निष्वात्ताः पितृगणाः प्राचीं रक्षंतु मे दिशं। तथा बर्हिषदः पांतु याम्यां ये पितरः स्थिता। प्रतीचीमाज्यपास्तद्वदुदी
चीमपि सोमपाः। ऊर्ध्वतस्त्वर्यमा रक्षेत् कव्यवालोऽनलोऽप्यधः। रक्षोभूतपिशाचेभ्यः स्तथैवासुरदोषतः। सर्वतश्चाधिपस्तेषां यमो
रक्षां करोतु मे। तिलाश्च रक्षंत्वसुरान् दर्भा रक्षंतु राक्षसान्। पंक्तिं वै श्रोत्रियो रक्षेद् अतिथिः सर्वरक्षकः। सव्यं। अस्तु। श्राद्धभूमौ गयां
ध्यात्वा ध्यात्वा देवं गदाधरं। ताभ्यां चैव नमस्कारं ततः श्राद्धं प्रवर्तते। सप्तव्याधा दशार्णेषु मृगाः कालंजरे गिरौ। चक्रवाकाः सरद्वीपे
हंसाः सरसि मानसे। तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः। प्रस्थिता दीर्घमध्वानं यूयं तेभ्योऽवसीदथ। देवताभ्यः पितृभ्यश्च महा
योगिभ्य एव च। नमः स्वाहायै स्वधायै नित्यमेव नमो नमः। अयं मंत्रस्त्रिवार पठनीयः। गयायै नमः। गदाधराय नमः। गयायां पि
तृरूपेण स्वयमेव जनार्दनः। तं ध्यात्वा पुंडरीकाक्षं मुच्यते च ऋणत्रयात्। अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत् पुंडरी
काक्षं स बाह्याभ्यंतरः शुचिः। पात्रे जलमापूर्य तत्र यव तिल गंधादीन् निक्षिप्य कुशाग्रैस्तज्जलं संस्पृश्य दशधा गायत्रीं संजप्य एतो
न्विंद्रं स्तवाम शुद्धं शुद्धेन साम्ना शुद्धैरुक्थैर्वावृध्वांसं शुद्धैराशीर्वान्ममत्तु। इंद्र शुद्धो न आगहि शुद्धः शुद्धाभिरूतिभिः। शुद्धो रयिं
निधारय शुद्धो ममद्धि सोम्यः। इंद्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे। शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि। तद्विष्णोः पर
मं पदं सदा पश्यंति सूरयः। दिवीव चक्षुराततं। तद्विप्रासो विपन्यवो जागृवांसः समिंधते विष्णोर्यत्परमं पदं। अतो देवा अवंतु नो
यतो विष्णुर्विचक्रमे। पृथिव्या अधि सानवि। एभिर्मंत्रैर्जलमभिमंत्र्य कुशाग्रगृहीतजलेन अपसव्येन श्राद्धोपहारान् पाकांश्च प्रो

४६ ह्नेता। भवतां प्रसादात् श्राद्धोपहाराणां पाकादीनां पवित्रताऽस्तु। अस्तु सर्व्वां। देशकालपाकपात्रद्रव्यश्रद्धासंपदस्तु। अद्य
महामांगल्यप्रदे अमुकमासे अमुकपक्षे अमुकस्यां तिथौ अमुकवासरे यथावर्त्तमाननक्षत्रयोगकरणलग्नमुहूर्त्तसमवा
ये एवं ग्रहगणविशेषणविशिष्टायां तिथौ। अपसव्यां अमुकगोत्राणां पितृपितामहप्रपितामहानां अमुकामुकामुकशर्म
णां वसुरुद्रादित्यरूपाणां अमुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां अमुका अमुका अमुकशर्मणां वसुरुद्रा
46 दित्यरूपाणां एषां अद्य अमावास्यामहापर्वणि। निमित्तं श्राद्धं पार्वणाह्वयं विश्वेदेवापूर्वकं अर्घपिंडसहितं युष्मदनुज्ञया श्राद्धम
हं करिष्ये। सव्यं। विश्वेभ्यो देवेभ्य इदमासनं स्वाहा। स्वासनमस्तु। हस्तप्रक्षालनं दत्वा उपयम्य हविष्मराघ्यो इमे कुशाः। अपसव्यं॥
अमुकगोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः अमुकामुकामुकशर्मभ्यः वसुरुद्रादित्यरूपेभ्य इदमासनं स्वधा। हस्तप्र०। गोत्रेभ्यः
मातामहप्रमातामहवृद्धप्रमातामहेभ्य अमुकामुकामुकशर्मभ्य वसुरुद्रादित्यरूपेभ्य इदं०। हस्तप्र०। सव्यं। यवानादाय विश्वान्
वा देवान् आहयिष्ये। आवाहय। विश्वेदेवास आगत शृणुता म इमं हवं। एदं बर्हिर्निषीदत। जानुमुन्मुच्य। विश्वेदेवाः शृणुतेमं हवं
मे ये अंतरिक्षे य उपद्यवि ष्ट। ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वं। ओषधयः समवदंत सोमेन सह राज्ञा
यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि। प्रदक्षिणं यवान् विकीर्य कृतांजलिः पठेत्। आगच्छंतु महाभागा विश्वेदेवा म
हाबलाः। ये यत्र विहिताः श्राद्धे सावधाना भवंतु ते। भवाम। अपसव्यं। तिलानादाय। पितृगोत्रान् पितृपितामहप्रपितामहान् अ ४६
मुकामुकामुकशर्मणः वसुरुद्रादित्यरूपान्। आवाहयिष्ये। आवाहय। उशंतस्त्वा निधीमह्युशंतः समिधीमहि उशन्नुशत आ

वहपितॄन्हविषेअत्तवे।एतपितरःसोम्यासोगंभीरेभिःपथिभिःपूर्वणेभिः।दत्तास्मभ्यंद्रविणेहभद्रंरयिंचनःसर्ववीरंनियच्छत।इति
।जानुमुन्मुच्यअप्रदक्षिणंतिलान्विकीर्यकृतांजलिःपठेत्।आयंतुनःपितरःसोम्यासोऽग्निष्वात्ताःपथिभिर्देवयानैः।अस्मिन्यज्ञे
स्वधयामदंतोधिब्रुवंतुतेवंत्वस्मान्।अपहताअसुरारक्षांसिवेदिषदः।अनेनपुस्तस्तिलान्विकिरेत्।उदकोपस्पर्शनं।एवंमा
तामहादीन्आवाहयेत्।ततोऽर्घपात्राणामासादनं।विश्वेषांदेवानांप्रागग्रपात्रद्वयमेकंवाप्रागग्रदर्भोपरिन्यसेत्।पितॄणांद
क्षिणाग्रदर्भोपरिदक्षिणाग्राणित्रीणित्रीणिपात्राणिन्यस्तव्यानि।सर्वपात्रेषुद्वेद्वेपवित्रेनिधायसव्येनसकुशंजलमादाय।श
न्नोदेवीरभीष्टयेआपोभवंतुपीतये।शंयोरभिस्रवंतुनः।अनेनप्रतिपात्रंसकुशजलप्रक्षेपः।यवोसियवयास्मद्द्वेषुयवयारातीः।
इतिमंत्रेणदेवपात्रेयवप्रक्षेपः।इदमत्रचंदनंचपुष्पं।अपसव्यं।शंन्नोदेवीतिमंत्रेणपितृपात्रेसकुशजलप्रक्षेपः।ततोमंत्रेणतिल
प्रक्षेपःप्रतिपात्रं।तिलप्रक्षेपः।तिलोसिसोमदेवत्योगोसवोदेवनिर्मितः।प्रत्नमद्भिःपृक्तःस्वधयापितॄन्लोकान्प्रीणाहीनःस्वाहा
इदमत्रचंदनंचपुष्पं।सव्यं।अर्घपात्राणामर्चनविधेःपरिपूर्णताऽस्तु।स्वाहार्घ्याभवंतु।अस्तुस्वाहा।विश्वेभ्योदेवेभ्योनमः।इदंपु
ष्पं।यादिव्याआपःपयसासंबभूवुर्याअंतरिक्षाउतपार्थिवीर्याः।हिरण्यवर्णायज्ञियास्तानआपःशिवाःशंस्योनासुहवाभवंतु।
पूरूरवोवनामानोविश्वेदेवाएतद्वोऽर्घ्यंस्वाहा।एवंद्वितीयं।अपसव्यं।स्वधार्घ्याभवंतु।अस्तुस्वधा।पितृभ्योनमः।इदंपुष्पं।यो
दिव्या॰गोत्रपितःअमुकशर्मन्वसुरूपएततेअर्घ्यंयेचात्रत्वानुयांश्चत्वमनुतस्मैतेस्वधा।एवंपितृअर्घ्यंदत्वाउदकंसंस्पृश्य
पुनःस्वधार्घ्याभवंतु।इत्यादिपितामहेभ्योनमः।इदंपुष्पं।यादिव्या॰गोत्रपितामहमेअमुकशर्मन्रुद्ररूपएतत्ते॰।अप॰।स्वधा॰।

४१ प्रपितामहेभ्योनमइदंपुष्पं।यादिव्या॰।गोत्रप्रपितामहअमु॰आदित्यरूपएतत्ते॰अप॰स्वधार्घ्यः॰।मातामहेभ्योनमइदंपुष्पं।
यादिव्या॰।गोत्रमातामहअमुक॰वसुरूपएतत्तेभ्यश्चा॰उदको॰।स्वधार्घ्यः॰।प्रमातामहेभ्योनमः इदंपुष्पं।यादिव्या॰।गोत्रप्रमा
तामहअमुकशर्मन्रुद्ररूपएतत्ते॰उदको॰।स्वधार्घ्यः॰।वृद्धप्रमातामहेभ्योनमइदंपुष्पं।यादिव्या॰।गोत्रवृद्धप्रमातामहअमुक
शर्मन्नादित्यरूपएतत्ते॰उदको॰।प्रथमेपात्रेसं॰स्रवा॰स्पमवनीयस्वधानिनयनीयानुकुशान्पवित्राणिचप्रथमेपात्रेकृ
त्वापितृभ्यस्थानमसीतितत्पात्रंन्युब्जंकृत्वापवित्राण्युपरिस्थाप्यतथैवद्वितीयंन्युब्जंकुर्यात्।ततःसव्येनार्घवंदनं।कृत्वादेवब्रा
47 ह्मणंनूर्च्चंदनादिभिःसंपूज्ययथादत्तंगंधाद्यर्चनंविश्वेभ्योदेवेभ्यःस्वाहा।इदंविश्वेभ्योदेवेभ्योनमम।अपसव्यं।पितॄणांचंदनादि
भिःपूजांकृत्वा।यथादत्तंगंधाद्यर्चनंगोत्रेभ्यःपितृपितामहप्रपितामहेभ्योअमुकशर्मभ्यःवसुरुद्रादित्यरूपेभ्योयथायथावि
भागंवःस्वधा।इदंपितृपितामहप्रपितामहेभ्योनमम।यथादत्तं॰गोत्रेभ्यःमातामहप्रमातामहवृद्धप्रमातामहेभ्यःअमुकशर्म
भ्यःवसुरुद्रादित्यरूपेभ्योयथायथाविभागंवःस्वधा।इदंमातामहप्रमातामहवृद्धप्रमातामहेभ्योनमम।अत्रगंधपुष्पधूपदी
पाच्छादनानांप्रदानं।इदंवोज्योतिःसुज्योतिः।दीपज्योतिःपुष्पं।अस्यश्राद्धस्यार्चनविधेःपरिपूर्णतास्तु।अस्तु।सर्वं।आचमनं।ततो
ग्नौकरणं।पितृब्राह्मणस्यमुख्यस्याग्रेपात्रंसंन्यस्यहविष्यमोदनादिकंघृतेनासिच्यमवश्यैवाग्नौकरणंकरिष्यामिइत्युक्त्वासव्ये ति प्र ३
नाग्नौकरणंकुर्यात्।ॐस्वाहासोमायपितृमतेइदंसोमायपितृमतेनमम।स्वाहाअग्नयेकव्यवाहनाय।इदमग्नयेकव्यवाहनाय ४१
नमम।ततःपितामहादिपात्रेघृतोषंकिंचित्किंचिद्दत्वाविश्वेदेवपूर्वकमन्नंपरिविष्यअन्नसंकल्पंकुर्यात्।दैवेपूर्वं।सव्येनसत्यंत्वर्तेन

परिषिंचामीतिअन्नमभ्युक्ष्यअनुज्ञाभ्यांदक्षिणोत्तरहस्ताभ्यांपात्रमालभ्य।पृथ्वीतिपात्रंद्यौःपिधानंब्राह्मणस्यमुखेअमृतेअमृ
तंजुहोमिस्वाहा।इदंविष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुले।अनेनमंत्रेणविष्णोहव्यंरक्षस्व।अनेनवाअंगुष्ठमन्नेव
धायइदमन्नाद्यमित्यन्नंयच्चदास्यामितत्सर्वंतिलतृप्तिपर्यंतंभोजनंपुरूरवाद्रवनामानोविश्वेभ्योदेवेभ्यःस्वाहा।इतिजलंभूमौक्षिपेत्।
इदंविश्वेभ्योदेवेभ्योनमम।अपसव्यासत्यंलतैनप०उत्तानसव्योत्तरहस्ताभ्यांपात्रमालभ्यपृथ्वीतिइदंविष्णु०विष्णोकव्यंरक्षस्व
इतिवा।इदमन्नादि०गोत्रेभ्यःपितृपितामहप्रपितामहेभ्यःअमुका०वसुरु०भ्योयथायथाविभागंरःस्वधा।इदंपितृपितामहप्रपि
तामहेभ्योनमम।एवंमातामहप्रमातामहवृद्धप्रमातामहादिभ्यश्च।इदंमाता०नमम।ततोअपोशानंदत्वासव्याहृतीकांगायत्रींज
प्त्वा।मधुवाताऋतायतेमधुक्षरंतिसिंधवः।माध्वीर्नःसंत्वोषधीः।मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः।मधुद्यौरस्तुनःपितामधु
मान्नोवनस्पतिर्मधुमां२अस्तुसूर्यः।माध्वीर्गावोभवंतुनः।मधुमधुमधुतत्सुजुषध्वंअमृतंभुंजयध्वंअधुनाकृतसंकल्पसिद्धिर
स्तु।ततोब्राह्मणाःअपोशानप्राणाग्निहोत्रहोमपूर्वंकबलिदानमकुर्वन्मौनेनभुंजीरन्।ततःकर्त्तापसव्येनभुक्तवत्सुद्विजेषुभु
क्ताच्छादितमन्नंपितृब्राह्मणस्याग्रतोदर्भोपरिविकिरेत्।मंत्रः।येअग्निदग्धाजीवायेप्यदग्धाःकुलेममामुमोदत्तेनतृप्यंतुतृप्ता
यांतुपरांगतिं।सव्यं।आचमनं।कुशत्यागः।अन्येषांधारणं।ततःप्राचीनावीतिनापितृपूर्वंप्रत्यपोशानंदत्वापूर्ववद्व्याहृत्यादि
मधुमंत्रजपांतं।तृप्ताःस्थ।तृप्ताःस्म।शेषमन्नंइष्टैःसहानुज्ञाप्यता।ततःपिंडदानंदक्षिणाग्रान्कुशान्स्थानद्वयेसमास्तीर्यदर्भोपरि
कुशपिंजूल्यांअपहताअसुरारक्षांसिवेदिषदइतिमंत्रेणदक्षिणाग्रान्रेखांकृत्वाद्वितीयस्थानेपितृत्वा।एतपितरइत्यादि
नियघ्नतेत्यंतेनमंत्रेणपितृन्नावाह्यअवनेजनंकुर्यात्।पात्रेजलमादायगोत्रपितःअमुकशर्मन्वरुणरूपअवनेनिक्ष्वयेचात्र

४८ लानुयांश्चत्वमनुतस्मैतेस्वधा।इतिकुशमूलेमंत्रेणावनेज्यउदकंस्पृष्ट्वामध्यदेशाग्रदेशयोरवनेजयेत्।गोत्रपितामहअमुकशर्म
न्प्रजापतिरूपअवनेनिक्ष्वयेचा०।उदको०।गोत्रप्रपितामहअमुकशर्मन्नग्निरूपअवनेनिक्ष्वयेच०।उदको०।एवंमातामहा
दित्रयाणांतत्तन्नाम्नावरुणरूपेत्यादिपूर्वकमवनेजनंगोत्रेमातामहप्रमातामहवृद्धप्रमातामहेष्वेवं।ततोयथावन्नियुक्तंपिंड
त्रै दानं।अग्नौकरणशेषंसंमिश्र्यश्राद्धपाकात्पिंडदानपर्याप्तंसर्वजातीयमन्नमादायपिंडान्दद्यात्।गोत्रपितःअमुकशर्मन्व
रुणरूपएषतेपिंडोयेचा०।इदंपित्रेनमम।उदकोपः।गोत्रपितामहअमुकशर्मन्प्रजापतिरूपएषतेपिंडोयेचा०।इदंपिता
48 महायनमम।उदकोप०।गोत्रप्रपितामहअमुकशर्मन्नग्निरूपएषतेपिंडोयेचा०।इदंप्रपितामहायनमम।एवंमाताम
हादीनांपिंडान्दत्वापिंडपात्रक्षालनजलेनप्रत्यवनेजनंपूर्ववत्।ततस्तत्पात्रंभूमावधोमुखंकुर्यात्।अत्रपितरोमादयध्वं
यथाभागमावृषायध्वंइतिपठित्वाअपदक्षिणोवर्त्तमानेनदक्षिणाभिमुखोभूत्वाश्वासंनियम्यपितॄन्ध्यात्वाश्वासमवि
मुंचंस्तथैवपरिवर्त्तमानोजपेत्।अमीमदंतपितरोयथाभागमावृषायिषत।अथांजलिंकृत्वाजपति।नमोवःपितरःपितरो
नमोवः।गृहान्वेदतगृहान्नःपितरोदत्त।पिंडानवेदतेसदोवपितरोदेष्म।एतद्वःपितरोवासः।इतिसूत्रतंतुदानं।ततोब्राह्मणा
नाचामय्य।इदमत्रचंदनंचपुष्पं।एषधूपः।एषदीपः।समाचारात्एषअर्घः।नैवेद्यं।गोत्रेभ्यःपितृपितामहप्रपितामहेभ्य
अमु०वरुणादिरू०गोत्रेभ्यःमातामहोदिअमु०वरुणप्र०स्वधा।इदंपित्रादिभ्योमातामहादिभ्योनमम।कृतांजलिःप्रार्थ
येत्।पिंडानामर्चनविधेःपरिपूर्णतास्तु।अस्तुइतिसर्वत्र।एभिःपिंडदानैःअस्मत्पितॄणांअक्षयातृप्तिरस्तु।कालेश्राद्धंभवतु। ४८
भवतु।गयाश्राद्धवाप्तिरस्तु।गयायांपिंडदानेनयावत्तृप्तिसातृप्तिरस्तु।स्वर्गेवासोऽस्तु।सर्वांआचमनंसुसंप्रोक्षितमस्तु

इति द्विजाग्र भूमेः ओं द्वर्गः। शिवा आपः संतु इति द्विजहस्ते जलदानं। सौमनस्यमस्तु। पुष्पदानं। अक्षतं चारिष्टं चास्तु। अक्षतदानं। अ
क्षय्यं तु इति प्रत्युक्तिः। समाचारात् दीर्घमायुः शांति पुष्टि तुष्टिश्चास्तु। अस्तु। अपसव्यं। गोत्रस्य पितुः अमुकशर्मणो वस्वात्मनो दत्तमि
दं श्राद्धमक्षय्यमस्तु। अनेन ब्राह्मणहस्ते जलं दद्यात्। अस्त्वक्षय्यं उदकोपः। अमुकगोत्रस्य पितामहस्य अमुकशर्मणो रुद्रात्मनो दत्त०
अस्त्वक्षय्यं। उदकोप०। गोत्रस्य प्रपितामहस्य अमुकशर्मणः आदित्यात्मनो दत्तमि०। अस्त्वक्षय्यं। उदकोप०। एवं मातामहादीनामपि।
गोत्रस्य मातामहस्येत्यादि। येषामुद्दिष्टं तेषामक्षय्यमस्तु। अस्तु। अघोराः। पितरः संतु। संत्वघोराः पितरः। गोत्रं वर्द्धतां। वर्द्धतां वो गोत्रं।
ततः सव्येन न्युब्ज पात्रोपरि स्थिता निपवित्राणि सकुशान्यादाय अपसव्येन पिंडानां सुपरि आस्तीर्य मातामहादीनामपि तेषां पिंडोपरि
पवित्राणि प्रक्षिपेत्। स्वधां पितृन्वाचयिष्ये। वाच्यतां। गोत्रेभ्यः पितृभ्यः अमुकशर्मभ्यः वसुरूपेभ्यः स्वधोच्यतां। अस्तु स्वधा इति स
र्वत्र प्रत्युक्तिः। गोत्रेभ्यः पितामहेभ्यः रुद्ररूपेभ्यः स्वधोच्यतां। अस्तु०। गोत्रेभ्यः प्रपि० आदित्यरू० अस्तु स्वधा। एवं मातामहादीनां। प्र
त्येकं जलस्पर्शः। ततो न्युब्जकृतमर्घपात्रमुत्तानं कृत्वा तेन पात्रेण जलमादाय ऊर्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ
तर्पयत मे पितॄन् अनेन पिंडोपरि धारां दद्यात्। एवं मातामहादीनां अपि। ततः पिंडपात्रस्योत्तानकरणमाचारात्। सव्यं। विश्वे देवाः प्री
यंतामिति ब्रूत इति दैविक द्विजहस्ते जलदानं। ते च प्रीयंतां विश्वेदेवाः इति ब्रूयुः। अपसव्यं। पिंडपात्राणि चालयित्वा सव्यं। अस्य श्राद्ध
स्य कृत प्रतिष्ठा सिद्ध्यर्थं दास्यमानां दक्षिणां सुवर्ण वासं च विश्वेभ्यो देवेभ्यः स्वाहा। इदं विश्वेभ्यो देवेभ्यो न मम। अपसव्यं। अस्य श्रा
द्ध० गोत्रेभ्य पितृ पितामह प्रपितामहेभ्यः वसु० स्वधा। अस्य श्राद्ध० गोत्रेभ्यः मातामह० वसु० स्वधा। पित्रादिभ्यो मातामहादिभ्यो
न मम इति त्यागः। सव्यं। दातारो नो अभिवर्द्धतां। अभिवर्द्धतां वेदाः संततिरेव च। अभिवर्द्धतां वेदाः। अभिवर्द्धतां वः संततिः। श्रद्धा च नो मा

४९ 49 अगमत्। मा गाः। बहु देयं च नोऽस्तु। अस्तु। अन्नं च नो बहु भवेत्। भवतु। अतिथींश्च लभेमहि। लभध्वं। याचितारश्च नः संतु। संतु। मा च या
चिष्म कंचन। मा याचिष्म। एता एवाशिषः संतु। संतु। आशिषः प्रतिगृह्य तां। अत्र पूर्वोक्त इति एवं ग्रहणं विशेषणं विष्टायां तिथौ।
अपसव्यं। गोत्राणां पितृपितामहप्रपि० गोत्राणां मातामह० वसुरु० एषां अद्य अमावास्यामहापर्वनिमित्तस्य श्राद्धस्य पार्वणद्व
यस्य विश्वेदेवापूर्वकस्य अर्घ्यपिंडसहितस्य यः कश्चिन्मंत्रोक्तविधेर्न्यूनमतिरिक्तं तत्सर्वं ब्राह्मणानां वचनात् विष्णोश्च प्रसादा
त् परिपूर्णमस्तु। देशकालपुण्यफलावाप्तिरस्तु। यत्कृतं तत्सर्वं सुकृतमस्तु। स्वस्ति भवंतो ब्रुवंतु। इति विश्वेदेविकानां हस्ते सव्ये
न जलदानं। पैतृकाणां हस्ते प्राचीनावीतिना जलदानं। ततः सर्वे स्वस्ति तेऽस्तु इति ब्रूयुः। अपसव्यं। वाजे वाजे वत वाजिनो नो धनेषु विप्रा
अमृता ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः। इति मंत्रेण पूर्वं पितॄन्विसृज्य सव्येन दैविकान्मंत्रेण विसर्ज-
येत्। अपसव्यं। आमा वाजस्य प्रसवो जगम्याद्देमे द्यावापृथिवी विश्वरूपे। आमा गंतां पितरः मातरा चामा सोमो अमृतत्वेन गम्यात्।
अनेन प्रदक्षिणं जलधारां दद्यात्। सव्यं। आचमनं। आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च। प्रयच्छंतु यथा राज्यं प्रीता नृणां पि
तामहाः। स्वस्ति तेऽस्तु। वामदेव्यजपः। यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं॥१॥ प्रमा पा
दात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः॥२॥ स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित्।
सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः॥ इति दर्शश्राद्धकृतस्य विधेः सर्वं परिपूर्णमस्तु॥ इति दर्शश्राद्धप्रयोगः॥ अथ क्षयाहश्राद्धं।
मासिकं सांवत्सरिकं च एकपार्वणात्मकं भवति। तत्र पूर्ववत्प्रकृतिवत्। संकल्पे विशेषः। गोत्राणां पितृपितामहप्रपितामहानां अमु ४९
क० शर्मणां। वसुरुद्रादित्यरूपाणां गोत्रस्य पितुः अमुकशर्मणः प्रतिसांवत्सरिकक्षयाहनिमित्तं श्राद्धं पार्वणैकं विश्वेदेवापूर्वं

कंअर्घपिंडसहितं युष्मदनुज्ञया श्राद्धमहं करिष्ये एवं संकल्प्य सर्वं पूर्ववदेकपार्वणेन कर्त्तव्यं। अद्य पूर्वोक्त इति एवं० गोत्राणां पितृपि
तामहप्रपितामहानां वसु० गोत्रस्य पितुरमुकशर्मणः प्रतिसांवत्सरिकक्षयाहनिमित्तस्य श्राद्धस्यैकपार्वणेकस्य विश्वेदेवापूर्वक
स्य अर्घपिंडसहितस्य यः कश्चित्मंत्रोक्तविधेर्न्यून०॥ इति क्षयाहश्राद्धे विशेषः॥ अथ मातृविषये विशेषः॥ संकल्पे गोत्राणां मा
तृपितामहीप्रपितामहीनां अमुकी३ देविदानां वसुरुद्रादित्यरूपाणां अमुकगोत्रायाः मातुः अमुकीदेविदायाः प्रतिसांवत्सरिक
क्षयाहनिमित्तश्राद्धं पार्वणैकं विश्वेदेवापूर्वकं अर्घपिंडसहितमित्यादि पूर्ववत्। आसने। गोत्राभ्यः मातृपितामहीप्रपितामही
भ्यः अमुकी३ देविदाभ्यः वसुरुद्रादित्यरूपाभ्यः इदमासनं स्वधा। हस्तव आवाहने गोत्राः मातृपितामहीप्रपितामहीः अमुकी३ देवि
दाः आवाहयिष्ये इति अर्घे। गोत्रे मातः अमुकी देवि देव वसुरूपे एतत्ते अर्घं ये चात्र त्वानु याश्च त्वमनु तस्यै ते स्वधा। गोत्रे पितामहि अ
मुकी देवि दे रुद्ररूपे एतत्ते अर्घं ये चात्र० गोत्रे प्रपितामहि अमुकी देवि दे आदित्यरूपे एतत्ते अर्घं ये चात्र० अर्चने संकल्पे भोजन
संकल्पे दक्षिणासंकल्पे च आसनसंकल्पवत्। अवनेजने गोत्रे मातः अमुकी देवि देव वसुरूपे अवनेनिक्ष्व ये चात्र त्वानु० पिता
महि अमुकी देवि दे प्रजापतिरूपे अवनेनिक्ष्व० प्रपितामहि अमुकी दे० आग्निरूपे अव०। पिंडदाने। एषते पिंडो ये चात्र० प्रत्यवनेजने ए
वमेव निवेद्य संकल्पे आसनसंकल्पवत्। अक्षय्योदके। गोत्रायाः मातुः अमुकी देवि दायाः वसुरूपायाः दत्तमिदं श्राद्धम् अक्षय्यमस्तु।
गोत्रायाः पितामह्याः अमु० रुद्ररूपायाः दत्त० गोत्रायाः प्रपितामह्याः अमुकी० आदित्यरूपायाः दत्त० यासामुद्दिष्टं तासामक्षय्यमस्तु।
स्वधावाचने। गोत्राभ्यः मातृभ्यः अमुकी देवि दाभ्यः वसुरूपाभ्यः स्वधोच्यतां। एवं पितामहीभ्यः अमुकी रुद्ररूपाभ्यः स्वधोच्यतां।
प्रपितामहीभ्यः अमुकी० आदित्यरूपाभ्यः स्व० दक्षिणासंकल्पे विप्राकु प्रोक्तसंकल्पवत्। पुनः प्रक्षायां अद्य० तिथौ गोत्राणां मा

५० त०अमुकीऽदेविदानां अमुकगोत्रायाः मातुः अमुकीदेविदायाः प्रतिसांवत्सरिकमित्यादि। इतिमातृनिर्णयेविशेषः॥ अथसहग
मनेविशेषः॥ संकल्पेगोत्राणांमातापितृपितामहप्रपितामहानांवसु०रुद्रयाहोगोत्रयोः मातापित्रोः अमुकी अमुकशर्मणोः प्रति
सांवत्सरिकमित्यादि। त्रिषुसहगमने मातापितृपितामहीपितामहप्रपितामहीप्रपितामहानामित्येक। आसनसंकल्पेगोत्रेभ्यः
50
मातापितृपितामहप्रपितामहेभ्यः अमुकी अमुकशर्म्मभ्यःपृथक्चेत्। गोत्राभ्यांमातापितृभ्यांअमुकी अमुकशर्मभ्यांवसुरूपाभ्या
मिदमासनंस्वधा। अर्घ्यदाने गोत्रौमातापितरौ अमुकी अमुकशर्माणौवसुरूपौ एतद्वामर्घ्यंयेचात्रवामनुयांश्चयुवामनुता
भ्यांवांस्वधा। अवनेजने। गोत्रौमातापितरौ अमुकी अमुकशर्माणौ अवनेनिजाथांयेचात्रवामनु०। पिंडदाने। एषवांपिंडोयेचा
त्रवा०। अक्षय्योदके। गोत्रयोः अमुकी अमुकशर्मणोःवस्वात्मनोःदत्तमिदं०स्वधावाचने। गोत्रेभ्यःमातापितृभ्यः अमुकी अमुकश
र्मभ्यःस्वधोच्यतां। पुनःप्रश्नायांसंकल्पवत्। पृथगासनदानेतुप्रागुक्तं। एवमन्यसंकल्पेषु। इतिसहगमनेविशेषः॥ अथैकोद्दिष्ट
श्राद्धप्रयोगः। अत्रप्राचीनावीतिनादक्षिणाभिमुखेनवामजानुपातनसर्वंकर्त्तव्यं। अक्रोधनैः शौच०पितृकार्यमि०। पित्रेदद्यः०पितृ
कर्मणिएतद्वःपाद्यं।० [redacted] आचमनं। भूर्भुवस्वःसमाधां सव्यं। आचमनं। प्राणायामः। गायत्रीपाठादिप्रसादंदत्वा०। अग्निष्वात्ता०। रक्षो
भूत०। श्राद्धभूमौ०। सप्तव्याधा०। देवताभ्यः०। अपवित्र०। पात्रपूरणं। दशगायत्री। एतोन्विंद्रं०। प्राकप्रोक्षणं। भवतां०। श्राद्धोप०। देशका
ल०। अद्यतिथौ गोत्रस्यअमुकशर्मणःसांवत्सरिकक्षयाहनिमित्तं एकोद्दिष्टविधिनाश्राद्धमहंकरिष्ये। अपरपक्षमहालयनिमित्तेश्रा
द्धमिति अपरपक्षे। अपसव्यं। अमुकगोत्रायअमुकशर्मणेइदमासनंस्वधा। हस्त०। उप०। नावाहनं। अर्घपात्रस्यापनं दक्षिणायदक्षोप ५०
रिपात्रेएकतंतुरूपंपवित्रंनिधायशन्नोदेवी०। तिलोसि०। इदमत्रा। चंदनंचपुष्पंत्वधूपः। एषदीपः। अर्घपात्रस्यार्चनविधेःपरिपूर्णता

स्तु। स्वधार्घ्या भवंतु। अस्तु स्व०। अमुकशर्मणो नम इदं पुष्पं। यादिव्या०। अमुकगोत्र अमुकशर्मन् एतत्ते अर्घ्यं ये चात्र०। पवित्रं पा
त्रे कृत्वा पितृभ्यः स्थानमसीति न्युब्जं कुर्यात्। अर्घ्यवंदनं। गंधादिपूजा। यथा दत्तं गंधाद्यर्चनं अमुकगोत्राय अमुकशर्मणे स्वधा। अत्र गं
ध०। इदं वो ज्योतिः। अस्य श्राद्धस्यार्चनं०। सव्यं। आचमनं। नप्तो करणं। अन्नं परिविष्य। सत्यं त्वर्तेन०। पृथ्वीते०। इदमन्नादि०। गोत्राय अमु
कशर्मणे स्वधा। गायत्री पूर्वकं मधुमंत्रजपः। अन्नेषु विकिरः। सव्यं। आचमनं। स्वदितं सुस्वदितं। दक्षिणाग्रान् त्रीन् दर्भान् आस्तीर्य तेषु अ
पहतेति रेखाकरणं। एतपितरइत्यावाहनं। अवनेजनं। गोत्र अमुकशर्मन् अवनेनिक्ष्व ये चात्र त्वा०। गोत्र अमुकशर्मन् एष ते पिंडो
ये चात्र०। प्रत्यवनेजनं। अत्र पितरो०। अमीमदंत०। नमो वः०। एतद्वः पि०। इदमत्र चंदनं च पुष्पं। धूप दीपौ। अर्घः। नैवेद्यं। इदं नैवेद्यं गोत्रा
य अमुकशर्मणे स्वधा। पिंडस्यार्चनविधेः परि०। अनेन पिंडदानेन अमुकशर्मणः अक्षय्यात्प्तिरस्तु। काले०। गयायां०। गयायां०। स्वर्गे वा
सोऽस्तु। सव्यं। आचमनं। सुसंप्रोक्षितं०। पृथिव्या स्थितं। अपसव्यं। अमुकगोत्रस्य अमुकशर्मणः दत्तं श्राद्धं चोपतिष्ठतां। अघोराः०। गो
त्रं नो०। पिंडोपरि पवित्रं दत्वा स्वधां पितृ०। गोत्रेभ्यः अमुकशर्मभ्यः स्वधोच्यतां। ऊर्जं वहंती०। पात्रमुत्तान०। अस्य श्राद्धस्य कृत०। दक्षि
णां सुखवासं च गोत्राय अमुकशर्मणे स्वधा। दातारो०। आशिषः प्रतिगृह्यतां। अद्य पूर्वो०। तिथौ गोत्रस्य अमुकशर्मणः सांवत्सरिके क्ष
याह निमित्तस्य श्राद्धस्य एकोद्दिष्टविधिना कृतस्य निर्मेयन्यून०। वेदशास्त्राक०। यत्कृतं०। स्वस्ति भवंतो०। अभिरम्यतां इति विसर्जनं। आ
मा वाजस्य। सव्यं। आचमनं। आयुः प्रजां०। वामदेव्यगानं। यस्य स्मृत्या०। इत्येकोद्दिष्टश्राद्धप्रयोगः॥ अथ संकल्पश्राद्धप्रयोगः॥ आ
चमनं। अक्रोधनैः०। दैवेक्षणः क्रि०। दैवे कर्मणि एतद्व०। अपसव्यं। अक्रोधने०। पित्र्ये क्षणः क्रियतां। पितृकर्मणि०। एवं मातामहानां। स
व्यं। आचमनं। भूर्भुवः स्वः समाधं०। अपसव्यं। भूर्भुव०। सव्यं आचमनं। प्राणायामः। गायत्र्यादीनां पाठः। अपसव्यं। प्रसादं०। अग्निदग्धा०।

रक्षोभूत० श्राद्धभूमौ० सप्तव्याधा० देवताभ्यः० सव्यं। अपवित्रः० पात्रे जलपूरणं। दशगायत्री। एतोन्विंद्रं० प्रोक्षणं। भवतां प्रसादात् श्रा
द्धोपहाराणां पवित्रतास्तु। देश०। अत्राद्य मासे पक्षे तिथौ। अपसव्यं गोत्राणां पितृ० गोत्राणां मातामह० नां एषां अद्य युगादि महापर्वनि
मित्तं श्राद्धं पार्वणद्वयं विश्वेदेवापूर्वकं अर्घ्यपिंडादिरहितं सांकल्पविधिना श्राद्धमहं करिष्ये। एवं तत्तत्पर्वसु तत्तन्नाम्ना उल्लेखः कार्यः।
विश्वेभ्यो देवेभ्य इदमासनं स्वाहा। हस्त० अपसव्यं गोत्रेभ्यः पितृ० शर्मभ्य इदमासनं स्वधा। हस्त० गोत्रेभ्यः मातामह०। नावाहनं। नार्घ
पात्राणि। गंधादिना पूजनं। सव्यं। यथादत्तं गंधाद्यर्चनं विश्वेभ्यो० अपसव्यं यथादत्तं० गोत्रेभ्यः पितृ० यथादत्तं० गोत्रेभ्यः मातामह०।
अत्र गंध० अस्य श्राद्धस्यार्चनं० सव्यं आचमनं। भोजनसंकल्पः। सव्यं वर्तेन० पृथ्वीते० इदमन्नादि० विश्वेभ्यो देवेभ्यः स्वाहा। अपसव्यं।
सव्यं वर्तेन० इदमन्नादि० गोत्रेभ्यः पितृ० गोत्रेभ्यः माता० सव्यं। सुसंप्रोक्षितं० दक्षिणासंकल्पः पूर्ववत्। दातारो० अद्य पू० गोत्राणां पितृ०
गोत्राणां मातामह० नां एषां अद्य अमुकपर्वनिमित्तं श्राद्धं पार्वणद्वयं विश्वेदेवापूर्वकं अर्घ्यपिंडरहितं सांकल्पविधिना कृतस्य विधे
र्न्यूनमति० वेद० यत्कृतं० स्वस्ति० आमा वाज० सव्यं आचमनं। आयुः प्रजां० वामदेव्यजपः। यस्य स्मृत्या०। इति संकल्पश्राद्धप्रयोगः।
अथ तीर्थश्राद्धप्रयोगः। तीर्थं गत्वा तीर्थदेवतां साष्टांगं नमस्कृत्य सचैलं स्नात्वा क्षौरं कारयित्वा पुनर्यथाविधिना स्नात्वा देवादीन् संत
र्प्य श्राद्धमारभेत्। चत्वारि पार्वणानि। प्रथमं पित्रादीनां। द्वितीयं मात्रादीनां। तृतीयं मातामहादीनां सपत्नीकं चतुर्थं गवा। अक्रोधनैः० देवे
क्षण० देवे कर्मणि। अपसव्यं। अक्रोधनैः० पित्र्ये क्षणः० पितृकर्मणि० एवमन्येषां। सव्यं। भूर्भुव० अपसव्यं। भूर्भुव० सव्यं आचमनं। गा
यत्र्यादि। अपसव्यं। प्रसादं कृत्वा० अग्निष्वात्ताः० रक्षोभूत० श्राद्धभूमौ० सप्तव्याधा० अपवित्र० उदकाभिमंत्रणं। प्रोक्षणं। भवतां० तीर्थ ५१
श्राद्धोपहाराणां० देश० अद्य तिथौ० गोत्राणां पितृ० गोत्राणां मातृपितामहि० गोत्राणां मातामह० अमुक उशर्मणां एषां अद्य तीर्थप्राप्तिनिमि

त्वं श्राद्धं पार्वणं चतुष्टयं सैकोद्दिष्टं युग्मं दत्तुज्ञया अहं करिष्ये इति संकल्प्य। आसनदानं नावाहनं नार्घ्यपात्राणां पूरणादि। अर्चन
संकल्पे। यथादत्तं। अत्र गंध०। अस्य श्राद्धस्यार्चेन विधेः०। आचमनं। अग्नौकरणं। भोजनसंकल्पः। सत्यं त्वर्त्तेनेत्यादिना विकिरः। गाय
त्रीजपो मधुवाता इत्यादि। अवनेजनं सैकोद्दिष्टानां। तथैव पिंडदानादि। आचमनं। सुसंप्रोक्षितमस्त्वित्यादि। अक्षय्योदकदानं। स्व
धावाचनं। ऊर्जं वहंतीः०। विश्वेदेवाः प्री०। पिंडपात्राणां चालनं। दक्षिणासंकल्पः। दातारो०। अत्र पूर्वे०। आवाहनाभावान्न विसर्जनं। आ
मावाजस्य०। आचमनं। काऽपया०। यस्य स्मृत्या०॥ इति तीर्थश्राद्धप्रयोगः॥ अथ आमश्राद्धप्रयोगः॥ आमश्राद्धस्य सुकरत्वाद्विस्तरतया
नोच्यते। उशन्तुशत आवह पितॄन् हविषे स्वीकर्त्तवे इति आवाहने। इदं चतुर्गुणामान्नं पितृभ्यः स्वधा। वाजे वाज इति मंत्रे अस्य मध्वः
पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैरित्यूहः। सर्वमन्यत्पूर्ववत्॥ इति शुक्लश्रीविश्वामात्मज शिवरामविरचिते श्राद्धचिंतामणौ
द्वितीयप्रकाशप्रयोगः समाप्तः॥ अथाचारप्राप्ता दूर्वापूजाप्रयोगः॥ प्रातःस्नानादि विधाय मध्याह्ने शुद्धभूमावुत्पन्नदूर्वासमीपे शिव
लिंगं संस्थाप्य शुद्धासने प्राङ्मुख उपविश्य आचमनादि विधाय देशकालौ संकीर्त्य सर्वाभीष्टसिध्यर्थं दूर्वापूजादौ विहितं शिवपूजनम
हं करिष्ये इति संकल्प्य। देवदेव महादेव भवानीसहितः प्रभो। पूजार्थं मे हि सर्वेश भक्तानुग्रहहेतवे। इत्यावाह्य वैदिकमंत्रेण प्रतिष्ठां वि
धाय शिवाय नमः आसनं समर्पयामि। एवं पाद्यमर्घ्यमाचमनीयं स्नानं पुनराचमनीयं। चंदनं पुष्पं धूपं दीपं। शमीपत्रदूर्वाभ्यां पूजा
कार्या नैवेद्यं। पुनराचमनीयं। ततः पात्रे दध्यक्षतपुष्पजलानि कृत्वा तत्पात्रं हस्ताभ्यामादाय अर्घं दद्यात्। तापत्रयहरं दिव्यं परमानं
दलक्षणं। तापत्रयं विनिर्मुक्तो तवार्घ्यं कल्पयाम्यहं इति अर्घं दत्वा अर्घ्यं प्रदक्षिणां विधाय। शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जग
त्। शिवो जयति सर्वत्र यः शिवः सोहमेव च। इति स्तुत्वा प्रणमेत्। महादेव विरूपाक्ष त्रिलोचन सदाशिव। पार्वतीश नमस्तुभ्यं शरणागत

५२ वत्सला। शिवपूजनं कृतस्य विधेः सर्वं परिपूर्णमस्तु। पुनर्देशकालौ संकीर्त्य भर्तुर्दीर्घायुष्य पुत्रसंततिलक्ष्म्यादिफलावाप्तये दूर्वापूजामहं करिष्य इति संकल्प्य आसनाद्युपचारैः पूजा। दूर्वायै नमः। इदमासनं। एवं सर्वोपचारेषु। पूजामंत्रो ॥ त्वं दूर्वे अमृतजन्मासि वंदितासि सुरासुरैः। सौभाग्यं संततिं देहि सर्वकार्यकरी भव॥१॥ यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले। तथा ममापि संतानं कुरु त्वमजरामरं॥२॥ ततोऽनग्निपक्वं विरूढकमोदकादिकं नैवेद्यार्थमुपकल्प्य निवेदनीयं। इदं नैवेद्यं दूर्वायै निवेदयामि इति निवेद्य पुनराचमनीयं दत्वा पूर्ववन्मंत्रेणार्घ्यदानं पूगफलादिभिश्च। ततः प्रदक्षिणा। दूर्वे देवि नमस्तुभ्यं सर्वसंपत्प्रदायिनि। सौभाग्यं संततिं देहि सर्वकल्याणदायिनि॥ इति नमस्कुर्यात्। अद्य पू० तिथौ। दूर्वापूजनं कृतस्य विधेः सर्वं परिपूर्णमस्तु॥ इति दूर्वापूजाप्रयोगः॥ अथ मृतोद्देशेन दूर्वापूजाप्रयोगः॥ नित्यस्नानादिमाध्याह्निकं निर्वर्त्य सुपीठे समाचारान्मृत्पिंडे दूर्वां संस्थाप्य परितः पालिकां विधाय संस्थाप्य आदौ वैश्वदेवं श्राद्धं कुर्यात्। तत्र संकल्पविशेषः। अद्येत्यादितिथौ अपसव्यं अमुकगोत्रस्य अमुकशर्मणः परलोके सुखावाप्त्यर्थं दूर्वापूजांगं वैश्वदेवं श्राद्धं सांकल्पविधिना अहं०। स्त्री चेत् अमुकगोत्राया अमुकीदेविदाया परलोक इत्यादि। पूर्ववद्वैश्वदेवं श्राद्धं विधाय दूर्वापूजनांगं वैश्वदेवश्राद्धं कृतस्य विधेः सर्वं परिपूर्णमस्तु। ततो वंशपात्राणि विरूढकानि नैवेद्यानि च पार्श्वे संस्थाप्य। आचमनं। प्राणायामः। गायत्रीं गायत्रं च पठित्वा। अपवित्रः० इत्यागायत्री। एतोन्विंद्रं० पृथिव्या०। भवतां प्रसादात् दूर्वापूजोपहारद्रव्याणां पवित्रतास्तु। देश०। अद्य मासे पक्षे तिथौ। अपसव्यं। अमुकगोत्रस्यामुकशर्मणः परलोके पंगुदोषनिवारणार्थं सुखावाप्तये च दूर्वापूजनमहं०। पूजामंत्रो पूर्वोक्त एव। चंदनादिभिः संपूज्य फलेनार्घ्यदानं। नैवेद्यं। इदमर्चितं नैवेद्यं दूर्वायै समर्पयामि। पुनराचमनीयं समर्प्य। दुग्धतिलमिश्रितजलेन। दूर्वामूले सेचनं। मंत्रः। तोयं च पयसा मिश्रं तिलमिश्रं तथैव च। अमृतोद्भवमूले तु सिंचये परमामृतं। तापत्रयहरासि त्वममृतादुद्भवस्तथा। तापत्रयनिवृत्त्यर्थं सिं ५२

52

चाम्यमक्षय्यरूपिणि। इति मंत्रेण त्रिः संतर्प्य वंशपात्राणां संकल्पं कुर्यात्। सुसंस्कृतमित्यादि कृत्वा कुशोदकमादाय इदं वंशपात्रं कां
स्यपात्रविनिधात्र विविधफलकदिसूत्रनानोपहारवस्त्रादिसंयुक्तं गंधपुष्पाद्यर्चितं अपसव्यं अमुकगोत्रस्यामुकशर्मणः परलोके
पंगुदोषनिवारणार्थं वंशपात्रदानजनितसुखावाप्तये सव्यं एकं वंशपात्रं श्रीविष्णुप्रीतये कस्मैचिद्ब्राह्मणाय अहं दास्ये। अन्यानि वंशपा
त्राणि यथोपस्करसहितानि गंधपुष्पाद्यर्चितानि अपसव्यं अमुकगोत्रस्यामुकशर्मणः परलोके पंग्वादिदोषनिवृत्यर्थं वंशपात्रदानज
नितसुखावाप्तये नानागोत्रेभ्यो नानानामभ्यो अहं संप्रददे। अनेन वंशपात्रदानेन अमुकगोत्रस्यामुकशर्मणः परलोके पंग्वादिदोषनिवृ
त्तिवंशपात्रदानजनितफलावाप्तिरस्तु। स्त्री चेत् अमुकगोत्रायाः अमुकीदेविदायाः परलोके पंग्वादीत्यादि। अद्य पूर्वोच्चरित एवं तिथौ अ
पसव्यं अमुकगोत्रस्यामुकशर्मणः परलोके पंग्वादिदोषनिवृत्यर्थं सव्यं दूर्वापूजनकृतस्य विधेः सर्वं परिपूर्णमस्तु। तद्दिने सर्वाभिः स्त्रीभिर
पक्वं भक्षणीयं॥ इति मृतोद्देशेन दूर्वापूजाप्रयोगः॥ अथ आचारप्राप्तो दीपदानप्रयोगः॥ मध्याह्नोत्तरं पार्वणश्राद्धं विधाय उपलिप्ता
यां भूमौ सुवर्तिकान् सस्नेहान् पंच सप्त वा दीपान् प्राङ्मुखान् साधारान् संस्थाप्य आदौ वैदिकं श्राद्धं। तत्र अद्येत्यादि तिथौ अमुकगोत्रस्या
मुकशर्मणः परलोके तमोनिवृत्यर्थं दीपदानांगं वैदिकं श्राद्धमहं करिष्ये इति संकल्प्य श्राद्धं कृत्वा पुनराचमन प्राणायामादीन् विधाय
जलानि मंत्रणादि प्रोक्षणांतं विधाय देशकालौ संकीर्त्य अपसव्यं अमुकगोत्रस्यामुकशर्मणः परलोके तमोनिवृत्यर्थं दीपदानमहं क
रिष्ये इति संकल्प्य चंदनादिभिर्दीपपूजा कार्या। तमोपहारकोसितं सत्वमार्गप्रदर्शक। प्रकाशः सर्वभूतानां ज्योतीरूपाय ते नमः। इति सं
पूज्य सकुशं जलमादाय इमं दीपं परमज्योतिस्वरूपनारायणाधिदैवतं गंधपुष्पाद्यर्चितं अपसव्यं अमुकगोत्रस्यामुकशर्मणः परलोके
तमोनिवृत्यर्थं सव्यं भगवते विष्णवे स्वाहा। इत्येकं दीपं विष्णवे समर्प्य पुनः द्वितीयं धर्मराजाय दत्वा। कुशोदकमादाय अन्ये दीपाः परम

५३ ज्योतिरूपनारायणाधिदैवताः गंधपुष्पाद्यर्चिताः अपसव्यं अमुकगोत्रस्यामुकशर्मणः परलोके तमोनिवृत्यर्थं अमुकगोत्राय
पित्रे अमुकशर्मणे स्वधा। इदं पित्रे न मम। अद्य पूर्वोच्चरि० तिथौ अपसव्यं अमुकगोत्रस्यामुकशर्मणः परलोके तमोनिवृत्यर्थं दीपदा
नकृतस्य विधेः सर्वं परिपूर्णमस्तु। ततस्ते दीपास्तु लक्ष्मीशिवविष्ण्वाद्यन्यतमसन्निधौ निधेयाः। इति दीपदानप्रयोगः। अथ मकरसंक्रांति
निमित्तकृत्यप्रयोगः। तत्रादौ संक्रांतिनिमित्तकसपिंडकश्राद्धं पूर्वोक्तप्रकारेण कर्तव्यं। तदनंतरं भांडपात्रदानांगं वैष्णवश्राद्धं कर्तव्यं।
तत्र संकल्पे विशेषः। प्रोक्षणांतं कृत्वा अद्येत्यादितिथौ अपसव्यं। अमुकगोत्रस्यामुकशर्मणः परलोके सुखावाप्त्यर्थं भांडदानांगं वैष्ण
वश्राद्धमिति। श्राद्धं समाप्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य अपसव्यं गोत्रेत्यादिपूर्ववदुच्चार्य सुखावाप्त्यर्थं सव्यं भांडदानांगदा
नमहं करिष्ये। इति संकल्प्य कुशोदकमादाय इदं भांडं सान्नं सघृततिलमोदकादिसहितं विष्णुकर्माधिदैवतं गंधपुष्पाद्यर्चितं अमुकेत्याद्युच्चा
र्य भगवते विष्णवे स्वाहा। इदं विष्णवे न मम। अन्यानि भांडानि सान्नानि सघृततिलमोदकसहितानि अपसव्यं अमुकेत्यादि उक्त्वा सुखावा
प्त्यर्थं नानागोत्रेभ्यो ब्राह्मणेभ्यो०। अन्यदपि शक्त्या वस्त्रसुवर्णतिलादि देयं। अद्य पू० तिथौ संक्रांतिनिमित्तकदानकृतस्य विधेः सर्वं परिपूर्णम
स्तु। इति संक्रांतिनिमित्तदानप्रयोगः। अथाक्षयतृतीयाकृत्यप्रयोगः। अत्राप्यादौ युगादिनिमित्तश्राद्धानंतरं उदकुंभवर्द्धन्यादिदानांगं वै
ष्णवश्राद्धमहमित्येवं संकल्प्य श्राद्धं कृत्वा तदनंतरं आचमनादि विधाय देशकालौ संकीर्त्य अमुकगोत्रेत्याद्युक्त्वा परलोके क्षुत्तृष्णानिवृ
त्त्यर्थं उदकुंभवर्द्धन्यादीनां दानमहं क०। कुशोदकमादाय अद्येत्यादितिथौ अपसव्य अमुकगो० परलोके क्षुत्तृष्णानिवृत्त्यर्थं सव्येन एकं ५३
कुंभं भग वते विष्णवे स्वाहा। इदं विष्णवे न मम। अन्याः वर्द्धन्यः सजलाः सफलाः सच्छिद्राः सवस्त्राः गंधोदकतिलमिश्राः वरुणाधिदैवताः अमुके
त्यादि नि वृत्त्यर्थं अमुकगोत्रायामुकशर्मणे तुभ्यमहमित्यादि। अथवा नानागोत्रेभ्यो ब्राह्मणेभ्य इत्यादि। ततः पठेत् एता दत्ताः सुवर्द्धन्यो अ

सविसुशिवात्मिकाः॥ आसांप्रदानात्तृप्यंतु पितरो मे पितामहाः॥ गंधोदकस्तिलैर्युक्ताः सान्नाः स्वच्छजलान्विताः॥ पितृभ्यः संप्रदास्यामि अर्घ्यमद्य
मुपतिष्ठतु॥ अद्य पू० तिथौ उदकुंभवर्द्धनीदानविधिः सर्वपरिपूर्णमस्तु॥ इति अक्षय्यतृतीयाकृत्यप्रयोगः॥ अथ नीलोत्सर्गप्रयोगः॥ स च यु
रुत्सुऋयो मेर्द्धिमलमासधनार्कमीनार्कादिवर्जिते कार्त्तिकादिपरिशिष्टोक्ते निषिद्धातिरिक्ते काले मातापित्रोः क्षयाहे च कर्त्तव्यः॥ तत्र शस्त्यमा
मंडपं कारयित्वा तस्मिन् कर्मारंभं कुर्यात्॥ कृतप्रातस्नानादिनित्यक्रियः पूर्वोक्ते शुभपीठे प्राङ्मुख उपविश्य कृताचमनप्राणायामो देशकालौ
संकीर्त्य अमुकफलकामोहं श्रीपरमेश्वरप्रीतये स्वगृह्योक्तविधिना यथाशक्त्या नीलोत्सर्गाख्यं कर्माहं करिष्ये इति संकल्पं कुर्यात्॥ अथवा
अस्मत्कुलजातानां दुर्गतिगतानामुद्धरणार्थं नीलोत्सर्गं० अथवा अस्मत्पितुः क्षयाहपर्वणि पितुरानृण्यकामो नीलोत्सर्गाख्यं० अथवा उत्तरा
यनसंक्रांतिमहापर्वनिमित्तं॥ एवमन्यस्याविपुण्यकालस्योल्लेखः ततो मातृपूजाभ्युदयिके॥ नीलोत्सर्गाख्यकर्मांगत्वेन विहितगौर्यादिचतुर्द
शमातृणां वसोर्द्धारासहितानां स्थापनप्रतिष्ठापूजनमहं करिष्ये इति संकल्प्य मातृणां पूजां विधाय आयुःशांतिं जप्त्वा वैश्वदेवं विधाय आ
भ्युदयिकं कुर्यात्॥ तत्र गोत्राणां पितृपितामहप्रपितामहानां अमुकाः उ शर्मणां गोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां अमुक उ शर्म
णां एषां अद्य नीलोत्सर्गकर्मांगभूतं श्राद्धं पार्वणद्वयं विश्वेदेवपूर्वकं अर्घ्यपिंडसहितं नांदीश्राद्धमहं करिष्ये इति संकल्प्य यथाविधिना शृ
श्राद्धं विधाय मंडपे समागत्य समाचारात् प्रत्यात्रे अर्घं कृत्वा सोमस्वामादिपद्धिला देशकालौ संकीर्त्य स्वीकृतनीलोत्सर्गकर्मणि ब्राह्मणवर
णमहं करिष्ये इति संकल्प्य स्वालंकृतं वो द्विजश्रेष्ठा मद्यनुग्रहकारकाः॥ इदमर्घ्यमिदं पाद्यं भवद्भिः प्रतिगृह्यतां॥ इत्युक्ता द्विजाग्रेत दद्युः स्थापये
म त्॥ ततः पूर्वमाचार्यं वृणुयात्॥ गोत्रं प्रवरं साङ्गेदस्य कौथुमीशाखाध्यायिनं अमुकशर्माणं नीलोत्सर्गकर्मणा अहं यद्ये त्वामहमाचार्यं
वृणे॥ आचार्य एतत्ते पाद्यमित्यादि॥ ततो ब्रह्माणं वृणुयात्॥ गोत्रमित्याद्युक्त्वा नीलोत्सर्गकर्मणा अहं यद्ये त्वामहं ब्रह्माणं वृणे॥ ब्रह्मन्नेतत्ते

पाद्यमित्यादि। द्वावेवात्र स्रैस्त्रिजौ। ततः स्वपादौ प्रक्षाल्य वरणश्राद्धं कृत्वा यथाविधिना स्वस्तिवाचनं विधाय हस्ताभ्यां फलमादाय। अ
स्य यागस्य निःपत्त्यै भवंतोऽभ्यर्थिता मया। सुप्रसादं प्रकर्त्तव्यं मे तत्कर्मे विधानतः॥ इत्युक्त्वा फलमग्रे निधाय प्रणमेत्। तत आचार्यः स्थंडिले
पंचभूसंस्कारान्कृत्वाग्निं स्थापयेत्। ततः समिद्धोमभूजपपरिसमूहनब्रह्मोपवेशनादीनि कृत्वा चरुतंत्रेण पात्राण्यासाद्य संप्रोक्ष्य
अग्नेश्चरुस्थालीमधिश्रित्य पश्चादग्नेः प्रागग्रान्दर्भान्नास्तीर्य तैं तुंडलपूरवद्यासाद्य क०सेन हविर्निर्वपणं। अग्नये त्वा जुष्टं निर्व
पामि। पूष्णे त्वा० इंद्राय त्वा० ईश्वराय त्वा० द्विस्तूष्णीमित्यादि स्थाल्यामावापांतं प्रकृतिवत्। पायसस्य चरुः। ज्वलत्तृणेनावज्योतनं। ततः स
म्भारान्नंदादिद्विषमातॄणां स्थंडिलादीशान्यां स्थापनं। हस्तमात्रे स्थंडिले रक्तवस्त्रमास्तीर्य तंडुलैश्चतुरस्रं गृहं कृत्वा प्रादक्षिण्येन
स्थापयेत्। नंदां स्थापयामि। सुमनसां स्थां० सुमंगलां स्था० सुशीलां० सुरभीं०। एवं संस्थाप्य तस्यैशान्यां अव्रणं कलशं यथाविधिना संस्था
प्य तस्मिन्नुरंडसमावाहयेत्। ततः प्रतिष्ठामंत्रैः पठित्वा अद्य समस्तपुण्यकालानयवयोगेषु एवं० तिथौ नंदाद्याद्विषमातरः सरुंडकलशाः सु
प्रतिष्ठिता वरदा भवंतु। ततः पूजा। देशकालाद्युच्चार्य नंदादिद्विषमातॄणां पूजामहं करिष्य इति संकल्प्य नंदायै नमः इत्यादिनाममंत्रैः पूजा।
रुंडकलशे रुद्राय नमः इति पूजां विधाय तत्र रुद्रसंहिताजपः। ततः श्रृतं चरुं पात्रे न्यांतर्हितमभिघार्य चरुत्रिकेण पुनरवज्योत्य उदगुद्वास्य
पुनरभिघारयेत्। ततोऽग्नेः परिस्तरणं। पुरस्ताद्दक्षिणत उत्तरतः पश्चादित्यादिना। इतरेतः प्रणीतासादनं पश्चादग्नेः स्थालीपाकमासाद्य
ब्रह्मणमिध्माधानं। आज्यसंस्कारो यथावत्। पूर्वमाज्यमपरस्थालीपाकः। अदितेनुमन्यस्वेत्यादि पर्युक्षणं। तपश्चतेजश्चेति प्रपठेत्
पादेजपः। स्रुवादीनां संमार्गः। आज्यभागहोमः। ततः प्रकृतिवत्प्रधानहोमः। अग्नये स्वाहा। इदमग्नये न मम। पूष्णे स्वाहा। इदं पूष्णे न म ५४
म। इंद्राय स्वाहा। इदमिंद्राय न मम। ईश्वराय स्वाहा। इदमीश्वराय न मम। ततश्चतुर्गृहीताज्येनाहुतिचतुष्टयहोमो मंत्रैः। ते च मंत्राः। सोम०

54

राजानं० हेस्वो। इदमग्नये० श्रुक्रं ते० इदं पूले० इंद्राय पर्वता० इदमिंद्राय० आवोराजा० इदमीश्वराय० ततो व्याहृती चतुष्टयं हुत्वा स्विष्टकृदा
मादि वसुंधरया हाँतं कुर्यात्। ततो वृषस्य शरीरे न्यासः। यथा। वृषं वस्पतरी चतुष्टयसहितमग्नेः समीपमानीय प्राङ्मुखमवस्थाप्य न्यासं कु
र्यात्। गायत्री मूर्ध्नि नमस्तो इति ललाटे पुनानः सोमा३ धारा२३४या। पुना३ इति नेत्रयोः। अहोयिवामि हिहवा महा२ए। आ तिलाष्टरनो नुमा
वा इति कर्णयोः। हाउ३। सेतु२ स्तर इति मुखो अधिपा ता यि इत्यादि नित्री ति कंठे। कउपया। इति कंबले। हाउ३। हुं० अहाउ३ इहा। हु३। इति स्कंधयोः।
उग्नायि इति ऊरुमध्ये। हाउ३। मनोजघित्र इति हृदये। आजुहोता इति नाभौ। तद्वो हो वा इत्यादीनि चत्वारि जानुनोः। पुरो३१ जउती। पुरोजितं वोअं
धासाः इति ऊर्वोः। उद्धुत्य मू३ हायि इति जंघयोः। पावकानईया इति पुष्ठे। हाउ३। गावो हाउ। इति रोमकूपेषु। आ तून आ इति चत्वारि गुदां। तद्वो गा
नि पादेषु। आ वो राजे ति हृदयं। तद्वो हो वा इति वर्गः शिरसि। आज्यदोहैः शिखाः। प्रथमेन ध्वजेन कवचं। मध्यमेन नेत्रं। तृतीयेनास्त्रं। एवं विन्य
स्त देहो रुद्ररूपो वृषो ज्ञेयः। अथ वस्पतरीणां शरीरेषु न्यासाः। शिरसि ब्रह्मणे नमः। उदरे विष्णवे नमः। ललाटे महादेवाय नमः। कर्णयोः अश्वि
भ्यां नमः। नेत्रयोः चंद्रसूर्याभ्यां नमः। पृष्ठे वैवस्वताय नमः। पादेषु सप्तसागरेभ्यो नमः। सप्तऋषिभ्यो नमः। रोमकूपेषु सर्वदेवेभ्यो नमः। ततो वृष
कलशस्थाभिरद्भिः सर्वौषधियुताभिरभिषिंचेत्। हाहुं म३। योवा३। इति अभिषेकपूर्वकं स्नापनं शोभोस्के नवसिकां। ततः सोम ० पूर्वा
वृषा सोम। इति साम भ्यां शिरसि तिरस्का इति सुवर्णपट्टं शिरसि न्यसेत्। कंठे अहतवस्त्रद्वयबंधनानंतरं पट्टस्य न्यासः। समाचारात्पट्टबंधे
नं च। घंटानूपुरादिभिर्भूषयेत्। वस्पतरीणामपि नूपुरघंटाद्याभरणानि कार्याणि। तीर्थस्थं गायत्रिमहेवेदपादाय धीमहि तन्नो वृषः प्रचो
दयात्। इति वृषगायत्र्या वृषस्य पूजा। गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः। गावो मे हृदये संतु गवां मध्ये वसाम्यहं इति वस्पतरीणां पूजा। त
तो नमस्कारः। नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः। ततः प्रदक्षिणीकृत्य प्रार्थयेत्। धर्मस्त्वं

तथे

५५ वृषरूपेण जगदानंदकारक। अष्टमूर्तेरधिष्ठानमतः पाहि सनातन।। ततो वत्सतरीणां प्रार्थना। सर्वमंगलदायिन्यः सर्वपापहराः स्मृताः।
संसारोत्तारिणी यस्मादतः शांतिं प्रयच्छथ।। ततो वृषस्य दक्षिणे द्युरे समाचारात् वत्सतरीणां संकल्पः। सुसंप्रोक्षितमस्त्वित्यादि कुलाकुशो
दकमादाय देशकालौ संकीर्त्य इमाश्चतस्रो वत्सतरीर्यथोक्तलक्षणसंपन्नाः सुरूपाः सालंकृता घंटाद्याभरणभूषिता गंधपुष्पाद्यर्चिता
रुद्रदैवत्याः सारूप्यसालोक्यसान्निध्यसायुज्येत्यभिधाना चतुर्विधमुक्तिस्वरूपा मम समस्तपापोपघविघ्नसनाय अभिमतफलावाप्तये
मम एकोत्तरशतपूर्वजानामुद्धरणाय श्रीरुद्रस्वरूपिणे वृषभायतुभ्यमहं संप्रददे न मम। तेन श्रीभगवान्महारुद्रः प्रीयतां।। ततो रक्तचंद
नेन वृषस्य दक्षिणपार्श्वे मानस्तोक इति मंत्रेण द्वादशांगुलं त्रिशूलं लिखेत्। वृषा ह्यसीति सव्यपार्श्वे अष्टांगुलं चक्रं लिखेत्। तावेव त्रिशूल
चक्रयोरंकौ कर्मसमाप्त्यनंतरं तप्तलोहशलाकया स्पष्टौ कारयेत्। अथाग्निं परिक्रममाणं वृषमेकां वत्सतरीमनुगमयेत् तांश्चानुव्रजंती अ
नामिकया स्पृष्ट्वा अनुमंत्रयेत् मंत्रेण। काम्यासि प्रियासि हव्यासि इडासि रंतासि सरस्वत्यसि महस्वि विश्रुतिरसि।। ततः समाचारात्रिः परिण
यनं।। ततस्तर्पणं गंगादिपुण्यसरितां जलमानीय कृताचमनप्राणायामो देशकालौ संकीर्त्य अपसव्यं स्वगोत्राणां पितृपितामहप्रपिता
महानां अमुकअमुकशर्मणां गोत्राणां मातृपितामहीप्रपितामहीनां अमुकीअमुकीदेवीदानां गोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां अ
मुकअमुकशर्मणां गोत्राणां मातामहीप्रमातामहीवृद्धप्रमातामहीनां अमुकीअमुकीदेवीदानां अस्मत्कुलजानां पितृव्यादीनां तत्पुत्रयोषादीनां भ्रातृणां
भ्रातृपुत्रादीनां च पितृवंशेत्यादिपुराणश्लोकोक्तानामुद्धरणार्थं वृषवत्सतरीणां पुच्छतर्पणमहं करिष्ये इति संकल्प्य। वृषपुच्छं तरे उन्नयं
चत्येतानि सामानि समाचारात् पठित्वा नितर्पणं तत्कुशं कुशोदकं तीर्थेन पुच्छोक्षितैर्देवान् ब्रह्मादीन् तर्पयामीत्येवमादि तर्पणं कुर्यात्। तत ५५
श्लोकैः। ब्रह्माद्या देवताः सर्वा ऋषयो मुनयस्तथा। ते सर्वे तृप्तिमायांतु नीलपुच्छपरिप्लुताः।।१।। असुरा देवपक्षस्थ मातरश्चंडिकास्तथा। ते

सर्वे०।२।दिक्पालालोकपालाश्चग्रहदेवाधिदेवताः।तेसर्वे०।३।विश्वेदेवास्तथादित्याःसाध्याश्चैवमरुद्गणाः।तेसर्वे०।४।क्षेत्रपीठोप
पीठादिनदानद्यश्चसागराः।तेसर्वे०।५।पातालेनागपन्नगाश्चनागाश्चैवसर्वतः।तेसर्वे०।६।पिशाचागुह्यकाःप्रेतागणगंधर्वराक्षसाः।ते
सर्वे०।७।पृथिव्यापश्चतेजश्चवायुराकाशमेवच।तेसर्वे०।८।दिविभुव्यंतरिक्षेचपातालतलवासिनः।तेस०।९।शिवःशिवातथाविष्णुःसि
र्लक्ष्मीसरस्वती।तेसर्वे०।१०।तपोधनश्चभगवान्व्यक्ताव्यक्तःपरमेश्वरः।तेसर्वे०।११।क्षेत्रौषधिलतावृक्षवनस्पत्यधिदेवताः।तेसर्वे०।१२।
कपिलःशेषनागश्चतक्षकोऽनंतएवच।तेसर्वे०।१३।अन्येजलचराजीवाअसंख्यातास्त्वनेकशः।तेसर्वे०।१४।चतुर्दशयमाश्चैवयेचान्येय
मकिंकराः।तेसर्वे०।१५।सर्वेचयक्षराजानःपशवःपक्षिणस्तथा।तेसर्वे०।१६।स्वेदजोद्भिज्जातीयाअंडजाश्चजरायुजाः।शांतिदाःशुभदाःतेस्यु
र्नीलपुच्छेषुतर्पिताः।१७।अथापसव्यंकृत्वादक्षिणाभिमुखोभूत्वाद्विगुणदर्भैःपितृतीर्थगतैःकृष्णतिलैस्तर्पयेत्।यमंतर्पयामीत्यादिदेवपि
तॄन्संतर्प्यस्वपित्रादीन्त्रिस्त्रिःसंतर्प्यस्वमात्रादीन्तथैवसंतर्प्यपित्रादिवद्देवमातामहादीन्मातामह्यादयश्चैकैकांजलिनातर्पयेत्।अन्ये
षांपितृव्यादीनामेकैकांजलिनातर्पणं।ततःश्लोकैः।आब्रह्मस्तंबपर्यंतंयेचान्येगोत्रिणोमृताः।तेस०।१।सर्पव्याघ्रहतायेचशृंगिदंष्ट्रिनखा
भिः।तेसर्वे०।२।अपुत्राअक्रियायेचअदाराधर्मवर्जिताः।तेस०।३।आमगर्भमृतायेचशस्त्रपातहताश्चये।तेसर्वे०।४।संस्काररहि
तायेचचौरव्याघ्रादिमृगाभिनः।तेसर्वे०।५।पितृवंशेमृतायेचमातृवंशेतथैवच।तेसर्वे०।६।गुरुश्वशुरबंधूनांयेचान्येबांधवाःमृताः।तेसर्वे०।७।
येमेकुलेलुप्तपिंडाःपुत्रदारविवर्जिताः।तेसर्वे०।८।क्रियालोपगतायेचजात्यंधाःपंगवस्तथा।तेस०।९।विरूपाआमगर्भाश्चज्ञाताऽज्ञाताः
कुलेमम।तेसर्वे०।१०।येबांधवाअबांधवायेऽन्यजन्मनिबांधवाः।तेसर्वे०।११।बद्धत्वंचगतायेचतरुगुल्मलतादिषु।तेस०।१२।यातनासुच
घोरासुयोनीषुविविधासुच।तेस०।१३।नरकेषुचघोरेषुगतायेस्वककर्मभिः।तेस०।१४।देवत्वंमानुषत्वंचतिर्यक्त्वंप्रेतपिशाचतां।तेस०।१५।

५६ रौरवे नरके घोरे महारौरवसंस्थिताः। ते सर्वे०।१६। कुंभीपाकगता ये च असिपत्रवने तथा। ते स०।१७। तिर्यग्योनिंगता ये च स्थावरत्वं च ये
गताः। ते सर्वे०।१८। राक्षसत्वं पिशाचत्वं भूतत्वं चैव ये गताः। ते स०।१९। असंस्कृताः प्रमीता ये ब्रह्महत्यादिदूषिताः। ते सर्वे०।२०। सुरापानेन ये
दुष्टाः सुवर्णहरणेन च। ते सर्वे०।२१। अगम्यागमना ये च क्रूरशासनकारकाः। ते स०।२२। न्यस्तापहारिणो ये च कूटसाक्षिप्रदायकाः। ते स०
।२३। कृमिकीटपतंगत्वं गता ये च स्वकर्मभिः। तेषामुद्धरणार्थाय जलमेतद्ददाम्यहं।२४। आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः। तृप्यंतु पि
56 तरः सर्वे मातृमातामहादयः।२५। अतीतकुलकोटीनां सप्तद्वीपनिवासिनां। आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकं।२६। ततो निवीती
सनकादीन् संतर्प्य समाचाराच्चतुर्थपरिक्रमणमग्नेः परितो वृषवत्सतर्योः कारयेत्। वृषचक्रस्य चिह्नं कृत्वा तत्र तीर्थश्राद्धं विधिना श्राद्धं
कुर्यात्। तीर्थश्राद्धधर्मा उक्तास्तत्प्रकरणे। तत्र गोमयेनोपलिप्य देविकानां चेत्कारणामासिनानिसन्यस्य ब्राह्मणानुपवेश्य अक्रोधनैः
शौचपरैरित्यादि पाकप्रोक्षणं तं ड्ह्रतिवत्। नीलहुरे क्रियमाणश्राद्धोपहाराणां पाकादीनां पवि० देश०। अद्येत्यादि तिथौ अपसव्यं गो
त्राणां पितृ० गोत्राणां मातृ० गोत्राणां मातामह० गोत्राणां मातामही० सैकोद्दिष्टानां अस्मत्कुलजानां दुर्गतिगतानां गयाश्राद्धं नयकुलसं
मकलशश्रावणे यगयाशीर्षतुल्ये वृषस्य परिश्चतुःपार्वणं सैकोद्दिष्टं श्राद्धमहं०। ततः आसनदानं पूर्वं विश्वेभ्यो देवेभ्यः अनंतरं पितृभ्यः। अर्चनसं
कल्पः। सति विभवे वस्त्राङ्गुलीयकादि देयं। अस्य श्राद्धस्यार्चनविधे०। आचमनं। भोजनसंकल्पः। सत्यं त्वर्तेन परिषिंचामीत्यादि। इदं
मन्नादि० तस्य वल्लिप्रिपर्यंतं भोजनं विश्वेभ्यो०। एवं पित्रादिभ्यो भोजनसंकल्पः। ततो गायत्रीपूर्वको मधुमंत्रस्य जपः। ततो दक्षिणाप्रवणां
वृषचक्रस्य परितः सैकतां वेदिं निर्माय तदुपरि दक्षिणाग्रान् दर्भानास्तीर्य अपहता इति रेखां कृत्वा एत पितर इति नियच्छतेत्यंतेन पितॄन्नावाह्य ५६
उत्क्रमेण पार्वणचतुष्टयस्यावनेजनं कृत्वा पितृव्यादीनां यथाज्येष्ठमवनेजनं कृत्वा अस्मत्कुलजाः पितृवंशे इत्यादि पुराणश्लोकौ।

वियोनिस्याश्चअवने निरुध्धं। ततः पिंडदानं। ततश्राद्धीयपाके न सहचरशेषसंमिश्रपिंडदानं कुर्यात्। पूर्वं पित्रादित्रयाणां। ततो मात्रा
दीनां। ततो मातामहादीनां। ततो मातामह्यादीनां। ततः पितृव्यतत्पुत्रभ्रातृतत्पुत्रादीनां यावतां नामस्मरणं तावतां नामगोत्रेण पिंडान्दत्वा
नंतरं श्लोकैः पिंडान्दद्यात्। आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा मदीया। तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहं।१। वंशद्वये ये म
म दासभूता भृत्यास्तथैवाश्रितसेवकाश्च। तेषां०।२। मित्राणि शिष्याः पशवश्च वृक्षाः स्पृष्टाश्च दृष्टाश्च कृतोपकाराः। जन्मांतरे ये मम संग तो
ताश्च तेभ्यः स्वधा पिंडमहं ददामि।३। पितृवंशे मृता ये च मातृवंशे तथैव च। तेषामुद्ध०।४। गुरुश्वसुरबंधूनां ये चान्ये बांधवाः स्मृताः। तेषां०।५। ये
मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः। तेषां०।६। क्रियालोपगता ये च जात्यंधाः पंगवस्तथा। तेषां०।७। विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम।
च तेषां०।८। वृक्षयोनिंगता ये तिर्यग्योनिंगताश्च ये। तेषां०।९। मुकुलत्वंगता ये च ये च मूकत्वमागताः। तेषां०।१०। अग्निदग्धाश्च ये केचिन्नाग्निद
ग्धास्तथापरे। तेषां०।११। विद्युच्चौरहता ये च दंष्ट्रिभिः पशुभिस्तथा। तेषां०।१२। गर्भस्थाश्च मृता ये च सूयमानाश्च ये मृताः। तेषां०।१३। बंधुवर्गा
श्च ये केचिज्ज्ञातिगोत्रेण नामवर्जिताः। तेषां०।१४। रौरवे बांधतामिस्रे कालसूत्रे च ये गताः। तेषां०।१५। असिपत्रवने घोरे कुंभीपाके च ये गताः। तेषां०
।१६। अनेकयातनासंस्थाः प्रेतलोके च ये गताः। तेषां०।१७। अन्ये दुर्मरणैश्चैव ये हताः दुष्टयात्तथा। तेषां०।१८। नरकेषु समस्तेषु यातनाभिः प्रपी
त डिताः। तेषां०।१९। दिगंतरिक्षभूमिस्थाः पितरो बांधवादयः। तेषां०।२०। जात्यंतरसहस्राणि भ्रमंति स्वेन कर्मणा मानुष्यं दुर्लभं येषां तेभ्यः पिंडं ददा
म्यहं।२१। केये चित्रेतरूपेण वर्तंति पितरो मम। ते सर्वे तृप्तिमायांतु पिंडदानेन सर्वदा।२२। अग्निदाहे मृता ये च सिंहव्याघ्रहताश्च ये। तेषां०
- ।२३। उद्बंधनमृता ये च विषशस्त्रहताश्च ये। तेषां०।२४। पशुयोनिंगता ये च पक्षिकीटसरीसृपाः। तेषां०।२५। एवं पिंडदानं कृत्वा प्रत्यवनेज
नं पिंडपात्रक्षालनजलेन सर्वत्र कृत्वा ततः पात्रं न्युब्जं कृत्वा। अत्र पितरो मादयध्वमित्यादि सुसंप्रोक्षितमस्त्वित्यादि। ततः पात्रमुत्तानं कृत्वा

५७ विश्वेदेवाः प्रीयंतामित्यादि पिंडपात्रचालनांतं। दक्षिणासंकल्पः प्रकृतिवृत्तं। दातारो नोभिवर्द्धंतामित्यादि। अस्य पूं० तिथौ गोत्राणां इत्याद्युक्त्वा
र्यगयाशीर्षसमनीलवृषच्छुरे कृतस्य श्राद्धविधेर्यन्न्यूनमतिरिक्तं तत्सर्वं श्रीपरमेश्वरस्य प्रसादात्परिपूर्णमस्तु। यत्कृतं० स्वस्ति भवंतो०। आ
57 वाह्ननाभावान्नवाजे वाजे इत्यादि। आमा वाजस्य० ततस्तत्र योहर्शिलाकया त्रिशूलचक्रांकोस्य पृष्ठे कार्यौ। ततो वृषस्योत्सर्गः। सुसंप्रोक्षितमित्या
दि कृत्वा कुशोदकमादाय देशकालौ संकीर्त्य इमं धर्मरूपं नीलवृषं सर्वलक्षणसंपन्नं सुवर्णशृंगं रूप्यखुरं ताम्रपृष्ठं प्रवालकर्णं रत्नलोचनं सु
वर्णतिलकोपेतं अर्द्धचंद्राकृतिकृतललाटं मुक्ताफलघंटाद्याभरणभूषितं सुवर्णरजतचक्रत्रिशूलाभ्यामलंकृतं अष्टविधपद्मश्रीवावलंबितं
स्रक्कुचंदनादिभिरर्चितं मूर्द्धादिचरणांतं विविधवेदोदितमंत्रैरारोपितरूपं यथोक्तलक्षणसंपन्नाभिः सारूप्यसालोक्यसान्निध्यसायुज्य चतु
र्विधमुक्तिरूपाभिः सह अमुकगोत्रोहं अमुकशर्मा गयाश्राद्धजन्यफलप्राप्तिकामो गौरीकन्याप्रदानादिफलकामः पितॄणामानृण्यकामः पुत्र
कामः पशुकामो वा। एतं युवानं पतिं वो ददामि तेन क्रीडंतीश्वरस्य प्रियेण मा नस्तोकेतनये च रीरिषो मा वयमुन्मुक्तरस्म भिमुंचथा इति पठित्वा अहमु
त्सृजामि इत्युक्त्वा जलमनुत्सृजेत्। ततः सामानि श्रावयेत्। उपल्वजा। प्रसम्राजो हायि सोमः पूषा। हाउउ। गावो हाउ। हाउ। हाउ३ उ३ वा। अग्निमीडेपुरो
हितम्। हाउ। आ३ तेमन्वत प्रथमं नाम गो। नाम्। हाउ३ वा। सहर्षभाः सहवत्साउदेत। आ वो राजेत्यादि रुद्रसंहितां। काऽपयो। इति वामदेव्यं। ततो य
थेष्टं पृष्ठं पर्यटेदिति वृषं प्रेरयेत्। तत्र दक्षिणस्कंधे नेति बहव[illegible]ः। अथ वृषस्य स्तुतिः। रक्षो हि भगवानीशो मुक्तयो वन्हिकास्त्विमाः। सारू
प्याचैव सायोज्या सान्निध्या च सलोकिका॥१॥ धर्मस्त्वं वृषरूपेण विधिना निर्मितः पुरा। त्वोद्यगीत्प्रसन्नस्त्वं मामुद्धर भवार्णवात्॥२॥
नमोस्तु विश्वरूपाय धर्मरूपाय ते नमः। नमो ब्रह्मण्यदेवेश भूतर्षिपितृपोषक। त्वयि मुक्तेऽद्य या लोका मम संतु निरामयाः॥३॥ इमाः सुरू ५८
पाः पत्न्यस्ते वत्सास्तन्वगोपते। कल्पिताः क्रीडनार्थं तु त्वया सार्द्धं व्रजंत्विमाः॥४॥ गावो मम माश्रुतसंतु०। ततः प्रदक्षिणागमनं। पात्रनिनय

नं। पुनः पुरणं। सुखं ब्रोह्मितमस्त्वित्यादि। ततः संकल्प्यः। कृतस्यास्य नीलोत्सर्गकर्मणः सांगतासिध्यर्थं यथासंपन्नेनानेन अष्टोत्तरसहस्र
संख्याकान्न अष्टोत्तरशतसंख्याकान्वा ब्राह्मणान्भोजनेनाहं तर्पयिष्ये। कृतस्येत्याद्युच्चार्य आचार्याय गां अहं ददस्ये। ब्रह्मणे पूर्णपात्रं।
शक्त्या गोभूहिरण्यवस्त्रतिलपात्रशय्यादिदानसंकल्प्यः। ततो घृतपात्रे मुखावलोकनं। तत्र मंत्रः। आज्यं तेजः समुद्दिष्टं आज्यं पापहरं परं।
आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः। भौमांतरिक्षं दिव्यं वा यन्मे किल्बिषमागतं। तत्सर्वमाज्यसंस्पर्शात्प्रणाशमुपगच्छतु॥२॥ मंग
लानि ततः कुर्याद्यजमानस्य वै गुरुः। ततो दानानि देयानि विविधानि स्वशक्तितः। उत्सृष्टे वृषभे दद्याच्चतुर्दश पदानि च। शय्यां सोपस्करां चैव वर्त्ति
लिकादि विभूषितां। तिलपात्राणि देयानि घृतपात्राणि चाप्यथ। चतुर्दशभ्यो विप्रेभ्यः सभार्येभ्यो विशेषतः। उमामहेश्वरप्रीत्यै दद्याद्वस्त्रा
णि शक्तितः। दीनांधकृपणेभ्यश्च दद्याद्वित्तानुसारतः। ततश्चाशिषो नैगमाः। कामदेव्यगानं। यस्य स्मृत्या०। अद्य पू० तिथौ नीलोत्सर्गकर्मणः
कृतस्य विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं श्रीपरमेश्वरप्रसादात्परिपूर्णमस्तु॥ इति नीलोत्सर्गप्रयोगः॥ ततः क्षयाहश्चेत्पूर्वोक्तप्रकारेण क्षयाह
श्राद्धमेकपार्वणेन कर्त्तव्यं। न च पूर्वश्राद्धेन क्षयाहश्राद्धस्य सिद्धिः। देवतादेशकालभेदात्॥ अथ त्रिपिंडकश्राद्धप्रयोगः॥ तत्र भूतप्रेतादि
जनितदुष्टज्वराद्युपद्रवशांतये कर्त्तव्यं। कार्त्तिकादिचतुर्षु मासेषु शुक्लपक्षे एकादश्यां पंचम्यामष्टम्यां त्रयोदश्यां वा अनयोरपि पक्षयोः
कार्यं। दोषबाहुल्ये सति न कालापेक्षा। नद्यां पुण्यतीर्थे तदभावे शिवायतने तुलसीसन्निधौ अश्वत्थसन्निधौ वा कार्यं। तत्र सुप्रदेशे संमार्ज
नोपलेपाभ्यां भूमिं संशोध्य तत्र संभारान्संन्यस्य श्राद्धमारभेत। प्रातःस्नानादिकृतनित्यक्रियः शुद्धान्सदाचारसंपन्नान् द्विजानाहूय मध्या
ह्ने कृतमाध्याह्निकः शुद्धवाससी परिधाय सुपीठे प्राङ्मुख उपविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य अस्मत्कुले मृतानां दुर्गतिगता
नामुद्धरणार्थं अमुकस्य शरीरे ज्वराद्युपद्रवसर्वरोगशांत्यर्थं ब्रह्मविष्णुरुद्राणां प्रीतये एकोद्दिष्टविधानेन पिंडत्रयविधानरूपं श्राद्धमहं करि
ष्ये

ण्यो। इति संकल्प्य ब्राह्मणान्वृणुयात्। स्वयं प्राङ्मुख उदङ्मुखं ब्राह्मणमुपवेश्य यवानादाय दक्षिणं जान्वालभ्य गोत्रं प्रवरं सामवे
दस्य कौथुमीशाखाध्यायिनं अमुकशर्माणं पिंडत्रयविधानस्वश्राद्धकर्मणि ब्रह्म(विष्णुरुद्र)सूक्तजपार्थं त्वामहं वृणे। सूक्तजापक एतत्ते
पाद्यमित्यादि। एवं द्वितीयमुपवेश्य गोत्राद्युच्चार्य विष्णुसूक्तजपार्थं त्वामहमित्यादि। तृतीयमुपवेश्य गोत्राद्युच्चार्य रुद्रसूक्तजपार्थ
मित्यादि। ततः स्नानचंदनपुष्पवस्त्रादिभिः पूजयेत्। ततः श्राद्धदेशस्य प्राच्यामुदकसंस्थं कलशत्रयं यथाविधिना संस्थाप्य शुद्धजलेना
पूर्य सर्वौषधिसुवर्णादिनि क्षिप्य मुखं वस्त्रेणावेष्ट्य पूर्णपात्रेणापिधाय राजतीं प्रतिमां ब्रह्मकलशे सौवर्णीं विष्णुकलशे ताम्रीं रुद्रकल
शे संन्यस्य ब्रह्मजज्ञानमिति ब्रह्माणमावाहयेत्। इदं विष्णुरिति विष्णुं। आ वो राजेति रुद्रं। आवाह्य प्रतिष्ठां कृत्वा पूजयेत्। ब्रह्मजज्ञानमि
ति ब्रह्माणं इदं विष्णुरिति विष्णुं। आ वो राजेति रुद्रं। सर्वं चंदनादिभिः संपूज्य पृथक् पृथक् नैवेद्यानि दद्यात्। ततः सूक्तानि ब्राह्मणैः पठनीयानि।
ब्रह्मणः सूक्तसामानि। ब्रह्मा। ब्रा३ह्मा। हा३ स्वरता हौ। हा३उ। आनो भुवायि। इति। इदं विष्णुरित्यादि विष्णुसंहिता। आ वो राजेति रुद्रसंहि
ता। जपानंतरं जपसंकल्पः। अनेन ब्रह्मसूक्तजपेन ब्रह्मा प्रीयतां। विष्णुसूक्तजपेन विष्णुः प्रीयतां। रुद्रसूक्तजपेन रुद्रः प्रीयतां। एवं जपं निवेद्य
श्राद्धमारभेत्। प्राङ्मुखान्ब्राह्मणानुपवेश्य यवानादाय। अक्रोधनैः०। देवेभ्यः। क्रियतां। दैवकर्मणि एतद्वः पाद्यमित्यादि। एवं त्रिषु पि। आ
चमनं। भूर्भुवः स्वः समाध्वं। समासमहे। आचमनं। प्राणायामः। गायत्रसामपठनं। प्रसादं कृत्वा पिंडत्रयविधानेन श्राद्धं कारयध्वं। अग्निष्वा
त्ताः०। श्राद्धभूमौ०। सप्तव्याधा०। देवताभ्यः०। अपवित्रः०। पात्रे जलमापूर्य दशगायत्री। एतोन्विंद्रं। पृथिव्या०। भवतां०। पिंडत्रयश्राद्धोपहार ५८
णां पवित्रतास्तु। देशकाल०। अद्य मासे पक्षे तिथौ अपसव्यं अनिर्दिष्टगोत्राणामस्मत्कुलजानां दुर्गतिगतानामुद्धरणार्थं सव्यं ब्रह्मवि
ष्णुरुद्राणां प्रीत्यर्थं पिंडत्रयविधानेन एकोद्दिष्टविधिना श्राद्धमहं करिष्ये। इति संकल्प्य आसनं दद्यात्। ब्रह्मन्निदमासनं स्वाहा। हस्त०

।विष्णवे इदमासनं स्वाहा। हस्त॰ रुद्राय इदमासनं स्वाहा। हस्त॰ नावाहनं। अर्घपात्राणां पूरणं। प्रतिपात्रं द्वे द्वे पवित्रे संन्यस्य। शन्नो दे
वी॰ यवोसि॰ इदमक्षचंदनं च पुष्पं अर्घपात्राणामर्चनविधेः परिपूर्णमस्तु। स्वाहार्घ्या भवंतु। अस्तु॰ ब्रह्मणेन मद्दंपुष्पं। यादिव्या॰ ब्र
ह्मन्नु एष ते अर्घः। स्वाहा॰ विष्णवेन मद्दंपुष्पं। यादिव्या॰ विष्णो एष ते अर्घः। स्वाहार्घ्या॰ रुद्रायेन मद्दंपुष्पं। यादिव्या॰ रुद्र एष ते अर्घः। पवित्राणि
स्वस्वपात्रे कृत्वा अर्चनं कृत्वा। यथादत्तं गंधाद्यर्चनं ब्रह्मणे स्वाहा। यथा॰ विष्णवे स्वाहा। यथा॰ रुद्राय स्वाहा। अत्र गंध॰ इदं वो॰ सुज्योतिः। अ
स्यश्राद्धस्यार्चनं॰ आचमनं। पात्रेषु अन्नं परिविष्य सत्यं त्वर्तेन॰ पृथ्वी ते॰ विष्णो हव्यं॰ इदमन्नादियदत्तं यज्ञदास्यामि तत्सर्वं तृप्तिपर्यंतं भो
जनं ब्रह्मणे स्वाहा। एवं विष्णवे स्वाहा। रुद्राय स्वाहा। विकिरः। ततः प्रागग्रान् दर्भानास्तीर्य अवनेजनं। पात्रे जलमादाय ब्रह्मन्नवने निक्ष्व। विष्णो
अवनेनिक्ष्व। रुद्र अवनेनिक्ष्व। ततो व्रीहिमयं पिंडं दुग्धमधुशर्करा घृतादिद्रव्ययुतमादाय। इमं व्रीहिमयं पिंडं मधुसर्पिसमन्वितं। भूतप्रेत
पिशाचानां च ग्रहादीनां भयं तथा। रेवत्यादिग्रहाणां च ज्वरादीनां निवृत्तये। पितृवंशे मृता ये च मातृवंशे मृताश्च ये। तदर्थं ब्रह्मणः प्रीत्यै पिंडं चै
मं ददाम्यहं। ततो यवमयं पिंडमुदकद्रव्यमिश्रमादाय। इमं यवमयं पिंडं मधुसर्पिसमन्वितं। एकांतरं सततकं तृतीयकं चतुर्थकं। पाक्षिकं मासिकं
चैव वत्सरांतं तथैव च। नाशयेतां ममाह्निश्वं वासुदेवमहेश्वरौ। पितृवंशे मृता ये च मातृवंशे मृताश्च ये। तदर्थं चैव विष्णोश्च प्रीत्यै पिंडं ददाम्य
हं। ततस्तिलमयं पिंडं उदकद्रव्यमिश्रमादाय। इमं तिलमयं पिंडं मधुसर्पिसमन्वितं। स्वगोत्रे वान्यगोत्रे वा मृता ये दुर्गतिं गताः। ये केचित्प्रेतरूपे
ण पीड्यंते च महेश्वर। तर्पयन्नेनेन पिंडेन भूतप्रेतादिसंभवाः। दोषाः सर्वे प्रणश्यंतु रोगज्वरादिसंभवाः। पितृवंशे मृता ये च मातृवंशे च ये मृताः।
तदर्थं श्रीमहेशस्य प्रीत्यै पिंडं ददाम्यहं। तत प्रत्यवनेजनं। ब्रह्मन्नवनेनिक्ष्व। विष्णो अवनेनिक्ष्व। रुद्र अवनेनिक्ष्व। ततश्चंदनादिभिः संपूज्य
पृथगर्घं दद्यात्। पृथक् नैवेद्यानि। इदमर्चितं नैवेद्यं ब्रह्मणे स्वाहा। एवं विष्णवे स्वाहा। रुद्राय स्वाहा। पिंडानामर्चनविधेः परिपूर्णतास्तु। अने

नब्रह्मविष्णुरुद्रप्रीत्यै पिंडदानेन अस्मत्कुलजानां दुर्गतिगतानामक्षय्यातृप्तिरस्तु। आचमनं सुसंप्रोक्षितमस्त्वित्यादि। ब्रह्मणः दत्तंश्रा
द्धं चोपतिष्ठतां। विष्णोः दत्तंश्राद्धं चोपतिष्ठतां। रुद्रस्य दत्तंश्राद्धं चोपतिष्ठतां। ततस्तर्पणं। पात्रांतरेषु सुसंप्रोक्षितमस्त्वित्यादि विधाय। अद्ये
त्यादि तिथौ० अपसव्यं। अनिर्दिष्टगोत्राणामस्मत्कुलजानां पितृमातृवंशजानां दुर्गतिगतानामुद्धरणार्थं अक्षय्यतृप्तिकामः ब्रह्मविष्णु
शिवप्रीत्यै तत्तन्मंत्रैस्तर्पणमहं करिष्ये। सामत्रांते ब्रह्माणं तर्पयामि ब्रह्मा। ब्रा२उह्मा। हाउस्चरतो। इति द्वे। आनो भुवायि पद्मासनस्तर्प्य
तु। स्वयंभूस्तृ० परमेष्ठीस्तृ० पितामहस्तृ० अब्जात्तृ० चतुर्मुखस्तृ० स्रष्टातृ० वेधातृ० विधिस्तृ० शुक्ल तिलैः शुद्धजलेन तर्पयेत्। ततो विष्णुप्रीत्यै
सतिलशंखजलेन तर्पणं। आरो विष्णुसंहितया। तत्र सामत्रांते तर्पणं। इदस्मे। इत्यादि। अहा। यित्वा मिद्धिहवाम हाउए। आमिलाभूरनो नुमो
वातवाह्ऽसो। तवा। तवा। सोमः पवते जनिता मा३ता। यिनारमृ इत्यादि साम चतुष्टयं। हउहोहायि साम१। इदं विष्णा अहोहायि। किमित्ते
वाउयि। ष्णोपविच्या। अहायि वि किमित्ते विष्णोपरिच्याउए। इदं विष्णुर्विचक्रमे इत्यादि। ऋक् द्व। अतसी पुष्पसंकाशं पीतवाससमच्युतं येन म
स्यं ति...गोविंदं न तेषां विद्यते भयं। कृष्ण कृष्ण कृपालु त्वमगतीनां गतिर्भव। संसारार्णवमग्नानां प्रसीद परमेश्वर। अनादिनिधनो देवः शं
खचक्रगदाधरः। अक्षय्यः पुंडरीकाक्षः प्रेतमोक्षप्रदो भव। विष्णुस्तृ० पद्मनाभस्तृ० हृषीकेशस्तृ० दामोदरस्तृ० गोविंदस्तृ० ततो रुद्रसंहि
तया शंखं विना रुद्रप्रीत्यै तर्पणं। आवोराजा इत्यादि। त्र्यंबकमंत्रेण चा रुद्राय यजुषा। रुद्रस्तृ० महेशस्तृ० शिवस्तृ० मानस्तोके० ततः पवि
त्राणि पिंडानामुपरि निधाय दक्षिणां संकल्पं कुर्यात्। अस्य श्राद्धस्य कृतप्रतिष्ठासिध्यर्थं दास्यमानां दक्षिणां मुखवासं च ब्रह्मणे स्वा
हा। एवं विष्णवे स्वाहा। रुद्राय स्वाहा। अस्य श्राद्धस्य कृतप्रतिष्ठासिध्यर्थं रजतसुवर्णताम्रगोव्रीहियवतिलमाषपायसानां निष्क्रयद्र ५९
व्यं दास्यमानं ब्रह्मविष्णुरुद्रेभ्यो यथायथा विभागं वः स्वाहा। अद्य पू० तिथौ अपसव्यं अनिर्दिष्टगोत्राणामस्मत्कुलजानां पितृमातृ

59

वंशजानामुद्धरणार्थंसद्यंब्रह्मविष्णुरुद्राणांप्रीत्येकृतस्य श्राद्धविधेःसर्वंपरिपूर्णमस्तु वेद्भ्राः॰ यत्कृतं॰ स्वस्तिभवंतो॰ ततःकलशो
दकेब्राह्मणाः मंत्रैरभिषेकंकुर्युः। ततःकलशानांदानं। इमंकुंभंसजलंसवस्त्रंसान्नंसदक्षिणंब्रह्मप्रीत्येतुभ्यमहंसंप्रददेनममा एवंविष्णुप्री
त्ये॰ रुद्रप्रीत्ये॰। कृतस्यास्यश्राद्धस्यसांगतासिद्ध्यर्थंयथासंपन्नेनान्नेनब्राह्मणान्ब्रह्मविष्णुरुद्रप्रीत्येभोजनेनाहंतर्पयिष्ये। भूयसीद
क्षिणासंकल्पः। ततोदीनांधकृपणेभ्यःस्वशक्त्याअन्नादिदेयं। ततोब्राह्मणानसुमृष्टेनान्नेनयथाविभवंसंभोज्यस्वयमिष्टैःसह भुंजी
ततद्दिनेब्रह्मचर्यादिनियमवान्भवेत्। एवंकृतेसर्वज्वरादिरोगशांतिर्भवति॥ इतिसुश्रुतादिसंमतत्रिपिंडकश्राद्धप्रयोगः॥ अथाप
रस्त्रिपिंडकश्राद्धप्रयोगः॥ तीर्थादौगत्वायथाविधिनास्नात्वार्पतेणादिविधायविष्णोःपूजांकुर्यात्। तत्रपिंडत्रयश्राद्धप्रासंगंविष्णोः
पूजनमहंकरिष्यइतिसंकल्प्ययथावत्पूजांकृत्वाश्राद्धमारभेत्। उदङ्मुखान्त्रीन्ब्राह्मणानुपवेश्यआमावेदनंचहस्तेथैवनिधाय अ
पसव्येनदक्षिणामुखःसर्वंकुर्यात्। अनिर्दिष्टगोत्राः अनिर्दिष्टाःश्राद्धपैतृकाएतद्वःपाद्यमित्यादि। एवंस्थानत्रयेपि। सव्यं। आचमनंप्रा
णायामः। अपसव्यं। प्रसादंकृत्वात्रिपिंडकश्राद्धंकारयध्वं। अस्तित्वात्॰ श्राद्धभूमौ॰ सप्तव्याधा॰। अपवित्र॰ सव्यं। दशगायत्री। एतोन्विंद्रं॰
अपसव्यं। ओंहरणं। पिंडत्रयश्राद्धोपहाराणांपवित्रतास्तु। सव्यं। देशकाला॰ अद्येत्यादितिथौ॰ अपसव्यं। अदिदिष्टगोत्राणांअनिर्दिष्टपै
तृकाणांदुर्गतिगतानांतृप्त्यर्थंत्रिपिंडश्राद्धमेकोद्दिष्टविधिनाअहंकरिष्ये। अपसव्यं। अनिर्दिष्टगोत्रेभ्यःअनिर्दिष्टायैतृकेभ्यइदमासनंस्व
धा। हस्त॰। एवमपरयोः। नावाहनं। अर्घपात्रत्रयंसंन्यस्यपात्रत्रयेपि। एकैकंतंतुरूपंपवित्रंसंन्यस्य। शन्नोदेवी॰। तिलोसि॰। इत्यमंत्रंचं
दनंचपुष्पं। अर्घपात्राणामर्चनविधेःपरिपूर्णतास्तु। स्वधार्घ्यः॰। अस्तुस्वधा। अदिदिष्टगोत्रेभ्योनमइदंपुष्पंयादिव्या॰। अनिर्दिष्टगो
त्राःअनिर्दिष्टापैतृकाःएतद्वोर्घ्यंयेचात्रत्वांनुयांश्चयूयमनुतेभ्योयुष्मभ्यंस्वधा। अपरयोरप्येवं। स्वस्वपात्रेपवित्रंसंन्यस्यअर्चनंद

६०

तासंकल्पंकुर्यात्।अनिर्दिष्टगोत्रेभ्यः अनिर्दिष्टापेतकेभ्यो यथायथा विभागं वः स्वधा।एवंद्वयोः।अत्र गंधपुष्पं०इदंवोज्योतिः।अ
स्यश्राद्धस्यार्चनविधेः परिपूर्णतास्तु।सव्यं।आचमनं।नाग्नौकरणं।पात्रेत्रयं परिविष्य सत्यं त्वर्तेन०पृथ्वीते०।विष्णोकव्यं०इदमन्नादि०त्य
प्तिपर्यंतं भोजनं अनिर्दिष्टगोत्रेभ्यः अनिर्दिष्टापेतकेभ्यो यथायथा० स्वधा।एवमन्यत्र।गायत्री।मधुवाता।विकिरः।आचमनं।दक्षिणा
ग्रान्दर्भानास्तीर्य अवनेजनं रेखावाहनपूर्वकं।पात्रेजलमादाय अनिर्दिष्टगोत्राः अनिर्दिष्टापेतकाः अवनेनिक्ष्वं ये चात्र त्वानु यांश्च
यूयमनुतेभ्यो युष्मभ्यं स्वधा।एवमपरस्यानद्वयेपि।कृत्वा प्रथमं यवमयं पिंडमादाय।इमं यवमयं पिंडं मधुसर्पिसमन्वितं ददामितस्मै
प्रेताय यः पीडां कुरुते मम।अनिर्दिष्टगोत्रा अनिर्दिष्टापेतकाः एष वः पिंडो ये चात्र त्वानु यांश्च यूयमनुतेभ्यो युष्मभ्यं स्वधा।उदकं०इमं
व्रीहिमयं पिंडं मधुसर्पिसमन्वितं।ददामितस्मै प्रेताय यः पीडां कुरुते मम।अनिर्दिष्ट० अनिर्दिष्टापे०एष व०।उदकं०।इमं तिलमयं पिंडं मधु
सर्पिसमन्वितं।ददामितस्मै प्रेताय यः पीडां कुरुते मम।अनिर्दिष्टेत्यादि।प्रत्यवनेजनं पूर्ववत्।अत्र पितरो०एतद्व इति सूत्रदानं।इदमत्र चंद
नपुष्पधूपदीपो।अर्घत्रयं।नैवेद्यानि पृथक्।इदं नैवेद्यं अनिर्दिष्टेत्यादि।पिंडानामर्चनं०एभिः पिंडदानैः अनिर्दिष्टगोत्राणां अनिर्दिष्टापे
तकानां अक्षय्यातृप्तिरस्तु।गयायां पिंड०स्वर्गवासोस्तु।आचमनं।सुसंप्रोक्षितं०अपसव्यं।अनिर्दिष्टगोत्राणां अनिर्दिष्टापेतकानां दत्तं अ
क्षय्योपतिष्ठतां।एवमन्यत्र।एकैकं पवित्रं तिष्ठे पिंडं निधाय विष्णुतर्पणं।सुसंप्रोक्षितमित्यादि कृत्वा अद्येत्यादि तिथौ अपसव्यं।अनिर्दिष्टगोत्रा
णां अनिर्दिष्टापेतकानां अस्मत्कुलजानां दुर्गतिगतानां तृप्त्यर्थं सद्गतिप्राप्तये विष्णुसंहितया वैष्णवैरन्यैः सामभिः पुराणोक्तश्लोकैश्च वि
ष्णुतर्पणमहं करिष्ये।शंखोदकेन दुग्धतिलमिश्रेण तीर्थवारिणा वा तर्पणं कार्यं।विष्णुसंहिता इदमेद्धत्यादि साम० संहितासमाप्तौ अनादि
निधनो देवेत्यादि।हरह इयं तरे।तवाहं सोमतिद्धा।सोमः पवते इत्यादि चत्वारि।अहायिलप्रिंड्व तर्ति पूउए।हाउहोहायि इत्यादि साम०।इदं विष्णु ६०

अहोहा यि। किमित्। तेवाउ यिा द्वो परि स्वा। अहो यि किमिन्ते॰ इदं विष्णुर्विचक्रमे इत्यादि न्तं कृ॥ सहस्रशीर्षा न्तं कृ॥ एवं तर्पणं परिसमाप्य।
कृतमेतद्विष्णुतर्पणं। श्रीविष्णोः प्रसादात्परिपूर्णमस्तु। केचिदिदं विष्णुतर्पणं श्राद्धसमाप्त्यनंतरं कुर्वीति। ततो दक्षिणासंकल्पः। अमीषां श्राद्धा
नां कृतप्रतिष्ठासिध्यर्थं दास्यमानां दक्षिणां अनिर्दिष्टगोत्रेभ्य इत्यादि॰ दातारो नो॰ अद्य पू॰ तिथौ अपसव्यं अनिर्दिष्टगोत्राणां अनिर्दिष्ट
ना पेतकश्राद्धं एकोद्दिष्टविधिकृतस्य विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं श्रीविष्णोः प्रसादात्परिपूर्णमस्तु [illegible] स्तु तं॰ न विसर्जनमंत्रः। आमावाजस्य॰।
सव्यं। आचमनं। आयुः प्रजां॰ काउपया। यस्य स्मृत्या॰॥ इति त्रिपिंडकश्राद्धप्रयोगो द्वितीयः॥ अथैकपिंडश्राद्धं। तत्र कार्तिकशुक्लचतुर्दश्यां स
माचारात्तिलपिंडेन कुर्वीत। एतस्यापि एकोद्दिष्टधर्मकत्वान्मध्याह्नः कालः। एक एव ब्राह्मणश्च द्रुवी। नद्यादौ गत्वा स्नात्वा संध्यातर्पणादिकं
विधाय श्राद्धमारभेत्। अपसव्येन दक्षिणामुखेन सर्वं। तिलानादाय। अक्रोधने॰। अनिर्दिष्टगोत्राः अनिर्दिष्टापेतकाः एतद्वः पाद्यमित्यादि
सव्यं आचमनं। भूर्भुवः स्वः समाधाय। आचमनं। प्राणायामः। गायत्री गायत्रं च। अपसव्यं। प्रसादं कृत्वा एकपिंडश्राद्धं॰ अग्निष्वात्ता॰ श्राद्धभू
मौ॰ सप्तव्याधा॰ अपवित्र॰ दशगायत्री। एतोन्विंद्रं॰ अपसव्यं। पृथिव्या॰ सव्यं। न्नवतां॰ एकपिंडश्राद्धे॰ देश॰ [illegible] अद्येत्यादि तिथौ अप
सव्यं अनिर्दिष्टगोत्राणां अनिर्दिष्टापेतकानां दुर्गतिगतानामुद्धरणार्थं एकोद्दिष्टविधिना एकपिंडश्राद्धमहं क॰। अनिष्टगोत्रेभ्यः अनिर्दिष्टा
पेतकेभ्य इदमासनं स्वधा। हस्त॰ नावाहनं। एकमर्घपात्रं। पवित्रमेकं तंतुसूत्रं। शन्नो देवी॰ तिलोसि॰ इदमत्र वंदनं। अर्घपात्रस्यार्चनादि
धेः परिपूर्णो स्वधार्घ्यो॰ अनिर्दिष्टगोत्रेभ्यो॰ या दिव्या॰ अनिर्दिष्टगोत्राः अनिर्दिष्टापेतकाः एतद्वोर्घ्यं ये चात्र वो नु इत्यादि। पवित्रमर्घपात्रे नि
धाय अर्चनं कृत्वा संकल्पं कुर्यात्। यथा दत्तं गंधाद्यर्चनं अनिर्दिष्टगोत्रेभ्यः अनिर्दिष्टापेतकेभ्यो यथा॰ अत्र गंध॰ इदं वो॰ अस्य श्राद्धस्या
र्चनं॰ आचमनं। भोजनसंकल्पः। सत्संकल्पेन॰ पृथ्वी ति॰ इदं विष्णु॰ इदमन्नादि॰ भोजनं अनिर्दिष्टगोत्रेभ्य इत्यादि प्राग्वत्। गायत्री। मधुवाता॰।

६१ विकिरः। दर्भेस्तरणं। रेखा। एतचित र इत्यादिना आवाहनं। अवनेजनं। अदिर्दिष्टगोत्राः अनिर्दिष्टापेद्दकाः अवनेनिग्ध्वं ये चात्र वो नु इत्या
दि। ततस्तिल पिंडमादाय। इमं तिलमयं पिंडं मधुसर्पिसमन्वितं। ददामि तस्मै प्रेताय यः पीडां कुरुते मम। अनिर्दिष्टगोत्राः अनिर्दिष्टापेद्दकाः
एषवः पिंडो ये चात्र वो नु०। प्रत्यवनेजनं। अत्र पितरो०। सूत्रदानं। इदमत्र। चंदनं च पुष्पं। धूपदीपं। नैवेद्यं। इदं नैवेद्यं अनिर्दिष्टगोत्रेभ्य इत्यादि।
पिंडस्यार्चनविधेः०। अनेन पिंडदानेन अनिर्दिष्टगोत्रेभ्य इत्यादि पिंडस्यार्चनविधेः०। अनेन पिंडदानेन अनिर्दिष्टगोत्राणां अनिर्दिष्टाप
का द्दकानां मद्दयात्तृप्तिरस्तु। गयायां पिंडदानेन० स्वर्गवासोस्तु। आचमनं। सुसंप्रोक्षितमित्यादि। अपसव्यं। अनिर्दिष्टगोत्राणां अनिर्दिष्टा
पेद्दकानां दत्तं श्राद्धं चोपतिष्ठतां। पवित्रं पिंडोपरि निधाय पूर्ववत् संकल्पपूर्वकं विस्तुतर्पणं। अस्य श्राद्धस्य कृतप्रतिष्ठासिद्ध्यर्थं दास्यमा
नां दक्षिणां अनिर्दिष्ट० स्वः स्वधा। दातारो०। अद्य पू० तिथौ अनिर्दि० द्दकानां तृप्त्यर्थं कृतस्य श्राद्धविधेर्यन्न्यूनमतिरिक्तं तत्सर्वं विप्राः प्र
सादात्परिपूर्णमस्तु। वेदध्वास्तोत्र०। यत्कृतं च। आमा वाजस्य०। आचमनं। काऽपया। यस्य स्मृत्या०। इत्येकपिंडश्राद्धप्रयोगः॥ अथ संन्यास
ग्रहणप्रयोगः॥ तत्रादौ प्रायश्चित्तं नाश्रमवता तत्कृच्छ्रात्मकं कर्तव्यं। अनाश्रमवता तु प्राजापत्यचतुष्टयात्मकं कर्तव्यं। तत्र शक्ते
न मुख्यविधिना कर्तव्यं अशक्तेन प्रत्याम्नायद्वारा कर्तव्यं। प्रत्याम्नायाश्च। प्रतिप्राजापत्यं गोनिष्क्रयद्रव्यदानं। तत्र मुख्यपक्षे सुवर्ण
निष्कप्रमाणं तदर्धं तदर्धं वा। अशक्तो तावद्रजतं। प्रतिप्राजापत्यं द्वादशब्राह्मणभोजनं वा। गायत्र्याः सहस्रं तिलाहुतयः। अयुतगा
यत्रीजपो वा। वेदसंहितामात्रपारायणं। अभुक्तव्रतो होरात्रमुदवासो वा। श्रौताग्निमतो वैश्वानरीयेष्टिः। स्मार्ताग्निमतश्चरुः। प्रत्या
म्नायानां मूलवाक्यान्यस्मत्कृतकृत्यचिंतामणौ द्रष्टव्यानि। तत्रैवं संकल्पः। श्राद्धारंभात्पूर्वदिवसे कृतनित्यक्रिय उपविश्य देशका ६१
लौ संकीर्त्य संन्यासाश्रमग्रहणाधिकारसिद्ध्यर्थं प्राजापत्यचतुष्टयात्मकं प्रायश्चित्तं तत्कृच्छ्रात्मकं वा मुख्यविधिना अमुकप्र

साम्नायेन वा अहमाचरिष्ये इति संकल्प्य संकल्पानुसारेण तत्कृतकृत्वा प्रधानसंकल्पं कुर्यात्। आचम्य प्राणानायम्य देशकालौ सं
कीर्त्य मम अशेषदुःखनिवृत्तिपूर्वक निरतिशयानंदप्राप्तिपरमपुरुषार्थावाप्तये संन्यासाश्रमम् अहं करिष्ये इति संकल्पं विधाय यथावि
धिना मातृपूजा कार्या। संन्यासाश्रमग्रहणांगभूतो गौर्यादिचतुर्दशमातॄणामित्यादि संकल्प्य। ततो विश्वेदेवाः आयुः शांतिजपः ततो यथावि
धिना वृद्धिश्राद्धं। संन्यासाश्रमग्रहणांगभूतं दैवश्राद्धं पार्वणद्वयं विश्वेदेवपूर्वकमित्यादि सत्यवसुसंज्ञा विश्वेदेवाः। इदं स म्यां कृत्वा
अष्टमीमारभ्य पूर्णमास्यंतं अमावास्यंतं वा। अष्टौ श्राद्धानि कर्तव्यानि। तत्र पूर्वाह्णे नद्यां योगे वा स्नात्वा पितॄन् संतर्प्य अष्टश्राद्धदेवान्
एकस्मिन्नेव दिने तत्तच्छ्राद्धदिवसे वा जले न तर्पयेत्। शुक्लतिलैर्ऋजुकुशैर्देवतीर्थेनैकैकांजलिना तर्पणं कार्यं। तच्च स्वगृह्यानुसारेण प्र
थमया द्वितीयया वा कर्तव्यं। यथा। ब्रह्माणं तर्पयामि। विष्णुं त० रुद्रं त० देवर्षींस्त० ब्रह्मर्षींस्त० क्षत्रियर्षींस्त० वसूंस्त० रुद्रांस्त० आदित्यांस्त०
सनकं त० सनंदनं त० सनातनं त० भूतानि त० करणानि त० चतुर्विधं भूतग्रामं त० पितरं त० पितामहं० प्रपितामहं त० मातरं त० पितामहीं०
प्रपितामहीं त० आत्मानं त० पितरं त० पितामहं त०। एवं संतर्प्य गृहे आगत्य श्राद्धं कुर्यात्। तत्रा दौ देवश्राद्धं तत्र ब्रह्मविष्णुरुद्राः श्राद्धदेव
ताः युग्मा ब्राह्मणाः सर्वश्राद्धेषु। वृद्धिश्राद्धवत्सर्वं। ब्राह्मणाः प्राङ्मुखाः स्वयमुदङ्मुखः सर्वत्र। अक्रोधनैः० सर्वत्र देवकार्यमेव० देवे
क्षणः क्रियतां। ब्रह्मन्नेतत्ते पाद्यमित्यादि। एवं विष्णो एतत्ते पाद्यं। रुद्र एतत्ते पाद्यं। आचमनं। भूर्भुवस्वः समाधं। आचमनं। प्राणायामः प्र
सादं कृत्वा देवश्राद्धं करिष्ये। अग्निष्वात्ता० श्राद्धभूमौ वसन्त्व्याधा० अपवित्र० दश गायत्री। एतोन्विंद्र० पृथिव्या० भवतां प्रसादात्।
देवश्राद्धोपहाराणां पवि० देश० अत्राद्य मासे पक्षे तिथौ संन्यासांगत्वेन विहितं देवश्राद्धं वैश्वदेवपूर्वकमर्घपिंडसहितं युष्मदनु
ज्ञया अहं करिष्ये। विश्वेभ्यो देवेभ्य इदमासनं स्वाहा। हस्त०। ब्रह्मण इदमासनं स्वाहा। हस्त०। विष्णव इदमासनं स्वाहा। हस्त०। रुद्रा

६२ यद्दमासनं० हस्तं० ततो विश्वेषां देवानामावाहनं प्रकृतिवत्। अनंतरं ब्रह्माणं आवाहयामि। विष्णुं आवा०। रुद्रं आवा०। इति देवा
नामावाहनं। देववदर्घपात्रपूरणं प्राक्संस्थमुदक्संस्थं वा। हृद्धे पवित्रे सर्वत्र आशन्नो देवी। सर्वत्र यव अक्षेपो यवोसीति। विश्वेभ्यो
देवेभ्योऽर्घदानं प्रकृतिवत्। ततः स्वाहार्घ्या भवंतु। अस्तु०। ब्रह्मणे नमः इदं पुष्पं याद्यिध्या०। ब्रह्मन्नेतत्ते अर्घ्यं स्वाहा। एवं सर्वत्र। विष्णवे
नमः इदं पुष्पं याद्यि०। विष्णो एतत्ते अर्घ्यं स्वाहा। रुद्राय नमः इदं०। याद्यि०। रुद्र एतत्ते अर्घ्यं स्वाहा। देवेभ्यः स्थानमसीति अर्घपात्राणां न्यु
ब्जता। अर्चनसंकल्पः। यथादत्तं० विश्वेभ्यो देवे०। यथादत्तं गंधाद्यर्चनं ब्रह्मणे स्वाहा। एवं विष्णवे स्वाहा। रुद्राय स्वाहा। अगंधपुष्पं०। त्र
इदं वो०। दीप०। अस्य श्राद्धस्यार्चनवि०। आचमनं प्रकृतिवत्। अग्नौकरणं देवपूर्वकमन्नपरिवेषणं देवे यथावदन्नसंकल्पं विधायास
त्यं त्वर्तं० पृच्छीत०। इदं विष्णु०। इदमन्नादि०। ओं अन्नं ब्राह्मणे स्वाहा। एवं विष्णवे स्वाहा। रुद्राय स्वाहा। गायत्री पहिला मधु इति त्रिर्जपेत्।
संकल्पानंतरं विष्णुं स्मरन् पुरुषसूक्तादि पठेत्। असोमपाश्चेति विकिरप्रक्षेपः। प्रागग्रेषु दर्भेषु पृथगास्तृतेषु अवनेजनं। ब्रह्मन्
अवनेनिक्ष्व। विष्णो अवनेनिक्ष्व। रुद्र अवनेनिक्ष्व। ब्रह्मन् एष ते पिंडः। विष्णो एष ते पिंडः। रुद्र एष ते पिंडः। प्रत्यवनेजनं कृत्वा पिंडपात्र
मुत्तानमेव स्थाप्यं। अत्र देवा मादयध्वं यथाभागमावृषायध्वं। अमीमदंत देवा यथाभागमावृषायिषत इति। एतद्वो वास इति सूत्रदा
नं। चंदनादि नैवेद्यं। ब्रह्मविष्णुरुद्रेभ्यो यथा यथा विभागं वः स्वाहा। पिंडनामर्चनविधेः परिपूर्णतास्तु। एभिः पिंडदानैर्ब्रह्मादयः सं
तुष्टाः सुप्रसन्नाः संतु। आचमनं। सुसंप्रोक्षितमित्यादि। अनेन श्राद्धेन ब्रह्मा प्रीयतां। विष्णुः प्रीयतां। रुद्रः प्रीयतां। पिवित्राणि पिंडो ६२
परि प्रक्षिप्य ब्रह्मा विष्णु रुद्रेभ्यः स्वधोच्यतां। ऊर्जं वहंतीरिति मंत्रे स्वाहास्य तर्पयत मे देवान् इत्यूहः। दक्षिणासंकल्पः। अस्य श्राद्धस्य कृ

तद्धतिष्ठासिद्ध्यर्थं इमां दक्षिणां ब्राह्मणे स्वाहा। एवं विश्वेदेवा रुद्राय॰ दातारो नो॰। अद्य पू॰ तिथौ संन्यासांगत्वेन विहित देवश्राद्धकृत्तस्य
विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं ब्रह्मविष्णुरुद्राणां प्रसादात्परिपूर्णमस्त्वित्यमू स्थिति मंत्रेण विसर्जनं। आमावाजस्या। आचमनं। वाम
देव्यज्जपः। यस्य स्मृत्या॰॥ इति देवश्राद्धं॥ द्वितीये ह्रि ऋषिश्राद्धं। तत्र सर्वं पूर्ववत्। ऋषिश्राद्धकार्यमेद्य॰ ऋषिश्राद्धे क्षणः क्रियतां। देवर्ष
य एतद्वः पाद्यं। ब्रह्मर्षय एतद्वः॰। क्षत्रियर्षय ए॰। अद्येत्यादि तिथौ संन्यासांगत्वेन विहितं देवर्षिब्रह्मर्षिक्षत्रियर्षियाणां श्राद्धं वैश्व
देवपूर्वकमित्यादि। देवर्षिभ्य इदमासनं स्वाहा। हस्त॰। ब्रह्मर्षिभ्य॰। क्षत्रियर्षिभ्य॰। देवर्षीनावाहयामि। ब्रह्मर्षीनावाहयामि। क्षत्रि
यर्षीनावाहयामि। देवर्षय एतद्वो ऽर्घं स्वाहा। ब्रह्मर्षय एतद्वो ऽर्घं स्वाहा। क्षत्रियर्षय एतद्वो ऽर्घं स्वाहा। यथादत्तं गंधाद्यर्चनं देवर्षिब्र
ह्मर्षिक्षत्रियर्षिभ्यो यथायथा यथाविभागं वस्वाहा। भोजनं देवर्षिभ्यः स्वाहा। ब्रह्मर्षिभ्यः स्वाहा। क्षत्रियर्षिभ्यः स्वाहा। देवर्षयः अवने
निग्ध्वं। ब्रह्मर्षयः अवनेनिग्ध्वं। क्षत्रियर्षयः अवनेनिग्ध्वं॰। देवर्षय एष वः पिंडः। ब्रह्मर्षय एष वः पिंडः। क्षत्रियर्षय एष वः पिंडः। अर्च
नसंकल्पवन्नैवेद्यं। अनेन श्राद्धदानेन देवर्षयः प्रीयंतां। ब्रह्मर्षयः प्रीयंतां। क्षत्रियर्षयः प्रीयंतां। पवित्राणि पिंडोपरि निधाय। दे
वर्षिब्रह्मर्षिक्षत्रियर्षिभ्यः स्वाहोच्यतां। ऊर्जं वहंतीरित्यत्र तर्पयत मे ऋषीन्। दक्षिणा संकल्पे दक्षिणां देवर्षिभ्यः स्वाहा। ब्रह्मर्षिभ्यः
क्षत्रियर्षिभ्यः। दातारो॰ अद्य पू॰ तिथौ संन्यासांगत्वेन विहित ऋषिश्राद्धकृतस्य विधे॰ तत्सर्वं ऋषीणां प्रसादात्परिपूर्णमस्तु। अन्य
त्समानं॥ इति ऋषिश्राद्धं। ततो दिव्यश्राद्धं॥ तत्र वसुरुद्रादित्या देवताः। दिव्यश्राद्धकार्यमेद्य॰ दिव्यश्राद्धे क्षणः क्रियतां। दिव्यश्राद्धक
र्मणि वसव एतद्वः पाद्यमित्यादि। अद्येत्यादि तिथौ संन्यासांगत्वेन विहितं वसुरुद्रादित्यानां श्राद्धमिति संकल्प्य। वसुभ्य इदमास

नंस्वाहा।हस्तं०रुद्रेभ्य इदं०।आदित्येभ्य इदं०हस्तं०।वसूनावाहयामि।रुद्रानावाहयामि।आदित्यानावाहयामि।वसव एतद्वोर्घ्यं स्वा
हा।रुद्राः एतद्वो०।आदित्याः एतद्वो०।गंधसंकल्पे वसुरुद्रादित्येभ्यो यथायथा०।तृप्तिपर्यंतं भोजनं वसुभ्यः स्वाहा।रुद्रेभ्यः स्वाहा।
आदित्येभ्यः स्वाहा।वसवः अवनेनिग्ध्वं।रुद्राः अव०आदित्याः अव०।वसव एष वः पिंडः।रुद्राः एष०आदित्याः एष वः पिंडः।इदं नैवेद्यं
वसुरुद्रादित्येभ्यः स्वाहा।एभिः पिंडदानैर्वसुरुद्रादित्याः संतुष्टाः संतु।अनेन श्राद्धदानेन वसवः प्रीयंतां।रुद्राः प्रीयंतां।आदित्याः प्री
यंतां।पवित्राणि पिंडोपरि प्रक्षिप्य वसुरुद्रादित्येभ्यः स्वाहेत्युच्यतां।ऊर्जं वहंती०स्वाहा।स्थ तर्पयत मे वसुरुद्रादित्यान्।तृप्यमाना दक्षि
णां इमां वसुभ्यः स्वाहा।रुद्रेभ्यः स्वाहा।आदित्येभ्य०।दातारो०।अद्य पू०तिथौ संन्यासांगत्वेन विहित वसुरुद्रादित्यानां श्राद्धकृतस्य
विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं वसुरुद्रादित्यानां प्रसादात्परिपूर्णमस्तु।त्यमू षु वाजिनं०।आ मा वाजस्य।।इति द्वितीयश्राद्धं।ततो मनुष्य
श्राद्धं।तत्र सनकसनंदनसनातना देवाः।मनुष्यश्राद्धकार्यमेद्य संपाद्यं०।मनुष्यश्राद्धक्षणः।मनुष्यश्राद्धकर्मणि सनक एतत्ते पाद्यमि
त्यादि।सनंदन एतत्ते०।सनातन एतत्ते०।अद्येत्यादि तिथौ संन्यासांगत्वेन विहितं सनकसनंदनसनातनानां श्राद्धमित्यादि।सनकाये
दमासनं स्वाहा।हस्तं०सनंदनायेदमास०हस्तं०सनातनायेदमासनं स्वाहा।हस्तं०।सनक एतत्तेऽर्घ्यं स्वाहा।सनंदन एतत्तेऽ०।सनात
न एतत्तेऽ०।यथादत्तं गंधाद्यर्चनं सनकसनंदनसनातनेभ्यो यथायथा विभागं वः स्वाहा।तृप्तिपर्यंतं भोजनं सनकाय स्वाहा।एवं
सनंदनाय०सनातनाय स्वाहा।अवनेजने सनक अवनेनिक्ष्व।सनंदन अवनेनिक्ष्व।सनातन अवनेनिक्ष्व।सनक एष ते पिंडः।स
नंदन एष ते पिंडः।सनातन एष ते०।नैवेद्यसंकल्पे अर्चनवत्।अनेन पिंडदानेन सनकसनंदनसनातनाः संतुष्टाः संतु।अर्पणं०।

अनेनश्राद्धदानेनसनकः प्रीयतां। सनंदनः प्रीयतां। सनातनः प्रीयतां। स्वधावाचनेसनकसनंदनसनातनेभ्यः स्वाहोच्यतां।
ऊर्जमंत्रेस्वाहास्थतर्पयतमेमनुष्यान्। अस्यश्राद्धस्येत्याद्युक्त्वाइमांदक्षिणांसनकसनंदनसनातनेभ्यःस्वाहा। दातारो० अद्य
पू० तिथौसंन्यासांगत्वेनविहितमनुष्यश्राद्धकृतस्यविधेर्यन्न्यूनमतिरिक्तंतत्सर्वंसनकसनंदनसनातनानांप्रसादात्परिपूर्ण
मस्त्वित्यमृषु०। इतिमनुष्यश्राद्धं। अथभूतश्राद्धं। तत्रपृथिव्यादीनिभूतानि। चक्षुरादीनिकरणानि। चतुर्विधोभूतग्रामइतिश्राद्धदे
वताः। भूतादिश्राद्धकार्यमिद्य० भूतादिश्राद्धेक्षणः० भूतादिश्राद्धकर्मणिभूतानिएतद्वःपाद्यं। करणानिएतद्वः० चतुर्विधभूतग्राम
एतत्तेपाद्यमित्यादिसंकल्पेसंन्यासांगत्वेनविहितंभूतादीनांश्राद्धमित्यादि। आसनदानेपृथिव्यादिभ्योभूतेभ्यइदमासनंस्वाहाह
स्त० चक्षुरादिकरणेभ्यइदं० चतुर्विधभूतग्रामायइदं० हस्त० पृथिव्यादीनिभूतानिचक्षुरादीनिकरणानिचतुर्विधभूतग्रामं
आवाहयामि। भूतानिएतद्वोऽर्घ्यंस्वाहा। चक्षुरादीनिकरणानिएतद्वो० चतुर्विधभूतग्रामएतत्ते० यथादत्तंगंधाद्यर्चनंपृथिव्या
दिभ्योभूतेभ्यःस्वाहा। चक्षुरादिकरणेभ्यः० चतुर्विधभूतग्रामायस्वाहा। भोजनसंकल्पेतृप्तिपर्यंतंभोजनंपृथिव्यादिभ्योभूते
भ्यःस्वाहा। एवमुत्तरत्र। भूतानिअवनेनिग्ध्वं। करणानिअवनेनिग्ध्वं। भूतग्रामअवनेनिक्ष्व। भूतानिएषवःपिंडः। करणानिएष
वःपिंडः। भूतग्रामएषतेपिंडः। नैवेद्यसंकल्पेपृथिव्यादिभूतेभ्यश्चक्षुरादिकरणेभ्यश्चतुर्विधभूतग्रामभ्यायथाययथाविभागं
वःस्वाहा। अनेनपिंडदानेनपृथिव्यादीनिसंतुष्टानिसंतु। अक्षय्येअनेनश्राद्धदानेनभूतानिप्रीयंतां। करणानिप्रीयंतां। भूतग्रा
मःप्रीयतां। भूतकरणभूतग्रामेभ्यःस्वाहोच्यतां। स्वाहास्थतर्पयतमेभूतानि। अस्यश्राद्धस्यकृतप्रतिष्ठासिध्यर्थमिमांदक्षिणां

६४ पृथिव्यादिभ्यो भूतेभ्यः स्वाहा। चक्षुरादिकरणेभ्यः०। चतुर्विधभूतग्रामाय स्वाहा। अद्य पू० तिथौ संन्यासांगत्वेन विहितं भूता
दीनां श्राद्धं कृतं तस्य विधेर्यन्न्यूनमित्यादि उक्त्वा भूतादीनां प्रसादात्परिपूर्णमस्तु॥ इति भूतश्राद्धं॥ अथ पितृश्राद्धं॥ तत्र पितृपिता
महप्रपितामहाः॥ सर्वं वृद्धिश्राद्धधर्मेण पार्वणवत्॥ संन्यासांगत्वेन विहितं पित्रादीनां श्राद्धमहं करिष्ये। युग्मा ब्राह्मणाः॥ त
तो मातृश्राद्धं॥ तत्र मातृपितामहीप्रपितामह्यः॥ संकल्पादि पूर्ववत्॥ आत्मश्राद्धे आत्मपितृपितामहाः। आत्मशब्देन स्वस्यै
65 वार्घ्यपिंडदानादि। संन्यासांगत्वेन विहितं आत्मपितृपितामहानां श्राद्धमहमिति। सर्वत्र स्वनामोच्चारणेन कर्तव्यं। एवं श्राद्धानि स
माप्य ब्राह्मणाननुसाप्य प्रदक्षिणीकृत्य प्रणम्य प्रार्थयेत्। संन्यासार्थं मया श्राद्धं कृतमेतद्विजोत्तमाः। अनुज्ञां प्राप्य युष्माकं
सिद्धिं यास्यामि शाश्वतीं॥ गर्भवासभयाद्भीतस्तापत्रयात्तथैव च। प्रवेष्टुमिच्छामि गुहां परं पदमनामयं। एवं संप्रार्थ्य सविनयं
प्रणम्य तान् विसर्जेत्॥ इत्यष्टश्राद्धानि॥ ततः परेद्युः पुण्याहवाचनं देशकालौ संकीर्त्य संन्यासांगत्वेन विहितं पुण्याहवाचन
महं करिष्ये इति संकल्प्य यथाविधिना पुण्याहवाचनं विधाय वपनं कारयेत्। आपो हिष्ठा इति मंत्रद्वयेन गोदानिकविधानेन मंत्रपू
र्वकं वापनं। गोदानिकविधानं स्वशाखीयमेवावपनं कक्षोपस्थं वर्जं सश्मश्रुकेशान् शिखार्थं स्थापयेत्। ततः स्नानं नद्यादौ यथा
विधिना अब्दैवतैर्मंत्रैः। अन्यत्र वै स्वर्णरूप्यकुशांभसा। स्नात्वा देवादीसं तर्प्य होमादिद्रव्यव्यतिरिक्तं सर्वं पुत्रादिभ्यो दद्यात्।
कौपीनाच्छादनदंडादिकं च पृथक्कृत्वा स्वांशं ब्राह्मणेभ्यो दीनांधकृपणेभ्यश्च दद्यात्। ततो देवतायतने ग्रामे नदीपुलिने वा अ ६५
रण्ये वा गत्वा शुचौ देशे उपविशेत्। हेमद्रव्यं कर्मांगदक्षिणां कौपीनादि दंडं च संस्थापयेत्। दंडसंस्कारस्तु अष्टोत्तरशतशंखोदकेन

प्रणवेनपुरुषसूक्तेनवाकार्यः।ततोयथासंकेतंमुद्रादिकंविधायस्थापयेत्।ततःशुद्धासनेउपविश्यआचम्यप्राणाना
याम्यदक्षिणंजानुउत्तानंनिपात्यतदुपरिवामहस्तंकृत्वातत्रद्वेपवित्रेनिधायतंचोत्तानेनदक्षिणहस्तेनपिदध्यात्।एवंब्रह्मां
जलिंविधायमनसाजपेत्।ॐब्रह्मणेनमः।ॐविष्णवेनमः।ॐरुद्रायनमः।ॐसूर्यायनमः।सोमायनमः।ॐआत्मनेनमः।ॐअं
तरात्मनेनमः।ॐपरमात्मनेनमः।इतिमनसासंजप्यवेदादीन्जपेत्।वेदादिःप्रणवः।प्रणवान्जपेत्।अथवावेदादिमंत्राणां
जपः।ततःसक्तुमुष्टिप्राशनं।सक्तुमुष्टिंपात्रस्थंगायत्र्याभिमंत्र्यप्रणवेनप्राश्याचम्यनाभिमभिमंत्रयेत्।ॐआंआत्मनेस्वा
हा।ॐअंअंतरात्मनेस्वाहा।ॐपंपरमात्मनेस्वाहा।ॐप्रजापतयेस्वाहा।ततोदधिदुग्धाज्यानिएकीकृत्यत्रिवृदसिइतिप्रथमं
प्राश्नाति।प्रवृदसिइतिद्वितीयंप्राश्नाति।विवृदसिइतितृतीयं।ततआपःपुनंत्विति मंत्रेणापःप्राश्यवक्ष्यमाणमंत्रान्जपेत्।दध्या
व दिद्रव्यालाभेजलमेवप्राश्नीयात्।ततःसावित्रीप्रवेशः।अयमेवजपः।ॐभूःसावित्रींप्रविशामितत्सवितुर्वरेण्यं।ॐभुवःसा
वित्रींप्रविशामिभर्गोदेवस्यधीमहि।ॐस्वःसावित्रींप्रविशामिधियोयोनःप्रचोदयात्।ॐभूर्भुवःस्वःसावित्रींप्रविशामित
त्सवितु॰सर्वंजपेत्।ततःअद्यउपवासंकरिष्यामीत्युपवाससंकल्पयेत्।ततःश्रौताग्निमानाहवनीयेस्मार्ताग्निमानावस
थ्येब्रह्मचारीचेल्लौकिकाग्नौविधुरश्चेत्पृष्टोदिविविधानेनसंस्कृतेतेनसंस्कृतेग्नौवक्ष्यमाणहोमाख्यंकर्मकुर्यात्।अथ
पृष्टोदिविविधानमुच्यते।स्थंडिलेभूसंस्कारान्विधायमंत्रेणाग्निमाहरेत्।अन्वग्निरुषसामग्रमख्यदन्वहानिप्रथमोजात
वेदाः।अनुसूर्यस्यपुरुत्राचरश्मीननुद्यावापृथिवीआततंथ।इतिमंत्रेणाग्निमाहृत्यपृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोवि

६५ श्वाऽऽबधीराविवेश।वैश्वानरःसहसापृष्टोअग्निःसनोदिवासरिषःपातुनक्तं इतिमंत्रेणकृतलक्षणेदेशेसंस्थाप्य।ताताऽसवितुर्व
रेण्यस्यचित्रामाहंवृणेसुमतिंविश्वजन्यां।यमस्यकण्वोअदुहत्प्रपीनांऽसहस्रधारांपयसामहींगां।तत्सवितुः।विश्वानिदे
वसवितर्दुरितानिपरासुव।यद्भद्रंतन्नआसुव।इतिमंत्रद्वयेनाग्निंज्वालयेत्।।इतिपृष्टोदिविविधानं।।इदंपृष्टोदिविविधानंवि
धुराणामेव।तस्मिन्नहनित्रिवृत्प्राश्योपवसेत्।पुरस्तन्मनास्वगृह्योक्तविधानेनाग्निंसंस्थाप्य।आज्यस्थाल्यामाज्यंकृत्वा
65 ग्नावधिश्रित्यविलाप्योदगुद्वास्यपवित्राभ्यामुत्पूयावेक्ष्यस्रुचिचतुर्गृहीतमाज्यंगृहीत्वासमिद्वत्यग्नौपूर्णाहुतिंजुहुयात्।ॐस्वा
हाॐभूःस्वाहेतिपुस्तकांतरे।इदमग्नयेनमम।ब्रह्माधानमेतत्।श्रौताग्निमांश्चेत्सूर्यास्तमनात्गार्हपत्यंप्रज्वाल्यदक्षिणा
ग्निमुद्धृत्यप्रज्वाल्यतमाहवनीयमुद्धृत्यगार्हपत्येपूर्णाहुतिवदाज्यंसंस्कृत्यहवन्यांचतुर्गृहीतंगृहीत्वाआहवनीयेपूर्ववज्जुहु
यात्।अत्रापिब्रह्माधानमेवज्ञेयं।स्मार्ताग्निमतांप्येवमेवावसथ्येकर्तव्यं।ब्रह्मचारिणांलौकिकाग्नौ।।विधुरेणपृष्टोदिविवि
धानंसंस्कृतेग्नावेवमेव।ततःसंध्यावंदनपूर्वकमस्तमितेसायमग्निकार्यंस्वस्वाग्नौनित्यवत्कुर्युः।नित्यवत्सायंहोमंकुर्यु
रित्यर्थः।अत्रबहुवचनंश्रौतस्मार्ताग्निब्रह्मचारिपरं।विधुरेणपिपृष्टोदिविविधानसंस्कृतेग्नौसायंप्रातर्होमादिकर्त्तव्य
मितिकेचिदाहुः।होमोत्तरमिदंविष्णुरितिमंत्रेणाग्न्युपस्थानं।अग्निहोत्रीचेद्दक्षिणेनगार्हपत्यंतृणानिसंस्तीर्यद्वंद्वंपात्राण्या
सादयित्वायष्ट्यादीनिकंथावासोदंडादीनिनिधायदक्षिणेनाहवनीयंब्रह्मायतनेदर्भानास्तीर्यकृष्णाजिनंचांतर्धायतं ६५
दुपरिवस्त्रमास्तीर्यतत्रस्थितएतांरात्रिंप्रणवंजपंनजागर्ति।ब्रह्मायतनंब्रह्मोपवेशनस्थानं।रात्रौविष्णोःपूजनमुत्स

वंचास्मार्त्तोग्निमता तु अग्ने दक्षिणस्यामिदं कर्त्तव्यं। विधुरेण चा। ततो ब्राह्मे मुहूर्त्ते उत्थाय यथाविधि शौचाचमन दंतकाष्ठ
प्रातस्नान संध्यावंदन प्रातर्होमादि कृत्वा व्याहृतीर्जपित्वा तरत्समंदी धावतीति सूक्तमप्सु जपेत्। अतः परं श्रौताग्निमतः स्मा
र्त्ताग्निमतश्च इष्टिस्थालीपाकादि समारोपांतमग्रे वदिष्यामः। निरग्निविधुरेण गृह्योदितविधानसंस्कृतेग्नौ होमः कार्यः। श्रौ
तस्मार्त्ताग्निमद्भिश्च स्वस्वाग्नौ निरग्निविधुराणां कृत्यमुच्यते। अग्नेः पश्चादुपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य सं
न्यासांगत्वेन विहितहोममहं करिष्य इति संकल्प्य स्वशाखोक्तविधिना वैश्वदेवं चरुं श्रपयेत्। विश्वेदेवाजुष्टन्निर्वपामीति निर्वा
पः। चरुश्रपणांते आज्यभागौ हुत्वा आज्याहुतीर्जुहुयात्। इंद्राय स्वाहा। इदमिंद्राय। प्रजापतये स्वाहा। विश्वेभ्यो देवेभ्यः स्वाहा।
ब्रह्मणे स्वाहा। यथादैवतं त्यागः। पुनराज्येनैव होमः। प्राणाय० अपानाय० व्यानाय० उदानाय० समानाय स्वाहेति सर्वत्र। त
तो विरजाहोमं कुर्यात्तस्मिन्नेवाग्नौ। ॐ प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। इदं
प्राणादिभ्यो न मम। ॐ वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुध्याकूतिः संकल्पा मे शुध्यंतां ज्योतिरहं०। इदं वागादिभ्यो न मम।
ॐ त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोस्थीनि मे शुध्यंतां ज्योति०। इदं त्वगादिभ्यो न मम। ॐ शिरःपाणिपादपार्श्वपृष्ठोरूदर
जंघाशिश्नोपस्थपायवो मे शुध्यंतां ज्योति०। इदं शिरआदिभ्यो न मम। ॐ उत्तिष्ठ पुरुष हरितपिंगल लोहिताक्ष देहि देहि दापयि
ता मे शुध्यंतां ज्योति०। इदमुत्तिष्ठादिभ्यो न मम। ॐ पृथिव्यापस्तेजोवायुराकाशा मे शुध्यंतां ज्यो०। इदं पृथिव्यादिभ्यो न मम। ॐ श
ब्दस्पर्शरूपरसगंधा मे शुध्यंतां ज्यो०। इदं शब्दादिभ्यो न मम। ॐ मनोवाक्कायकर्माणि मे शुध्यंतां ज्योति०। इदं मनआदिभ्यो न मम।

ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा

६६ अव्यक्तभावैरहंकारैर्ज्योतिः। इदं अव्यक्तादिभ्यो न मम। ॐ आत्मा मे शुध्यतां ज्योतिः। इदमात्मने न मम। ॐ अंतरात्मा मे शुध्यंतां ज्यो
तिः। इदमंतरात्मने न मम। ॐ परमात्मा मे शुध्यंतां ज्योः। इदं परमात्मने न मम। ॐ क्षुधे स्वाहा। इदं क्षुधे न मम। ॐ क्षुत्पिपासाभ्यां स्वा
हा। इदं क्षुत्पिपासाभ्यां न मम। ॐ विविधे स्वाहा। इदं विविधे०। ॐ ऋग्विधाय स्वाहा। इदं ऋग्विधानाय०। ॐ कषोत्काय स्वाहा। इदं कषो
त्काय०। ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं। अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानं स्वाहा। इदं क्षुत्पिपासादिभ्यो
न मम। ॐ अन्नमयः प्राणमयो मनोमयो विज्ञानमय आनंदमय आत्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। इदं अ
न्नमयादिभ्यो न मम। इत्येकोनविंशतिमंत्रैर्विरजाहोमः। पुनराज्येन। अग्नये स्वाहा। इंद्राय स्वाहा। प्रजापतये स्वाहा। विश्वेभ्यो देवे
भ्यः स्वाहा। ब्रह्मणे स्वाहा। सोमाय स्वाहा। सूर्याय स्वाहा। आत्मने स्वाहा। अंतरात्मने स्वाहा। परमात्मने स्वाहा। प्राणाय०। अपाना
य०। व्यानाय०। उदानाय०। समानाय स्वाहेति। यथादैवतं त्यागः। ततः पुरुषसूक्तेन प्रत्यृचमाज्यं जुहुयात्। प्रत्यृचमंते स्वाहाकारः प्र
योज्यः। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं सर्वतस्पृत्वात्यतिष्ठद्दशांगुलम्॥१॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भा
व्यं। उतामृतत्वस्येशानो यदन्नेनातिरोहति॥२॥ एतावानस्य महिमातो ज्यायांश्च पूरुषः। पादोस्य विश्वा भूतानि त्रिपादस्यामृ
तं दिवि॥३॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः। ततो विष्वङ् व्यक्रामत्साशनानशने अभि॥४॥ ततो विराडजायत विराजो
अधिपूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥५॥ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं। पशूंस्तांश्चक्रे वायव्यानारण्या ६६
ग्राम्याश्च ये॥६॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥७॥ तस्मादश्वा अजा

यंतयेकेचोभयादतः।गावोहजज्ञिरेतस्मात्तस्माज्जाताअजावयः॥८॥तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः।तेनदेवाअयजं
तसाध्याऋषयश्चये॥९॥यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन्।मुखंकिमस्यासीत्किंबाहूकिमूरूपादाउच्यते।१०।ब्राह्मणोस्य
मुखमासीद्बाहूराजन्यःकृतः।ऊरूतदस्ययद्वैश्यःपद्भ्यां।शूद्रोअजायत॥११॥चंद्रमामनसोजातश्चक्षोःसूर्योअजायत।श्रोत्रा
द्वायुश्चप्राणश्चमुखादग्निरजायत॥१२॥नाभ्याआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्त्ततपद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकांअ
कल्पयन्॥१३॥यत्पुरुषेणहविषादेवायज्ञमतन्वत।वसंतोस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः।१४।सप्तास्यासन्परिधयस्त्रिःसप्त
समिधःकृताः।देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुम्।१५।यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्।तेहनाकं
मि महिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः।१६।एभिःषोडशैर्मंत्रैःषोडशाज्याहुतीर्हुत्वाषोडशमंत्रैश्चर्वाहुतयःप्रत्यृचंहोतव्याः
येषांपुरुषसूक्तंषोडशर्चंनास्तितेरिदंविष्णुरितिमंत्रेणआहुतयोहोतव्याः।ततश्चतुर्गृहीतमाज्यंगृहीत्वाजुहुयात्।यदिष्टंयच्च
पूर्त्तंयच्चापदिअनायदिप्रजापतौतन्मनसिजुहोमिविमुक्तोहंदेवकिल्बिषात्स्वाहा।इदंप्रजापतयेनमम।ततश्चर्वाहुतिः।प्रजापत
येस्वाहा।इदंप्रजा०।अग्नयेस्विष्टकृते०ततोमहाव्याहृतिभिर्होमः।माध्यंदिनीयैःपंचवारुणंच।प्रजापतयेस्वाहा।ततःसंर्मसमा न
प्तिः।आचार्यायस्वर्णादिदक्षिणांधेनुंचदद्यात्।ततःपुरुषसूक्तंजपेत्।वेदवेदादिंचा।वेदादिःप्रणवः।वेदश्चतुष्टयंयस्यप्रथमामृच
मितिकेचित्।अतःपरमग्न्युपस्थानाग्निसमारोपादिकंश्रौतस्मार्त्ताग्निमतांयत्कल्पंतदग्रेवदिष्यामः।निरग्निर्विधुरस्त्वंपुत्रादि
भ्यआशिषोदद्यात्।सर्वेभवंतुवेदाढ्याःसर्वेभवंतुसोमपाः।सर्वेपुत्रमुखंदृष्ट्वासर्वेभवंतुभिक्षुकाः।पश्चाद्योग्यपुत्रंप्रत्याह।

६७ त्वंब्रह्मत्वंयज्ञस्त्वंलोकस्त्वंसर्वः।इतिसपुत्रःप्रत्याह।अहंब्रह्माऽहंयज्ञोऽहंलोकोऽहंसर्वमिति।स्वयमेवजपतियद्यपुत्रस्त्रिदंडी
वा।शिवंस्वस्त्यस्तुसर्वेभ्यः।अथबंधुविसर्जनं।श्रृण्वंतुसर्वेबांधवाः।गुरुप्रसादात्संसारस्यपरंपारंगंतुकामोस्मि।मयासर्वेषां
ममतात्यक्ता।पुत्रैषणावित्तैषणालोकैषणाचमयात्यक्ता।युष्माभिर्ममोपरिममतानकर्त्तव्या।एवमुक्त्वागृहान्निर्गत्यपूर्णांज
लिमाप्सुःपिशानइत्यप्रतिरथेनाभिमंत्र्यसर्वाभ्योदेवताभ्यःस्वाहाइत्युक्त्वाअपांसमीपेगत्वातिथ्यादिस्मरणपूर्वकंस्नानसंध्या
67 दिकंकृत्वासंकल्पंकुर्यात्।संन्यासंकरोमीतिसंकल्प्यपूर्णांजलिंगृहीत्वाएषहवाअग्निःसूर्यःप्राणंगच्छस्वाहा।स्वांयोनिंगच्छ
स्वाहा।आपोवैगच्छस्वाहा।इत्यंजलित्रयंजलेहुत्वा।पुत्रैषणावित्तैषणालोकैषणासर्वैषणामयात्यक्ता।अभयंसर्वभूतेभ्योम
त्तःसकाशात्स्वाहाइत्यपांपूर्णांजलिंजलेप्रक्षिपेत्।पश्चात्सर्वंब्रह्मेतिचिंतयेत्।नान्यत्।सर्वंखल्विदंब्रह्मेतिश्रुतेः।पश्चान्मानसंब्र
ह्मांजलिंकृत्वापठेत्।यत्किंचिद्बंधनंकर्मकृतमज्ञानतोमया।प्रमादालस्यदोषाद्यत्तत्सर्वंसंत्यजाम्यहं।त्यक्तसर्वोविशुद्धात्मागतस्ने
हःशुभाशुभः।कामभोगादिकंसर्वंत्यक्तंचेदमुदाहरेत्।एषत्यजाम्यहंसर्वंकामभोगसुखादिकं।रोषंतोषंविवादंचगंधमाल्यानु
लेपनं।भूषणंनर्त्तनंगेयंदानमादानमेवच।नमस्कारंजपंहोमंयाश्चनित्याःक्रियामम।नित्यंनैमित्तिकंकाम्यंवर्णधर्माश्रयाश्चये।
गुणधर्माश्चयेकेचित्शुभाशुभफलानिच।अकरणंकार्यकर्तृत्वंकर्तारंकारणैःसह।सर्वमेवपरित्यज्यबुध्याधिष्ठितमानसः।आत्मा
नंसर्वभूतस्थंसर्वभूतानिचात्मनि।चतुर्विधस्यसत्त्वात्माभूतग्रामस्यनिःस्पृहः।कृतंचकारितंचैवईक्षितंचानुमोदितं।संचिंत्यस ६७
र्वभूतेभ्योद्भयदक्षिणां।पद्भ्यांकराभ्यांविहरन्नाहंवाक्कायमानसैः।करिष्येप्राणिनांपीडांप्राणिनःसंतुनिर्भयाः।देहेजलेंबरेभूमौ

दया १

स्थावरजंगमाश्रये। पापानामसंपुटेयेच श्लेषविश्लेषकाश्रये। लोमवस्त्रादिधान्येषु शयनेष्वासनेषु च। तेस्वयं तु विबुध्यंतु सुखं मे
नामयं विना। दत्वैवं सर्वभूतेभ्यः सर्वत्राभयदक्षिणां। करुणामैत्रवृत्तिश्च प्रज्ञावृद्धिं च संश्रितः। ततो विचिंतयेद्धीमान्सर्वमात्मनि सं
स्थितं। कोस्ति मे कश्च मे नास्ति बुध्यादेकोहमच्युतः॥ अथ गुरूपसंग्रहं कुर्यात्॥ संसारादित्यतप्तोस्मि विद्युष्टो देहमानसां ब्रह्मज्ञानां
बुशीतेन सिंच मां वाक्यवारिणा। न मेस्ति बांधवः कश्चित्त्यक्त्वात्मानं परावरं। ममात्मैव परो बंधुरुद्बुधः प्रश्नतो यतः। इंद्रियैर्विषयैः स
र्वैर्मध्याद्यंतबहिःस्थितैः। विश्वेश्वरोहमात्मा वै सर्वज्ञः सर्वतोमुखः। त्यक्त्वा नीरमयं दत्वा सर्वज्ञमजमीश्वरं। व्यक्ताव्यक्तं परं शुद्धं सत्यं
निश्चित्य तत्वतः। एतान्प्रेषानब्रुवन्नश्रुद्धो दिशश्चैवावलोकयन्। आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहरात्रि
श्च उभे च संध्ये धर्मो हि जानाति नरस्य वृत्तं। आदित्यचंद्रादयः सर्वलोकपालाः सर्वदेवाश्च स्वसंन्याससाक्षिणो भवंतु तथा अखिल
गुर्वादिब्राह्मणाश्च स्वसंन्याससाक्षिणो भवंतु। ततो नाभिमात्रे जले प्रविश्य प्राङ्मुखः सन् गायत्रीं प्रविशामि इति संकल्प्य। ॐ भूः तत्स
वितुर्वरेण्यं सावित्रीं प्रविशामि। ॐ भुवः भर्गो देवस्य धीमहि सावित्रीं प्रविशामि। ॐ स्वः धियो यो नः प्रचोदयात् सावित्रीं प्रविशामि।
ॐ भूर्भुवः स्वः तत्स॰ समस्तं प्रचोदयादित्यं तादृश्यात्। परोरजसे सावदों सावित्रीं प्रविशामि। इति जप्त्वा स्नात्वा चम्य प्रणवमयमात्मा
नं ध्यात्वा जले स्थितः। ॐ तरत्समंदी॰ उत्त्वा वेदवसूनां॰ ध्रुवस्त्वयाः पुरुषं त्योरा॰ आयुर्यो त्रिंशतं॰ इति सूक्तचतुष्टयं जपेत्। अथादित्यमु
पतिष्ठेत। पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थितः इत्युक्त्वा प्रैषोच्चारणं कुर्यात्। ॐ भूः संन्यस्तं मया। ॐ भुवः संन्य
स्तं मया। ॐ स्वः संन्यस्तं मया। ॐ भूर्भुवः स्वः संन्यस्तं मया इति मंदमध्यमोत्तमस्वरेणोक्त्वा अभयं सर्वभूतेभ्यो मत्तः स्वाहा। इति आचम्य

६८ दिशि कृत्वा पूर्णाञ्जलिं प्रक्षिपेत्। ततः शिखार्थं स्थापितान्केशांस्तूष्णीमुत्पाट्य विसृज्य यज्ञोपवीतं कंठादुद्धृत्य अच्छिन्नमेकीकृत्य प्र
त्वा ॐ आपो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वाहा। ॐ भूः स्वाहा इत्यप्सु जले सहोपवीतं जुहुयात्। ततो जलाशय एव व
स्त्रादिकं त्यक्त्वा जलाद्बहिर्निर्गत्य यथाजातरूपधरो दिगंबरो भूत्वा उदङ्मुखः पृथिव्यां सप्त पदानि गच्छेत् दिक्षु संसार इत्युक्त्वा। ततो
गच्छंतमाचार्यो दिव्यसलिलपात प्रियवचनैः हे भगवन् लोकव्यवहारार्थं लज्जानिवारणार्थं वा कौपीनाच्छादनवाससी युक्तं च करोमि।
त गोसर्पनिवारणार्थं दंडयुक्तं करोमि। तत आचार्यदत्तं दोरकं कौपीनं बहिर्वासः कंथां दंडं च क्रमेण प्रणवेनैवादद्यात्। ततो दोरकं ब
द्ध्वा कौपीनमादाय परिधाय आचम्य दंडप्रार्थनां कुर्यात्। ॐ वात्रे घ्र शर्म मे भव यत्पापं तन्निवारय। विष्णुहस्ते यथा चक्रं शूलं शिवक
68 रे यथा। इन्द्रहस्ते यथा वज्रं तथा दंड भयाद्रमे इति संप्रार्थ्य ॐ इन्द्रस्य वज्रोसि सखा मां गोपाय इति मंत्रेण दंडं गृह्णीयात्। ततो दंडकमं
डलुवस्त्रसंयुक्तो गुरुसमीपं गत्वा दक्षिणं जानु भूगतं कृत्वा पादावुपसंगृह्य नमस्कृत्य गरुडासनेनोपविश्य करौ संपुटीकृत्य श्री
गुरो भगवन्नस्माद्घोरसंसारान्मामुद्धर। असकृद्गर्भवासजन्ममरणादिभिः पीडितोस्मि अस्मात्संसारात्त्वज्ज्ञानेन मां तारय।
भूतानामभयं दत्वा सुषुम्ण शरणमागतः। त्राहि मां योगिनामीश नान्यस्त्राताऽस्ति मे प्रभो। निस्पृहः सर्वतः शांतः सर्वविद्याविशा
त रदः सर्वसंशयसंछेत्ता ऽनलसो गुरुराहृतः। तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं। शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं। त्रायस्व
भो जगन्नाथ गुरो संसारवह्निना। दग्धं मां कालदष्टं च त्वामहं शरणं गतः। हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन। तस्मात्सर्वप्रयत्ने ६८
न गुरुमेव प्रसादयेत्। अद्यप्रभृति भूतानि न हिंस्यामि कदाचन महाव्रतं चरिष्यामि कर्मणा मनसा गिरा। अविद्याकृतसर्पेण

दृष्टंतद्विषपीडितांस्ववाक्यामृतपानेनसंजीवयपुनर्मृतां।एवंगुरुंसंप्रार्थ्यगुरुंभगवद्बुध्योपस्थायअधीहिभगवोब्रह्मेतिब्रूयात्।
ततःप्राङ्मुखोपविष्टायोदङ्मुखोगुरुरद्वैतसच्चिदानंददेवरूपमात्मानमनुसंधायजलपूर्णंशंखंपुष्पादिभिरभ्यर्च्यद्वादशप्रणवै
रभिमंत्र्यतेनोदकेनप्रणवेनशिष्यस्यशिरोनिषिंचेत्।ततःशंनोमित्रइत्यादिपठित्वाशिष्यस्यशिरसिहस्तंदत्वापुरुषसू
क्तंजपेत्।ततोममव्रतेतेहृदयंदधामिममचित्तमनुचित्तंतेअस्तुममवाचमेकव्रतोजुषस्वबृहस्पतिस्त्वानियुनक्तुमह्यमितिहृदय
देशंस्पृष्ट्वाजपेत्।ततोनित्यशुद्धबुद्धमुक्तपरमानंदाद्वयंब्रह्मप्रतिपादकंप्रणवंदक्षिणकर्णेप्राङ्मुखःसन्नुदङ्मुखायवोपविशे
तायएवस्पष्टार्थमाचार्योबोधयेत्।अयमात्माब्रह्म।तत्त्वमसि।प्रज्ञानमानंदंब्रह्मेत्यादीनिमहावाक्यानि।उपदिशेत्।तेषामर्थंचबो
धयेत्।ततोनामदद्यात्।अथपरिव्राड्मुंडोऽममोऽपरिग्रहःकाषायवासावाङ्मनःकायदंडोभूतानामद्रोहीउदरपात्रोभिक्षाशी
सर्ववर्णेषुनिरस्तपतितवर्जंअयज्ञोपवीतीशौचनिष्ठोनित्यंशुचिरात्मनितुल्यनिंदास्तुतिसमोभूतानामद्रोहीमौनीदृढधर्मानित्यं
ध्यानयोगपरःस्थिरधीरात्मतत्त्वआत्मनिष्ठआत्मप्रतिष्ठःसन्तिष्ठेत्।अयमात्माब्रह्मेत्यात्मविद्ब्रह्मज्ञोतीतिविज्ञायते।क्वदेहेनो
तिकोनात्माक्वचात्माप्रकृतेःपरः।कस्यतेपितृमात्राद्यामोहएवहिकारणं।आतुरस्यचभीतस्यसंन्यासंप्राहचांगिरानतस्यविध
यःसंतिशक्त्यवस्थानुरूपतः॥विद्वान्सर्वोपचारैरभ्यर्च्यप्रैषमुच्चार्यमहावाक्योपदेशः।संन्यस्तमितियोब्रूयात्प्राणैःकंठगतैरपि।
अश्वमेधसहस्रस्यफलमाप्नोत्यसंशयं।एवंयःसंन्यसेद्द्विजोयथाशास्त्रंयथाविधि।ब्रह्मलोकमवाप्नोतियावदाभूतसंप्लवं।आ
तुराणांविशेषोऽस्तिनोविधिर्नैवचक्रिया।प्रैषमात्रेणसंन्यासोह्यातुराणांविधीयते।शेषंवित्तंत्यजेद्द्विजोधनधान्यादिकंचयत्।अ

६९ त्यागात्सर्ववित्तस्य संन्यासो निःफलो भवेत्। दंडग्रहणमात्रेण क्षेतशब्दो निवर्त्तते। महावाक्योपदेशेन परं ब्रह्माधिगच्छति। इति नि
रग्निविधुराणां संन्यासग्रहणविधिः। अथ श्रौतस्मार्त्ताग्निमतः संन्यासग्रहणविधिः संक्षेपेणोच्यते। आदौ कृच्छ्रचरणं सर्वप्रायश्चि
त्तं। ततः संकल्पः। नांदीश्राद्धं। अष्टश्राद्धानि। वपनं। स्नानतर्पणे। ब्रह्मांजलिः। मात्राकल्पनं। सक्तुप्राशनं। घृतप्राशनं। अपां वा। सा
वित्रीप्रवेशः। अग्निविहरणं। ब्रह्मान्वाधानं। पूर्णाहुतिवदाज्यं संस्कृत्य स्रुक्स्रुवं च संमृज्याज्यस्योत्पूयावेक्ष्य चतुर्गृहीतं समित्पूर्व
कमाहवनीये प्रजापतये स्वाहेति जुहोति। ततः सायंहोमः। मात्रासादनं। ब्रह्मस्थानोपवेशनं। जागरः। विष्णुपूजा। प्रातर्होमः। ततः प्रा
जापत्येष्टिः। सा च प्रकृतिवद्विकृतिन्यायेनान्वारंभणीयेष्टिपूर्विका भवतीति बह्वः। नेति केचित्। न तत्र न्यायोऽसिद्धं। अग्नीनुद्धृत्याग्न्य
धानं। षट्समिधो गृहीत्वा देशकालाद्युच्चार्य संन्यासांगत्वेन विहितप्राजापत्येष्ट्याहं यक्ष्ये। तत्र प्रजापतिं चरुणा। सद्योहं यक्ष्ये। तत्र
सप्तदशो वज्रः। व्रीहिभिर्यागः। उपयुज्यमानातिरिक्तं सर्वस्वं दक्षिणा। वैकल्पिकपदार्थादि। आसादने कपालोपवेषोद्धरणपात्रीणा
मभावः। ग्रहणे प्रजापतये जुष्टं गृह्णामि। त्वाधिकः प्रोक्षणे। फलीकरणांतं। न पेषणं। न कपालोपधानं। स्वपवित्रायां चरुस्थाल्यां प्र
क्षालितानां तंडुलानामावापः। उपसर्जन्यासेकः। न संयवनं। आज्यचर्वोः सहाधिश्रयणं। पर्यग्निकरणं। चरोः संयवनं प्रथमाद्धिरभि
मर्शनाभिवासानामभावः। पात्र्यंगुलिप्रक्षालनं न। नाप्योदकदानं। प्राणदाने प्रजापतिं गच्छ स्वर्यजमानायेति। इदमहं सप्तदशेनव
ज्रेणेत्यवबाधने। आवाहने प्रजापतिमुपांश्वावहेत्युच्चैः। वार्त्रघ्नावाज्यभागौ। आज्यभागांते सहस्रशीर्षेत्यादिषोडशभिर्मंत्रैरा ६९
ज्याहुतीर्जुहोत्याहवनीये। ततः प्रधानयागः। प्रजापतयेऽउपांश्वनुब्रूहीत्युच्चैः। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता ब

69

भूर्वायत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥ ३ ॥ प्रजापतिं उ॰ यज॰ । येऽ यजामहे प्रजापतिं तं वेमे लोका नाः प्रतिशो दि
शश्च परावतो निवत उद्वतश्च । प्रजापते विश्वसृज्जीव धन्य इदं नो देव प्रति हर्य हव्यं स्वाहा । दक्षिणायां सर्वे स्वमसीति विशेषः । शेषं
पौर्णमासवत् । ततो गृह्योग्नौ वैश्वदेवं चरुं श्रपयित्वा आज्यभागांते पुरुषसूक्तेन प्रत्यृचेनाज्यहोमः । ततश्चरोः पुरुषसूक्तेन षोडशा
हुतीर्जुहुयात् । ततः सप्रश्नीय यच्चादिष्टं यच्च पूर्वं यच्चापद्यनायदि । प्रजापतौ त्वन्मसि जुहोमि विमुक्तो हे देव किल्बिषात्स्वाहेति । प्राणापा
नौ समौ कृत्वा इष्टापूर्तादिकं सर्वं जुहोमीति ब्रूयात् । ततः आज्येन अग्नये स्वाहा । सोमाय स्वाहा । अग्नीषोमाभ्यां स्वाहा । इंद्राग्निभ्यां स्वा
हा । सवित्रे स्वाहा । सरस्वत्यै स्वाहा । सदसस्पतये स्वाहा । अनुमत्यै स्वाहा । श्रद्धायै॰ मेधायै॰ विश्वेभ्यो देवेभ्यः॰ ब्रह्मणे॰ प्रजापतये॰ त
था तथा त्यागः सर्वत्र । ततो विरजाहोमः । पूर्ववत् । ततश्चरुणा स्विष्टकृत् । भूरादिशेषं समाप्य । अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः ।
असौ स्वर्गाय लोकाय स्वाहा । इति मंत्रेणावसथ्याग्नौ आवसथ्यपात्राणां मरण्योश्च प्रतिपत्तिं कृत्वा अग्ने पवस्व स्वपा अस्मे वर्चः सु
वीर्यं दधद्रयिं मयि पोषं इति मंत्रेण उपस्थाय अयं त इति मंत्रेण दक्षिणं पाणिं प्रतप्याव जिघ्रेत् । त्रिरवघ्राय शरीरं गंडदान संज्ञं आव
सथ्याग्निं ध्यायेत् । इति आवसथ्यसमारोपः । चरोः शेषेण बदराकृतिदधिमधुघृतमिश्रान्पिंडान्निर्वपेत्पूर्वादिदिक्षु । नांदीमुखाः संप्राः
पितरस्तृप्यंतामिति प्राच्यां पिंडं दत्वा अनेनैव मंत्रेणांजलिदानं । आतारमिंद्रमित्युपस्थानं । नांदीमुखाः साग्नयः पितरस्तृप्यंतामित्या
ग्नेय्यां पिंडं दत्वा नांदीमुखाः साग्नयस्तृप्यंतु पितरो मम इति पिंडोपरि जलांजलिं दत्वा अग्निस्तिग्मेनेत्युपस्थानं । नांदीमुखाः सय
माः पितरस्तृप्यंतामिति दक्षिणे पिंडं दत्वा नांदीमुखाः सयमास्तृप्यंतु पितरो मम इति पिंडोपरि जलांजलिं दद्यात् । नाके सुपर्णमित्युप

७० स्थानं।नांदीमुखाः सनैर्ऋताः पितरस्तृप्यंतामिति नैर्ऋत्ये पिंडदानं।नांदीमुखाः सनैर्ऋतास्तृप्यंतु पितरो ममेतिऊर्ध्वांजलिः।वेत्थाहि
त्युपस्थानं।नांदीमुखाः सवरुणाः पितरस्तृप्यंतामिति प्रतीच्यां पिंडदानं।नांदीमुखाः सवरुणास्तृप्यंतु पितरो ममेत्यंजलिदानं।यद
कदाचमीढुषेत्युपस्थानं।नांदीमुखाः सवायवः पितरस्तृप्यंतामिति वायव्यां पिंडदानं।नांदीमुखाः सवायवस्तृप्यंतु पितरो ममेत्यं
जलिः।वातआवातु भेषजमित्युपस्थानं।नांदीमुखाः ससोमाः पितरस्तृप्यंतामित्युत्तरस्यां पिंडदानं।नांदीमुखाः ससोमास्तृप्यंतु पि
70 तरो ममेत्यंजलिः।तवाहं सोमेत्युपस्थानं।नांदीमुखाः सेशानाः पितरस्तृप्यंतां।नांदीमुखाः सेशानास्तृप्यंतु पितरो ममेत्यंजलिः।
अभित्वाशूरेत्युपस्थानं।नांदीमुखाः सब्रह्माणः पितरस्तृप्यंतामिति इंद्रेशानयोर्मध्ये पिंडदानं।नांदीमुखाः सब्रह्माणस्तृप्यंतु पित
रो ममेत्यंजलिः।मयि वर्चो अथो यश इत्युपस्थानं।नांदीमुखाः ससर्पाः पितरस्तृप्यंतामिति निर्ऋतिवरुणयोर्मध्ये पिंडदानं।नांदीमु
खाः ससर्पास्तृप्यंतु पितरो ममेत्यंजलिः।अतो देवा अवंतु न इत्युपस्थानं।नांदीमुखाः सर्वगाः पितरस्तृप्यंतामिति सर्वदिशो ध्यात्वा
पिंडं दद्यात्।नांदीमुखाः सर्वगास्तृप्यंतु पितरो ममेत्यंजलिः।हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं।योसावादित्ये पुरुषः सोसा
वहमिति मंत्रेणोपस्थानं।ततः श्रौताग्नेः समारोपार्थं विहरणं केचिदिच्छंति।पूर्वस्मिन्विहारेन्ये।होमसाधनपात्राणमुत्तरारणेश्च
आहवनीये प्रतिपत्तिरसात्वमिति पूर्वोक्तमंत्रेण।अग्नेपवस्वेत्युपस्थानं।यातेअग्नेयज्ञियातनूस्तया ह्यारोहात्मानमस्येवसूनि।
कृण्वन्नस्मिन्नर्यापुरूणि यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो बभूव।आजायमानसक्षयएहि।इति मंत्राभ्यां दक्षिणं पाणिं प्रता ७०
प्य अयंत इति मंत्रेणावजिघ्रेत्।द्विस्तूष्णीं।मुखेव हृदयस्थे ध्याने तं समारोप्य स्वर्गाय वर्गसाधनं वैश्वानरं ध्यायेत्।इत्याहवनीय

समारोप्य । ततो भवतं नः समनसौ सचेतसावरेपसौ । मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः । इति अधरा
रणिं गार्हपत्ये प्रक्षिप्य अस्मात्त्वमिति मंत्रेण यज्ञियपात्राणि उलूखलमुसलशूर्पपात्र्यनोवर्जं प्रक्षिप्य । अयमग्निर्गृहपतिर्गार्हपत्यः
प्रजाया वसुवित्तमः । अग्ने गृहपते भिद्युम्नमभि सह आयच्छस्व इति मंत्रेणारणिं प्रज्वाल्य अग्ने पवस्वेत्युपस्थाय दक्षिणं पाणिं प्रता
प्यया ते अग्ने यज्ञिया तनूरिति पाणिस्थं गार्हपत्यं त्रिराघ्राय अयं ते योनिरृत्विय इति मुखे प्रवेश्य स्वहृदयस्थे प्राणे तं समारोप्य भूः संस्थं गार्हप
त्यं ध्यायेत् । इति गार्हपत्यसमारोपः । अयमग्निः पुरीष्यो रयिमान्पुष्टिवर्द्धनः । अग्ने पुरीष्याभिद्युम्नमभि सह आयच्छस्व इति दक्षिणाग्नेः पा
त्रीं शकटं प्रक्षिप्य अस्मात्त्वमिति उलूखलमुसलशूर्पाणां प्रतिपत्तिः । अग्ने पवस्वेत्युपस्थानं । अयं ते योनिरृत्विय इति दक्षिणं पाणिं प्रताप्य
या ते अग्ने यज्ञिया तनूरिति त्रिरवजिघ्रेत् । मुखेन प्रविष्टं स्वहृदयस्थमपानसंस्थं अंतरिक्षस्थं दक्षिणाग्निं ध्यायेत् । इति दक्षिणाग्निसमा
रोपः । अग्ने पवस्वेति सभ्योपस्थानं । अयं ते योनिरृत्विय इति पाणिं प्रताप्य या ते अग्ने यज्ञिया तनूरिति त्रिरवघ्राय स्वहृदयस्थे उदाने तं समा
रोप्य तत्स्थं सभ्यं वैश्वानरं ध्यायेदिति सभ्यस्य समारोपः । अश्ममयमृन्मयानामप्सु प्रक्षेपः । लोहमयानां ब्राह्मणाय दानं । तैजसानां ।
गुरवे दानं । हुतेषु सर्वेषु अभयप्रतिरथेनाभिमंत्रणं । अभयं सर्वभूतेभ्यो मत्तः सकाशादित्युक्त्वा उदकांजलिं वेद्यां प्रक्षिपेत् । गार्हपत्या
यतनं गत्वा पुरुषसूक्तं जपेत् । वेदिमध्ये स्थित्वा को सि कतमो सि कस्यासि को नामासि । यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम ।
भूर्भुवः स्वः इति जपेत् । अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे । तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजा
तमग्रे इति मंत्रेणादित्यमुपस्थाय । वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्य

७१ तेयनाय। इतिमंत्रेणात्मानमालभते। ब्रह्मणस्पतेत्वमस्ययंताबोधितनयंचजिन्वाविश्वंतद्भद्रंयदवंतिदेवाबृहद्वदेमविदथेसुवी
राः। यइमाविश्वाविश्वकर्मायोनःपितान्नयतेन्नस्यनोदेहि। इतिमंत्रंपठित्वाप्राग्वोदग्वाग्रासीमांतमनुव्रजेत्। समुद्रोसिनभस्वा
नार्द्रदानुःशंभूर्मयोभूरभिमावाहिस्वाहा। मारुतोसिमरुतांगणःशंभूर्मयोभूरभिमावाहिस्वाहा। वस्यूरसिदुवस्वांश्शंभूर्मयोभूरभि
71 मावाहिस्वाहा। इतिमंत्रंपठित्वापुनराव्रजेत्। अरण्यंगत्वासुतंदृष्ट्वात्वंब्रह्मेत्यादिपूर्ववज्जपेत्। पुत्रोपिपूर्ववत्प्रतिवचनमहंब्रह्मेत्या
दिवदेत्। पुत्राभावेस्वयंकरोति। इत्यात्मसमारोपविधिः। ततःपरंगुरोरुपसरणादिप्राग्वत्सर्वंमहावाक्योपदेशांतंकुर्यात्। इति
श्रौतस्मार्ताग्निमतांसंन्यासग्रहणविधिः। अतःपरंसंन्यासाश्रमवतांप्रात्यहिककृत्यमन्यतोऽवगंतव्यं। अथसंन्यासिनांमरणानं
तरंकृत्यमुच्यते। गृहस्थःस्नात्वाशुद्धांतःकरणआचम्यशुद्धेवाससीपरिधायनवंकुंभमानीयतीर्थोदकैःप्रणवेनापूर्यकुंभंस्पृष्ट्वाम
त्रान्पठेत्। गंगेचयमुनेचैवगोदावरिसरस्वति। नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु। नारायणपरंब्रह्मज्योतिरात्मापरायणः।
नारायणपरंब्रह्मदेवोनारायणःपरः। देवस्यैवेच्छयाकश्चित्ब्रह्मैवव्यक्ततांगतः। पुनर्ब्रह्मैवसंप्राप्तोब्रह्मैवसतदुच्यते। ब्रह्मैवजा
यतेसृष्टिःसृष्टिर्ब्रह्मैवजायते। तस्मात्संसारिणःसर्वेब्रह्मैवेदंनसंशयः। यत्किंचित्पूज्यतेलोकेतेनैवब्रह्मपूजितं। एतान्मंत्रानुजपि
त्वाप्रणवेनाभिमंत्रयेत्। ततःकुंभोदकेननारायणाष्टाक्षरमंत्रेणसंस्नाप्यचंदनपुष्पादिभिरष्टाक्षरेणपूजांविधाय। जयनाराय
णस्त्वंहिजयरामजनार्दन। जयकृष्णहृषीकेशजयमाधवमुक्तिद। ततःशंखघंटादिवादित्रैरिदंविष्णुरितिमंत्रेणशिक्येआरो ७१
प्ययामात्प्राचीमुदीचींदिशंगत्वाशुद्धदेशमाश्रित्यनदीतीरेऽश्वत्थवृक्षस्यदेवायतनस्यसमीपवर्त्तिभूप्रदेशंव्याहृतिभिःसंप्रो

७२ स्यदंडप्रमाणंचतुरस्रंखनित्वागोमयोदकेनसंप्रोक्ष्यलवणंप्रक्षिप्यगायत्र्यादर्भानास्तीर्यगायत्र्याशरीरंप्रक्षाल्यशतकुंभोदके
नपुरुषसूक्तेनस्नापयित्वागंधपुष्पैरलंकृत्यशंखवादिजयशब्दपूर्वकंविष्णोहव्यंरक्षस्वेतिमंत्रेणउदङ्मुखंस्थापयित्वाइदंविष्णु
रितिदक्षिणहस्तेदंडंत्रिधाकृत्वानिदध्यात्।दक्षिणकरंहृदयमानीयमंत्रंजपेत्।हंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथि ह३
दृ र्दुरोणसत्।नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत्।भुवोर्मध्येपुरुषसूक्तंजपेत्।ब्रह्मजज्ञानमितिमूर्द्धान न्या४
मभिमंत्र्य।भूमिर्भूमिमगान्मातामातरमप्यगात्।भूयामपुत्रैःपशुभिर्योनोद्वेष्टिसभिद्यतां।इतिशंखेनकिंचिन्मूर्द्धानंभिंद्यात्।
ततःसप्तव्याहृतिभिःप्रणवेनचदेवयजनंपूरयेत्।अग्निनाग्निःसमिध्यतेकविर्गृहपतिर्युवा।हव्यवाट्जुह्वास्यः इतिनुमंत्रेमंत्र
72
येत्।नात्रातःपरंशेषसंस्कारः।ततोऽवभृथबुध्यास्नानं।उपरिअश्वत्थस्यशिवस्यवास्थापनं।नजलदानंनपिंडदानंनाशौचं(
एकोद्दिष्टंजलंपिंडंनाशौचंप्रेतसत्क्रियां।नकुर्यात्पार्वणादन्यद्ब्रह्मीभूतायभिक्षवइतिवाक्यात्।। ।। ७।। ।।मोक्षस्याती
यविश्रामभुक्तस्यतनयेनहि।शिवरामेणरचितापद्धतिर्विदुषांमुदे।। ।।लिखितमिदंपुस्तकंत्रिपाठिनानासुतचंद्रेश्वरेण।। ७
संवत्१८२३शाके१६८८आसाढकृष्णनवम्यां।। ।। ।।शुभंभवतु।।हस्तःपरतरंनान्यत्त्वत्तःपश्यामिचक्षुषा।अत
स्त्वंपाहिदुःखान्मांशरणागतवत्सल।।कष्टेनलिखितोग्रंथःयत्नेनप्रतिपालयेत्।। ।।

सामवेदिनामन्त्येष्टिपद्धतिरियम्

२६०

श्राद्धचिन्तामणी